CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

235
11|11|70

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कण्णा गोरावाला

THE
HARIDAS SANSKRIT SERIES
115

श्रीगङ्गादासविरचिता

छन्दोमञ्जरी

प्रभा-रुचिरा-संस्कृत-हिन्दीटीकोपेता

टीकाकारौ
श्रीपण्डितहरिदत्तशास्त्री
श्रीपण्डितशङ्करदेवपाठकश्च

सम्पादकः
पं० अनन्तरामशास्त्री वेतालः

THE
CHOWKHAMBA SANSKRIT SERIES OFFICE
Post Box 8, VARANASI-1 (India) Phone : 3145
1969

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
मुद्रक : विद्याविलास प्रेस, वाराणसी
संस्करण : षष्ठ, वि० संवत् २०२६
मूल्य : २-५०

© The Chowkhamba Sanskrit Series Office
Gopal Mandir Lane
P. O. Chowkhamba, Post Box 8,
Varanasi-1 (India)
1969
Phone : 3145

प्रधान शाखा
चौखम्बा विद्याभवन
चौक, पो० बा० ६९, वाराणसी-१
फोन : ३०७६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

छित्राः शब्दाः

अथेदं विदाङ्कुर्वन्तु विपश्चिदपश्चिमा विद्वांसो यत्—

'छन्दः पादौ तु वेदस्य मुखं व्याकरणं स्मृतम्'। इत्ययं प्राचीनानामुदाहारः। षडङ्गवेदस्य पादस्थानीयं छन्दःशास्त्रं वेदस्य प्रधानतममङ्गम्। एतच्च शास्त्रं लौकिक-वैदिकभेदेन द्विधा विभक्तम्। अधुना भारतभूमेर्दुरदृष्टतया छन्दःशास्त्रस्य महती दुर्दशा संवृत्ता। भारतीयविद्वांसो नितरामनवधानं विषयेऽस्मिन्नालम्बन्ते।

छन्दःशास्त्रे पिङ्गलच्छन्दःशास्त्रं वृत्तरत्नाकरं छन्दोमञ्जरीत्यादिग्रन्थाः शिरोमणिभूता जेगीयन्ते। तत्रास्मन्मानसं छन्दोमञ्जरी सविशेषमावर्जितवती। यतोऽस्याः शैली शैल्यन्तरेभ्यो नितान्तं मनोरमा, उदात्ता, विशिष्टा प्राञ्जला च। विद्वद्वरगङ्गादासस्य यशोऽत एव सर्वासु दिक्षु मञ्जु प्रसरीसरीति। उदाहरणीभूतलक्षणानाँ निर्माणं केवलमस्यैव केदारभट्टादीनतिशेते। अत एवेयं टीकाव्याजेनास्माभिरारिराधयिषिता। एनस्याश्च सुरभारती-भारतीय (हिन्दी) भाषाभ्यां टीकनं व्यधायि। तत्र च प्रियकपिलदेवशास्त्रि-प्रियशिवदत्तशास्त्रिभ्यां विद्याभास्कराभ्यां साहाय्यमाचरितं तत्कृते तावावामाशीराशिभिरभिवर्धयावः।

मन्ये गुणग्रहिला विद्वांसः सकृच्चक्षुःक्षेपेणास्मच्छ्रमं फलेग्रहिं विधास्यन्ति। छात्रवृन्दस्य चेयं सविशेषमुपकरिष्यतीति नौ द्रढीयान् प्रत्यय इति निवेदयेते—

विदुषामाश्रवौ—

वैशाख कृष्ण ११ }
वै० सं १९९६ }

हरिदत्तशास्त्री
शङ्करदेवपाठकश्च

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

किञ्चित्प्रास्ताविकम्

अथायं छन्दःशास्त्रीयश्छन्दोमञ्जरी नाम सटीको ग्रन्थः प्रकाशतां नीयते। छन्दोमञ्जरी चेयं छन्दोविषयकज्ञानसम्पादनव्यतिकरे लोकोपकारं कीदृशमाचरिष्यतीति वक्तुं नावश्यकम्। पठनपाठनादिरूपेण प्रचार एवास्याः सुविशदं लोकोपकारितामाविष्करोति। वृत्तरत्नाकरवत्तादृशोपयोगिताप्रसिद्धिभाजनतामनुपगताऽप्यसौ समुचितं जिज्ञासूनां छन्दोज्ञानमाधातुं न किल ततः समधिकन्यूनतापदमासादयिष्यतीति बलीयान्नो विश्वासः।

ग्रन्थेऽस्मिन् प्राचीनैरुपकल्पिताः षड् व्याख्याः सन्ति, तासु चन्द्रशेखरप्रणीता छन्दोमञ्जरीजीवननाम्नी च सुप्रसिद्धेति समुल्लिखितमस्ति हिन्दीभाषाग्रथिते 'संस्कृत साहित्य का संक्षिप्त इतिहास' इत्येतन्नामधेये ग्रन्थे।

ग्रन्थोऽयं स्वस्वरूपेणैव परमोपयोगसाधनतां प्राप्तोऽपि विद्यार्थिनां कृते कृतिवराभ्यां हरिदत्तशास्त्रिशङ्करदेवशास्त्रिसूरिभ्यां निजनिर्मितसंस्कृतहिन्दीभाषाग्रथितव्याख्याद्वयेन सम्भूष्य यथावद्बोधसौकर्यसम्पादनविधयाऽत्र भूयसीं पुनरुपयोगितामानीतः। व्याख्याद्वयी चेयं सरलमुचितं विशदं मार्गमनुसरन्ती स्वभावत एव सौन्दर्यममन्दं विन्दते स्म, तथापि ग्रन्थेऽस्मिन् मुद्रणोचितमिदानीं संशोधनं कर्तुं प्रवृत्तेन तत्र तत्रावश्यकतानुसारं परिवर्तनादिकं किमपि कर्तव्यमुचितं मन्यमानेन चारुतातिरेकं तत्रोत्पादयितुं मया श्रीमज्जयकृष्णदासश्रेष्ठिवरप्रदर्शितप्रसिद्धनामधेयव्याख्याकारमहोदयानुमतिसम्प्राप्तिवशात्तद्विषये प्रगाढं प्रयतितम्। सर्वत्र वृत्तेषु तत्तद्गणस्वरूपनामधेयानि यथावदुपरिष्टादुट्टङ्क्य निपुणं संशोध्य च बुद्धिबलेन ग्रन्थरत्नमिदं पुरस्तादद्य विद्यावतां कर्तुं प्रस्तूयते।

छन्दोमञ्जरीग्रन्थकारो गङ्गादासस्तावद् वैद्यगोपालदासतः पितुः सन्तोषायां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मातरि प्राप्तजन्माऽऽसीदिति मङ्गलाचरणपद्यादवगम्यते । गोपालप्रणामरूपं ग्रन्थादौ मङ्गलं, ग्रन्थमध्ये प्रदर्शितानि गोपालचरितसम्बद्धान्युदाहरणानि गोपालवर्णनपराः इतराः कृतयश्च भूयस्तरां वैष्णवीं भक्तिमेतदीयां द्योतयन्ति ।

एतस्य कवेर्गङ्गादासस्य सत्ताकालस्तु निश्चितरूपेण न ज्ञायते । कृष्णम्माचारिमहोदयेन स्वकल्पितेतिहासग्रन्थेऽस्य समय ईशवीयाष्टादशशतकोत्तरार्धरूपः पूर्वप्रदर्शितपरम्परानुसारेण स्वीकृतोऽस्तीति 'संस्कृत साहित्य का संक्षिप्त इतिहास' इत्येतन्नामनि ग्रन्थे समुपलभ्यते ।

ग्रन्थकारेणात्र केवलं कल्पनाकौतूहलस्वरूपमिति नात्यावश्यकं प्रस्तारादिकमनुक्त्वा व्यावहारिकाणि छन्दांसि लक्षितानि । षोडशसर्गात्मकं महाकाव्यमच्युतचरितं नाम, कृष्णशतकं, सूर्यशतकं चैतन्निर्मितानि विद्यन्ते ग्रन्थान्तराणि । सर्वमिदं ग्रन्थान्तिमपद्याभ्यां स्फुटं प्रतीयते ।

सुप्रसिद्धनामधेययोर्धीमतोः प्राज्ञवरटीकाकारयोः परिचयं प्रदातुं तदीयानि कार्यान्तराणि ग्रन्थसमाप्तौ ताभ्यां कल्पितमुपसंहारपद्यं चेत्येतदेव प्रभूतं पर्याप्तमित्यत्र विषये तूष्णीक एव तिष्ठामि ।

अत्र चैतद्ग्रन्थसम्पादनकर्मणि केनापि रूपेण किमपि यैः साहाय्यं कल्पितं तदीयं कृतज्ञताभारं महान्तमन्तर्वोढुमशक्नुवन् बहिरिदानीं पुरः प्रकाशमानोऽत्र प्राप्तनिर्वृतिः सञ्जातोऽस्मि ।

यथाबुद्धि सावधानं संशोधितोऽपि ग्रन्थ एष क्वचिन्मानुष्यकसुलभानां दोषाणां भाजनं भवेदिति नासम्भवम् । हंसक्षीर-न्यायेन गुणग्राहितामत्राश्रयिष्यन्ति विद्वांसो, विद्यार्थिनाञ्चायं सुबहूपकाराय प्रभविष्यतीति दृढं विश्वस्य प्रास्ताविकं लेखममुं समाप्तेः पन्थानमुपनयामीति शिवम् ।

काशी
२८–४–४०

अनन्तरामशास्त्री वेतालः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सटीकच्छन्दोमञ्जरीस्थविषयानुक्रमणिका*

प्रथमे स्तबके

विषयाः	पृष्ठानि
मङ्गलाचरणम् ।	१
मङ्गलाचरणपूर्वकं टीकाकर्तुः स्वनामटीकानाम्नोः सूचनम् ।	,,
ग्रन्थनिर्माणप्रयोजनप्रतिपादनम् ।	१–२
'पद्यस्य लक्षणं 'वृत्तं जातिश्चे'ति भेदद्वयं च प्रदर्श्य वृत्तजातिस्वरूपनिरूपणम् ।	२
वृत्तस्य समार्धसमविषमत्वेन त्रैविध्यं निरूप्य समादिस्वरूपनिरूपणम् ।	३
'मयरसतजभनलगे'ति दशाक्षराणां सकलवाङ्मयव्यापकत्वस्य सूचनम् ।	,,
मगणनगणादिगणाष्टकस्वरूपनिरूपणम् ।	,,
गुरुलघुस्वरूपप्रदर्शनम् ।	४
जातेः पञ्चानां गणानां निर्देशः ।	,,
सानुस्वारप्रभृतीनां वर्णानां गुरुत्वस्य प्रतिपादनम् ।	५
पादान्तगतस्य लघुवर्णस्य लघुत्वगुरुत्वयोस्तत्तदुदाहरणानां सङ्ग्रहः ।	५–७
प्रशब्दे ह्रशब्दे च परे गुरोर्लघुत्वं पिङ्गलमुनिसम्मतं संसूच्य तत्तदुदाहरणप्रदर्शनपुरःसरं तत्र 'तीव्रप्रयत्नोच्चारणेन लघुत्वं भवती'ति कण्ठाभरणकारसम्मतिप्रदर्शनम् ।	७–८
यतेः स्वरूपं प्रदर्श्य तस्याः स्थानविशेषाणां निरूपणम् ।	८–९
'श्वेतमाण्डव्यप्रभृतयः प्राचीना विद्वांसो यतिं न स्वीकुर्वन्ती'ति स्वकीयगुरुमतप्रतिपादनम् ।	९
काव्यादर्शप्रामाण्येन टीकाकारकृतं यतिभङ्गस्वीकृतिरूपपूर्वोक्तमतखण्डनम् ।	,,
यतिभङ्गे मुरारिजयदेवादिकृतीनामुदाहरणस्वरूपेण प्रदर्शनम् ।	१०–१२
एकाक्षरमारभ्य षड्विंशत्यक्षराणि यावदेकैकाक्षरवृद्धिक्रमेण समवृत्तस्य 'उक्थात्युक्थे'ति नामभेदान्निर्दिश्य सकलवृत्तलक्षणनिरूपणप्रतिज्ञाकरणम् ।	१२–१३

---

*अत्र चिह्नाङ्किता विषयाष्टीकाकारेण ग्रन्थान्तरेभ्यः सङ्गृहीताः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विषयाः				पृष्ठानि
द्वितीये स्तबके				
(१) उक्थायाम् = श्रीच्छन्दसो लक्षणोदाहरणयोः प्रदर्शनम्।				१३
(२) अत्युक्थायाम् = स्त्री	,,	,,	,,	१४
(३) मध्यायाम् = नारी	,,	,,	,,	,,
,, ,, मृगी	,,	,,	,,	१५
(४) प्रतिष्ठायाम् = कन्या	,,	,,	,,	,,
,, ,, सती	,,	,,	,,	,,
(५) प्रतिष्ठायाम् = पङ्क्तिः	,,	,,	,,	१६
,, ,, प्रिया	,,	,,	,,	,,
(६) गायत्र्याम् = तनुमध्या	,,	,,	,,	१७
,, ,, शशिवदना	,,	,,	,,	१८
,, ,, सोमराजी	,,	,,	,,	,,
,, ,, विद्युल्लेखा	,,	लक्षणस्य	निरूपणम्*।	१९
(७) उष्णिहि = मधुमती	,,	लक्षणोदाहरणयोः	प्रदर्शनम्।	,,
,, ,, कुमारललिता	,,	,,	,,	२०
,, ,, मदलेखा	,,	,,	,,	,,
(८) अनुष्टुभि = चित्रपदा	,,	,,	,,	२१
,, ,, माणवक	,,	,,	,,	,,
,, ,, विद्युन्माला	,,	,,	,,	२२
,, ,, समानिका	,,	,,	,,	२३
,, ,, प्रमाणिका	,,	,,	,,	,,
,, ,, गजगति	,,	,,	,,	२४
,, ,, हंसरुत	,,	लक्षणस्य	निरूपणम्*।	२५
,, ,, नाराचिका	,,	,,	,, *	,,
(९) बृहत्याम्—भुजगशिशुभृताच्छन्दसो लक्षणोदाहरणयोः प्रदर्शनम्।				२६
,, ,, मणिमध्य	,,	,,	,,	,,
,, ,, भुजङ्गसङ्गता	,,	,,	,,	२७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विषयाः						पृष्ठानि
(९) बृहत्याम् =	हलमुखीच्छन्दसो		लक्षणस्य	निरूपणम्* ।		२७
,,	,, भद्रिका	,,	,,	,,	*	,,
,,	,, कमला	,,	,,	,,	*	२८
,,	,, रूपामाली	,,	,,	,,	*	,,
(१०) पङ्क्तौ =	रुक्मवती	,,	लक्षणोदाहरणयोः प्रदर्शनम् ।			२९
,,	,, मत्ता	,,	,,	,,		,,
,,	,, त्वरितगति	,,	,,	,,		३०
,,	,, मनोरमा	,,	,,	,,		३१
,,	,, शुद्धविराट्	,,	लक्षणस्य	निरूपणम्* ।		,,
,,	,, पणव	,,	,,	,,	*	,,
,,	,, मयूरसारिणी	,,	,,	,,	*	,,
,,	,, उपस्थिता	,,	,,	,,	*	३२
,,	,, दीपकमाला	,,	,,	,,	*	,,
,,	,, हंसी	,,	,,	,,	*	,,
(११) त्रिष्टुभि =	इन्द्रवज्रा	,,	लक्षणोदाहरणयोः प्रदर्शनम् ।			३३
,,	,, उपेन्द्रवज्रा	,,	,,	,,		३४
,,	,, उपजाति	,,	लक्षणस्य	निरूपणम् ।		,,
,,	,, ,,	,,	नानाविधोदाहरणानाम् ,,			३७–३७
,,	,, सुमुखी	,,	लक्षणोदाहरणयोः प्रदर्शनम् ।			,,
,,	,, शालिनी	,,	,,	,,		३८
,,	,, वातोर्मी	,,	,,	,,		३९
,,	,, भ्रमरविलसिता	,,	,,	,,		४०
,,	,, अनुकूला	,,	,,	,,		,,
,,	,, रथोद्धता	,,	,,	,,		४१
,,	,, स्वागता	,,	,,	,,		,,
,,	,, दोधक	,,	,,	,,		४२
,,	,, मोटनक	,,	,,	,,		४३

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विषयाः					पृष्ठानि
(११) त्रिष्टुभि = श्येनीच्छन्दसो लक्षणोदाहरणयोः प्रदर्शनम्।					४३
„	„ वृत्ता	„	लक्षणस्य	निरूपणम्* ।	४४
„	„ भद्रिका	„	„	„ *	„
„	„ उपस्थित	„	„	„ *	„
„	„ शिखण्डित	„	„	„ *	„
„	„ उपचित्र	„	„	„ *	„
„	„ कुपुरुषजनिता	„	„	„ *	„
„	„ अनवसिता	„	„	„ *	४५
„	„ विध्वङ्कमाला	„	„	„ *	„
„	„ सान्द्रपद	„	„	„ *	„
„	„ द्रुता	„	„	„ *	„
„	„ इन्दिरा	„	लक्षणोदाहरणयोः	प्रदर्शनम्* ।	„
(१२) जगत्याम्=चन्द्रवर्त्म		„	„	„	४७
„	„ वंशस्थविल	„	„	„	४८
„	„ इन्द्रवंशा	„	„	„	„
„	„ जलोद्धतगति	„	„	„	४९
„	„ भुजङ्गप्रयात	„	„	„	५०
„	„ तोटक	„	„	„	५०–५१
„	„ स्रग्विणी	„	„	„	५१
„	„ वैश्वदेवी	„	„	„	५२
„	„ प्रमिताक्षरा	„	„	„	„
„	„ द्रुतविलम्बित	„	„	„	५३
„	„ मन्दाकिनी	„	„	„	५४
„	„ कुसुमविचित्रा	„	„	„	५५
„	„ तामरस	„	„	„	५६
„	„ मालती	„	„	„	„
„	„ मणिमाला	„	„	„	५७

Ganesh Varni Digambar Jain Institute, Naria, Varanaṣi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विषयाः							पृष्ठानि
(१२) जगत्याम्=जलधरमालाच्छन्दसो लक्षणोदाहरणयोः प्रदर्शनम्।							५८
"	"	पुट	"	लक्षणस्य	निरूपणम्	*	५९
"	"	प्रियंवदा	"	"	"	*	"
"	"	ललिता	"	"	"	*	"
"	"	उज्ज्वला	"	"	"	*	"
"	"	नवमालिका	"	"	"	*	"
"	"	ललना	"	"	"	*	६०
"	"	ललित	"	"	"	*	"
"	"	द्रुतपद	"	"	"	*	"
"	"	विद्याधर	"	"	"	*	"
"	"	पञ्चचामर	"	"	"	*	"
"	"	सारङ्ग	"	"	"	*	"
"	"	मौक्तिकदाम	"	"	"	*	"
"	"	मोटक	"	"	"	*	"
"	"	तरलनयन	"	"	"	*	६१
(१३) अतिजगत्याम्=प्रहर्षिणी			"	लक्षणोदाहरणयोः	प्रदर्शनम्।		६२–६३
"	"	रुचिरा	"	"	"		६३
"	"	मत्तमयूर	"	"	"		६४
"	"	चण्डी	"	"	"		६५
"	"	मञ्जुभाषिणी	"	"	"		६६
"	"	चन्द्रिका	"	"	"		"
"	"	कलहंस	"	"	"		६७
"	"	प्रबोधिता	"	"	"		६८
"	"	मृगेन्द्रमुख	"	"	"		६९
"	"	चञ्चरीकावली	"	लक्षणस्य	निरूपणम्*।		७०
"	"	चन्द्ररेखा	"	"	"		"
"	"	उपस्थित	"	"	"		"

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विषयाः					पृष्ठानि
(१३) अतिजगत्याम्=मञ्जुहासिनीच्छन्दसो लक्षणस्य				निरूपणम्* ।	७०
,,	,, कन्दुक	,,	,,	,, *	,,
,,	,, प्रभावती	,,	,,	,, *	७१
(१४) शर्कर्याम्=असम्बाधा		,,	लक्षणोदाहरणयोः प्रदर्शनम् ।		,,
,,	,, वसन्ततिलक	,,	,,	,,	७२
,,	,, अपराजिता	,,	,,	,,	७३
,,	,, प्रहरणकलिका	,,	,,	,,	७४
,,	,, वासन्ती	,,	,,	,,	७५
,,	,, लोला	,,	,,	,,	,,
,,	,, नान्दीमुखी	,,	,,	,,	७६
(१५) अतिशर्कर्याम्=शशिकला		,,	,,	,,	७७
,,	,, स्रक्	,,	,,	,,	७८
,,	,, मणिगुणनिकर	,,	,,	,,	७९
,,	,, मालिनी	,,	,,	,,	,,
,,	,, लीलाखेल	,,	,,	,,	८०
,,	,, विपिनतिलक	,,	,,	,,	८१
,,	,, तूणक	,,	,,	,,	८२
,,	,, चन्द्रलेखा	,,	,,	,,	८३
,,	,, चित्रा	,,	,,	,,	८४
(१६) अष्टौ=चित्र		,,	,,	,,	,,
,,	,, ऋषभगजविलसित	,,	,,	,,	८५
,,	,, चकिता	,,	,,	,,	८६
,,	,, पञ्चचामर	,,	,,	,,	८७
,,	,, मदनललिता	,,	,,	,,	८८
,,	,, वाणिनी	,,	,,	,,	८९
,,	,, प्रवरललित	,,	,,	,,	,,
,,	,, अचलधृति	,,	,,	,,	९०

Ganesh Varni Digambar Jain Institute, Naria, Varanași

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विषयाः					पृष्ठानि
(१६) अष्टौ=गरुडरुतच्छन्दसो			लक्षणोदाहरणयोः	प्रदर्शनम्।	९१
,,	,, धीरललित	,,	लक्षणस्य	निरूपणम्*।	९२
,,	,, अश्वगति	,,	,,	,, *	,,
,,	,, मणिकल्पलता	,,	,,	,, *	,,
,,	,, ब्रह्मरूप	,,	,,	,, *	,,
,,	,, वरयुवती	,,	,,	,, *	,,
(१७) अत्यष्टौ=शिखरिणी		,,	लक्षणोदाहरणयोः	प्रदर्शनम्।	९३
,,	,, पृथ्वी	,,	,,	,,	९४
,,	,, वंशपत्रपतित	,,	,,	,,	,,
,,	,, मन्दाक्रान्ता	,,	,,	,,	९६
,,	,, हरिणी	,,	,,	,,	,,
,,	,, नर्दटक	,,	,,	,,	९७
,,	,, कोकिलक	,,	,,	,,	९८
,,	,, हारिणी	,,	,,	,,	,,
,,	,, भाराक्रान्ता	,,	,,	,,	९९
,,	,, हरि	,,	लक्षणस्य	निरूपणम्*।	१००
,,	,, कान्ता	,,	,,	,, *	,,
,,	,, अतिशायिनी	,,	,,	,, *	,,
(१८) धृतौ=कुसुमितलतावेल्लिताच्छन्दसो लक्षणोदाहरणयोः प्रदर्शनम्।					१०१
,,	,, नन्दन	,,	,,	,,	१०२
,,	,, नाराच	,,	,,	,,	१०४
,,	,, चित्रलेखा	,,	,,	,,	१०५
,,	,, शार्दूलललित	,,	,,	,,	१०६
,,	,, हरिणप्लुत	,,	लक्षणस्य	निरूपणम्*।	,,
,,	,, अश्वगति	,,	,,	,, *	१०७
,,	,, सुधा	,,	,,	,, *	,,
,,	,, चित्रलेखा	,,	,,	,, *	,,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विषयाः					पृष्ठानि
(१८) धृतौ = भ्रमरपदकच्छन्दसो	लक्षणस्य	निरूपणम्* ।			१०७
,, ,, शार्दूल	,,	,,	,,	*	,,
,, ,, केसर	,,	,,	,,	*	,,
,, ,, चल	,,	,,	,,	*	,,
,, ,, महामालिका	,,	,,	,,	*	,,
(१९) अतिधृतौ = मेघविस्फूर्जिताच्छन्दसो लक्षणोदाहरणयोः प्रदर्शनम् ।					१०९
,, ,, छाया	,,	,,	,,		११०
,, ,, शार्दूलविक्रीडित	,,	,,	,,		१११
,, ,, सुरसा	,,	,,	,,		११२
,, ,, फुल्लदाम	,,	,,	,,		११३
,, ,, बिम्बु	,,	लक्षणस्य	निरूपणम्* ।		११४
,, ,, मकरन्दिका	,,	,,	,,	*	,,
,, ,, मणिमञ्जरी	,,	,,	,,	*	,,
,, ,, समुद्रलता	,,	*	,,	*	,,
(२०) कृतौ = सुवदना	,,	लक्षणोदाहरणयोः प्रदर्शनम् ।			११५
,, ,, गीतिका	,,	,,	,,		११६
,, ,, वृत्त	,,	,,	,,		११७
,, ,, शोभा	,,	,,	,,		११८
(२१) प्रकृतौ = स्रग्धरा	,,	,,	,,		११९
,, ,, सरसी	,,	,,	,,		१२०
(२२) आकृतौ = हंसी	,,	,,	,,		१२१
,, ,, मदिरा	,,	,,	,,		१२२
,, ,, मद्रक	,,	लक्षणस्य	निरूपणम्* ।		१२३
,, ,, ललित्य	,,	,,	,,	*	,,
,, ,, महास्रग्धरा	,,	,,	,,	*	,,
(२३) विकृतौ = अद्रितनया	,,	,, लक्षणोदाहरणयोः प्रदर्शनम् ।			१२४
,, ,, मत्ताक्रीड	,,	,,	,,		१२५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विषयाः	पृष्ठानि
(२४) संस्कृतौ = तन्वीच्छन्दसो लक्षणोदाहरणयोः प्रदर्शनम्।	१२७
(२५) अतिकृतौ = क्रौञ्चपदा ,, ,, ,,	१२८
(२६) उत्कृतौ = भुजङ्गविजृम्भितच्छन्दसो ,, ,,	१२९
,, ,, अपवाह ,, लक्षणस्य निरूपणम्*।	१३०
चण्डवृष्टिप्रपातदण्डक ,, लक्षणोदाहरणयोः प्रदर्शनम्।	,,
अर्णस्–अर्णव–व्याल–जीमूत–लीलाकर–उद्दाम–प्रभृतिदण्डकानां लक्षणानि निरूप्यार्णोदण्डकोदाहरणप्रदर्शनम्।	१३१
प्रचितकदण्डकच्छन्दसो लक्षणोदाहरणयोः प्रदर्शनम्।	१३२
कुसुमस्तवकदण्डक ,, ,, ,,	१३३
मत्तमातङ्गलीलाकरदण्डकच्छन्दसो लक्षणोदाहरणयोः प्रदर्शनम्।	१३४
अनङ्गशेखरदण्डक ,, ,, ,,	१३५
अशोकपुष्पमञ्जरीदण्डक ,, ,, ,,	१३६
सिंहविक्रान्तदण्डक ,, लक्षणस्य निरूपणम्*।	१३७
अशोकमञ्जरीदण्डक ,, ,, ,, *	,,
मत्तमातङ्गलीलादण्डक ,, ,, ,, *	,,

तृतीये स्तबके

उपचित्रच्छन्दसो लक्षणोदाहरणयोः प्रदर्शनम्	१३८
वेगवती ,, ,, ,,	१३९
हरिणप्लुता ,, ,, ,,	,,
अपरवक्त्र ,, ,, ,,	१४०
पुष्पिताग्रा ,, ,, ,,	१४१
सुन्दरी ,, ,, ,,	१४२
द्रुतमध्या ,, लक्षणस्य निरूपणम्*।	,,
भद्रविराट् ,, ,, ,, *	१४३
केतुमती ,, ,, ,, *	,,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विषयाः				पृष्ठानि
आख्यानकीच्छन्दसो	लक्षणस्य	निरूपणम्	* ।	१४३
विपरीताख्यानकी ,,	,,	,,	*	,,
यवमती ,,	,,	,,	*	,,
ललिता ,,	,,	,,	*	,,
षट्पदा ,,	,,	,,	*	,,
मृगीयवानी ,,	,,	,,	*	१४४
कौमुदी ,,	,,	,,	*	,,
मञ्जुसौरभ ,,	,,	,,	*	,,
कालभारिणी ,,	,,	,,	*	,,

चतुर्थे स्तबके

उद्गताच्छन्दसो लक्षणोदाहरणयोः प्रदर्शनम् । १४६

भारविप्रोक्तोद्गताभेदस्य ,, ,, १४७

सौरभकच्छन्दसो ,, ,, १४८

ललित ,, ,, ,, १४९

वक्त्रच्छन्दसोऽर्धसमत्वं विषमत्वञ्च भवतीति संसूचनम् । ,,

वक्त्रच्छन्दसो लक्षणोदाहरणयोः प्रदर्शनम् । ,,

पथ्यावक्त्र ,, ,, ,, १५०

वक्त्रच्छन्दसि लघुगुरुवर्णनियमनिरूपणम् । १५१

पूर्वोक्तनियमस्य कैश्चिदुक्तं प्रायिकत्वं प्रदर्श्य लोकेऽनुष्टुब्नाम्ना प्रसिद्धस्य वृत्तच्छन्दसोऽष्टाक्षरतायाः प्रतिपादनम् । ,,

पञ्चमे स्तबके

आर्याच्छन्दसो लक्षणस्य यतिनियमस्य च सोदाहरणं निरूपणम् । १५१

आर्यायाः पथ्या—विपुलादिरूपेण नवविधत्वस्य प्रतिपादनम् । १५२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विषयाः				पृष्ठानि
पथ्यार्याच्छन्दसो लक्षणोदाहरणयोः प्रदर्शनम्।				१५४
विपुलार्या	,,	,,	,,	१५५
चपलार्या	,,	,,	,,	,,
मुखचपलार्या	,,	,,	,,	१५६
जघनचपलार्या	,,	,,	,,	१५६–५७
गीत्यार्या	,,	,,	,,	१५७
उपगीत्यार्या	,,	,,	,,	१५८
उद्गीत्यार्या	,,	,,	,,	,,
आर्यागीत्यार्या	,,	,,	,,	१५९
वैतालीय	,,	,,	,,	१६०
औपच्छन्दसिक	,,	,,	,,	१६०–६१
पज्झटिका	,,	,,	,,	१६१
दोहडिका	,,	,,	,,	१६१–६२

षष्ठे स्तवके

गद्यस्य लक्षणं निरूप्य तस्य चूर्णक--उत्कलिकाप्राय–वृत्तगन्धिरूपेण त्रिविधत्वस्य प्रतिपादनम्। १६२

चूर्णकोत्कलिकाप्रायवृत्तगन्धिगद्यानां लक्षणानि प्रदर्श्य तेषामुदाहरणानां निरूपणम्। १६२–६६

'ग्रन्थेऽस्मिन् व्यवहारोचितानि च्छन्दांसि कीर्तितानि प्रस्तारादिकञ्च नोक्त'मिति ग्रन्थकारोक्तेः प्रदर्शनम्। १६७

निजनिर्मितग्रन्थान्तराणां नामान्युल्लिख्य कविना ग्रन्थकारेण गङ्गादासेन कृतं प्रकृतग्रन्थे लोकादरणीयत्वस्य प्रार्थनम्। ,,

टीकाकारकृतं स्वग्रन्थे बालमनःप्रसादसम्पत्तेः शुभाशंसनम्। ,,

ग्रन्थसमाप्तिसूचनम्। ,,

स्वकीयपरिचयप्रदानमुखेन टीकाकारकल्पितः प्रकृतकार्योपसंहारः। १६८

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ श्रीः ॥

छन्दोमञ्जरी

'प्रभा' 'रुचिरा' संस्कृत-हिन्दीव्याख्योपेता

प्रथमः स्तबकः

देवं प्रणम्य गोपालं वैद्यगोपालदासजः ।
सन्तोषातनयश्छन्दो गङ्गादासस्तनोत्यदः ॥ १ ॥

विवर्तमानं जगदेकखण्डेऽप्यखण्डभूतं यदचिन्त्यसत्त्वम् ।
स्वात्मैकमानं निगमैकमानं वन्दामहे तच्चितिरूपतत्त्वम् ॥ १ ॥
श्रीमान् सुधीनो हरिदत्तशास्त्री विद्वद्वरः शङ्करदेवशास्त्री ।
आवामुभौ स्वौ पितरौ प्रणम्य टीकां प्रभाख्यां तनुवो मनोज्ञाम् ॥ २ ॥

प्रभा—नमो विघ्नविनाशाय । स्वेष्टदेवताप्रणतिरूपमङ्गलाचरणपुरःसरं ग्रन्थप्रणेता स्वप्रतिपाद्यविषयं निदधाति—देवमिति । वैद्यः वैद्यकुलोद्भवः यो 'गोपालदास' इतिनामधेयः तस्माज्जात इति वैद्यगोपालदासजः, सन्तोषातनयः सन्तोषाख्यकामिनीपुत्रः, गङ्गादासः कविः, देवम् इष्टदेवं, गोपालं श्रीकृष्णं, प्रणम्य प्रणतिं विधाय, अदः एतत् , छन्दः छन्दःशास्त्रं, तनोति विचरयति ।

विमलबुद्धि वरशक्तिकर सुख सिख सुयश प्रदत्त ।
मन मधुकर तव पदकमल रत शंकर हरिदत्त ॥
श्रीश ईश जगदीश जय जय करुणाकन्द ।
सफल कीजिये प्रभु तिलक, 'रुचिरा' रुचिर अमन्द ॥

रुचिरा—वैद्य गोपालदासात्मज, सन्तोषा का पुत्र गङ्गादास नामक कवि इष्टदेव श्रीकृष्ण को प्रणाम करके इस छन्दःशास्त्र को बनाता है ॥ १ ॥

सन्ति यद्यपि भूयांसश्छन्दोग्रन्था मनीषिणाम् ।
तथापि सारमाकृष्य नवकार्थो ममोद्यमः ॥ २ ॥

प्र०—ननु पिङ्गलादिकविकुलावतंसप्रणीतेषु छन्दःसूत्रादिषु सत्सु किमनेन श्रमेणेति शङ्कां निरस्यति—सन्तीति । यद्यपि मनीषिणां पूर्वाचार्याणां पिङ्गला-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दीनां, भूयांसः बहवः; छन्दोग्रन्थाः छन्दःशास्त्राणि, सन्ति विद्यन्ते, तथापि तेषु विद्यमानेष्वपि, सारं पिङ्गलादिभ्यस्तत्त्वभागम्, आकृष्य सङ्गृह्य, नवकार्थो बालव्युत्पत्त्यै, मम गङ्गादासस्य, उद्यमः श्रमः, अस्तीति शेषः।

रु०—यद्यपि पूर्वपण्डितों के बनाए हुए अनेक छन्दोग्रन्थ हैं, फिर भी बालकों के हितार्थ उनके सारांश का संग्रह करके मैं यह ग्रन्थ बनाता हूँ॥ २॥

इयमच्युतलीलाढ्या सद्वृत्ता जातिशालिनी।
छन्दसां मञ्जरी कान्ता सभ्यकण्ठे लगिष्यति॥ ३॥

प्र०—ननु बालव्युत्पत्त्यर्थत्वादस्य ग्रन्थस्य विद्वत्सु किं प्रयोजनमिति तदाह—इयमच्युतेति। इयं वक्ष्यमाणा, अच्युतलीलाढ्या श्रीकृष्णकौतुककमनीया, सद्वृत्ता मनोहारिपद्यपरीता, जातिशालिनी मात्रानियतपद्यमनोहारिणी, कान्ता रमणीया, छन्दसां मञ्जरी छन्दोमञ्जरीत्यर्थः सभ्यकण्ठे विद्वद्वृन्दगलभागे, लगिष्यति सङ्गता भविष्यति। गोपाललीलालावण्ययुतामिमां विद्वांसः सहृदयाः सम्मानं सम्प्रापयिष्यतीति भावः। अत्र कान्तापदेन काचिद्रमणीति ध्वन्यते। रमणीपक्षे अच्युतलीलाढ्या पूर्णविलासशोभिनी, सद्वृत्ता सच्चरित्रा, जातिशालिनी कुलीना, इयं मञ्जरी हारभूता हारिणी कोविदकण्ठमलङ्करिष्यतीति भावः।

रु०—श्रीकृष्णकी लीला से सुशोभित, सुन्दर पद्यों से युक्त, मात्रानियत छन्दों से अलङ्कृत, मनोहर यह छन्दोमञ्जरी विद्वानों के गले में सुशोभित होगी॥ ३॥

पद्यं चतुष्पदी, तच्च वृत्तं जातिरिति द्विधा।
वृत्तमक्षरसङ्ख्यातं जातिर्मात्राकृता भवेत्॥ ४॥

प्र—प्रतिपाद्यं तावत्प्रतिपादयति—पद्यमिति। श्लोकस्य चतुर्थो भागः पादः। 'मात्रिकस्य चतुर्भागः पाद इत्यभिधीयते' इत्युक्तत्वात्। मात्रिकस्य श्लोकस्य चतुष्पदी पादचतुष्टययुक्तं, पद्यं नाम निगद्यते। तच्च पद्यं, वृत्तं वृत्तनामकं, जातिः जात्याख्यमिति, द्विधा द्विप्रकारकं भवति। अक्षरसङ्ख्यातं वर्णपरिगणितं, वृत्तं वृत्तनामधेयं भवेत्। मात्राकृता ह्रस्वादिमात्रानिबद्धा, जातिः जातिनामकं भवेत्। एकमात्रो लघुवर्णः, द्विमात्रो गुरुरिति ज्ञेयम्। तथा च—

एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनश्चार्धमात्रकम्॥ इति।

रु०—श्लोक के चौथाई हिस्से को पाद कहते हैं। चार पाद (चरण) मिलाकर पद्य होता है। पद्य के दो भेद हैं, वृत्त और जाति। जिसमें अक्षरों की गणना होती है

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उसको वृत्त कहते हैं और जिसमें मात्राओंकी गणना होती है वह जाती है। जिस वर्णमें एक मात्रा हो उसे 'लघु' तथा जिसमें दो मात्राएँ हों उसे 'गुरु' जानना चाहिये॥

समर्धसमं वृत्तं विषमञ्चेति तत् त्रिधा।
समं समचतुष्पादं भवत्यर्धसमं पुनः ॥ ५ ॥
आदिस्तृतीयवद् यस्य पादस्तुर्यो द्वितीयवत्।
भिन्नचिह्नचतुष्पादं विषमं परिकीर्तितम् ॥ ६ ॥

प्र०—सममिति। तत्पूर्वोक्तं वृत्तं, समम् अर्धसमं विषमञ्चेति त्रिधा त्रिप्रकारकं भवति। समचतुष्पादं तुल्यचरणचतुष्टयं, समं समनामकं पद्यम्। यस्य पद्यस्य आदिः प्रथमपादः, तृतीयवत् तृतीयचरणसमानः, एवं तुर्यः चतुर्थः, पादः चरणः, द्वितीयवत् द्वितीयपादसदृशः, तत् पुनः अर्धसमं नाम पद्यं, परिकीर्तितं निगदितम्। भिन्नचिह्नचतुष्पादं विभिन्नलक्षणपादचतुष्टयं, विषमं नाम वृत्तं, परिकीर्तितं कथितम्।

रु०—वृत्त तीन प्रकारका होता है, सम, अर्धसम और विषम। जिसके चारों चरणोंमें समान अक्षर हों वह 'सम' वृत्त होता है, जैसे-अनुष्टुप्। जिसका प्रथम चरण तीसरेके तुल्य हो और दूसरा चौथे के, उसको 'अर्धसम' वृत्त कहते हैं, जैसे-वियोगिनी। जिसके चारों पद भिन्न-भिन्न प्रकारके हों, उसको 'विषम' वृत्त कहते हैं, जैसे-उद्गता ॥ ५-३ ॥

म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥ ७ ॥

प्र०—साङ्केतिकान् दश गणान् निर्दिशति—म्यरस्तेति। एभिर्निर्दिश्यमानैः, लान्तैः अन्ते लः येषां तैः, मश्च यश्च रश्च सश्च तश्च जश्च भश्च नश्च गश्च तैः म्यरस्तजभ्नगैः दशभिः दशसंख्याकैः, अक्षरैर्वर्णैः, समस्तं निखिलं, वाङ्मयं वाग्रूपं छन्दःशास्त्रं, विष्णुना परमेश्वरेण, त्रैलोक्यमिव त्रिभुवनमिव, व्याप्तं युक्तम्। एभिर्दशवर्णैरेव समस्तच्छन्दांसि लक्षयिष्यन्त इति भावः।

रु०—निम्नलिखित सङ्केतों के द्वारा ग्रन्थकार ने छन्दों का लक्षण किया है। म, य, र, स, त, ज, भ, न, ग, ल-इन दस वर्णों से समस्त छन्दःशास्त्र उसी प्रकार व्याप्त है जिस प्रकार कि परमात्मा से तीनों लोक व्याप्त हैं ॥ ७ ॥

मस्त्रिगुरुस्त्रिलघुश्च नकारो भादिगुरुः पुनरादिलघुर्यः।
जो गुरुमध्यगतो रलमध्यः सोऽन्तगुरुः कथितोऽन्तलघुस्तः ॥८॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्र०—सङ्केतान् लक्षयति—मस्त्रीति। मकारादयो दशवर्णा एव दशगणा वेदितव्याः, यथा मगणः, यगण इत्यादि। त्रिगुरुः यत्र त्रयो वर्णा गुरवः, स मः मगणो भवति। त्रिलघुः यत्र त्रयो लघुवर्णाः, स नः नगणः। भादिगुरुः, भ इति लुप्तप्रथमैकवचनम्, आदिगुरुः यत्र प्रथमो गुरुर्भवति, अपरौ द्वौ लघू, स भः भगणो भवति। पुनश्च, आदिलघुः यत्राद्याक्षरं लघु, द्वौ गुरू, स यः यगणः। गुरुमध्यगतः यत्र मध्ये गुरुवर्णः, आद्यन्तयोः लघू, स जः जगणो भवति। रल-मध्यः, र इति लुप्तप्रथमैकवचनम्, लमध्यः यत्र मध्ये लघुः, आद्यन्तयोः गुरू, स रः रगणः। अन्तगुरुः यत्रान्ते गुरुः, पूर्वौ द्वौ लघू, स सः सगणः। अन्तलघुः यत्रान्ते लघुः पूर्वौ द्वौ गुरू, स तः तगणः, कथितः निगदितः।

रु०—तीन तीन अक्षरों का एक-एक गण होता है। पूर्वोक्त म आदि दस वर्ण ही गण हैं। जैसे—मगण, यगण आदि। तीनों गुरु अक्षरों को मगण कहते हैं, तीनों ह्रस्वों को नगण। आदि में गुरु और अन्त में दो ह्रस्व हों तो भगण, आदि में ह्रस्व और अन्त में दो गुरु हों तो यगण, बीच में गुरु और पहले और अन्त में लघु हों तो जगण, बीच में लघु और पहले और अन्त में गुरु हों तो रगण, अन्त में गुरु और पहले दो लघु वर्ण हों तो सगण, अन्त में लघु और पहले दो गुरु अक्षर हों तो तगण, कहा जाता है ॥ ८ ॥

गुरुरेको गकारस्तु लकारो लघुरेककः।
क्रमेण चैषां रेखाभिः संस्थानं दर्श्यते यथा ॥ ९ ॥

प्र०—गुरुरिति। एको वर्णः, गुरुः गकारः। ग इत्युक्ते एको वर्णो गुरुरिति ज्ञेयम्। एककः एको वर्णः, लघुर्लकारः। ल इत्युक्ते एको वर्णो लघुरिति ज्ञेयम्! एषां मकारादीनां गणानां, रेखाभिः चिह्नविशेषैः, संस्थानम् आकृतिः दर्श्यते बोध्यते। यथा गुरुवर्णस्याकृतिः (ऽ) एवम्। लघोराकृतिस्तु (।) एवम्।

रु०—ग और ल के द्वारा एक-एक अक्षर का बोध होता है। ग कहने से एक गुरु अक्षर और ल कहने से एक लघुवर्ण जानना चाहिये। गुरु अक्षर का चिह्न (ऽ) ऐसा और लघु अक्षर का चिह्न (।) ऐसा होता है ॥ ९ ॥

ज्ञेयाः सर्वान्तमध्यादिगुरवोऽत्र चतुष्कलाः।
गणाश्चतुर्लघूपेताः पञ्चार्यादिषु संस्थिताः ॥ १० ॥

प्र०—इदानीं जातेर्गणान् निर्दिशति—ज्ञेया इति। अत्र चतुर्लघूपेताः लघुवर्णचतुष्टयसहिताः, सर्वान्तमध्यादिगुरवः गुरुशब्दस्य द्वन्द्वान्ते श्रूयमाणत्वात्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रत्येकं सम्बन्धः । तेन सर्वगुरुः (SSS), अन्तगुरुः (IIS), मध्यगुरुः (ISI) आदिगुरुः (SII), चतुर्लघुः (IIII) एवम्प्रकाराः पञ्च, चतुष्कलाः चतुर्मात्रारूपा गणाः, आर्यादिषु जातिछन्दस्सु, संस्थिताः ज्ञेयाः ।

रु०—अथ जाति के गणों का निर्देश करते हैं। आर्या आदि छन्दों में चार मात्रा लेकर पांच गण होते हैं—सर्वगुरु, अन्तगुरु, मध्यगुरु, आदिगुरु, चतुर्लघु। अर्थात् चार-मात्रा-युक्त-गणों से आर्या आदि छन्दों का लक्षण निर्दिष्ट है ॥ १० ॥

सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत् ।
वर्णः संयोगपूर्वश्च तथा पादान्तगोऽपि वा ॥ ११ ॥

प्र०—साम्प्रतं गुरुवर्णान् निर्दिशति—सानुस्वार इति । सानुस्वारः अनुस्वारसहितः स्वरः (अ, इ, उ, ऋ, लृ,) गुरुर्भवेत । दीर्घः (आ, ई, ऊ, ॠ, ए, ऐ, ओ औ), विसर्गी विसर्गसहितः, संयोगपूर्वः संयुक्तात् । पूर्वो वर्णः, पादान्तगः चरणस्यान्तिमो लघुवर्णो वा विकल्पेन गुरुर्भवेत् । वेत्यस्य व्यवस्थितत्वात् वृत्तेषु लघुर्वा गुरुर्भवेत , जातिषु लघुर्गुरुश्च वा गुरु भवत इति ज्ञेयम् । अनुस्वारस्योपलक्षणवाचित्वादन्ते व्यञ्जनसद्भावेऽपि लघुर्गुरुः स्यात् ।

रु०—अनुस्वारयुक्त ह्रस्ववर्ण, दीर्घ, विसर्गयुक्त एवं संयुक्त अक्षर से पूर्व वर्ण गुरु होता है। पाद के अन्त में होनेवाला लघु अक्षर विकल्प से गुरु होता है और गुरुवर्ण विकल्प से लघु होता है। गुरु और लघु की व्यवस्था प्रयोजनानुसार ही होती है।

अत्र पादान्तगो लघुर्गुरुर्भवेद्वा । यथा –

तरुणं सर्षपशाकं नवौदनं पिच्छिलानि च दधीनि ।
अल्पव्ययेन सुन्दरि ! ग्राम्यजनो मिष्टमश्नाति ॥

सुन्दरीति ग्राम्यशब्दे परे विकल्पेन लघुत्वम् ।

प्र०—पादान्तस्थस्य लघोर्विकल्पेन गुरुत्वमुदाहरति—तरुणमिति । हे सुन्दरि ! ग्राम्यजनः ग्रामवासिलोकः, तरुणं नूतनं सर्षपशाकं सिद्धार्थकशाकं, नवौदनं नूतनतण्डुलान्नं पिच्छिलानि स्निग्धानि दधीनि च, मिष्टं मधुरं यथा स्यात्तथा, अल्पव्ययेन न्यूनधनेन, अश्नाति भक्षयति । अत्र आर्यावृत्तम् । तल्लक्षणं तु प्रथमपादे द्वादश मात्राः, द्वितीयपादे अष्टादश, तृतीयापादे पुनर्द्वादश, चतुर्थे तु पञ्चदश मात्राः । अत्र श्लोकेन द्वितीयचतुर्थपादयोरन्तिमवर्णयोर्लघ्वोर्गुरुत्वम् । तृतीयपादे पादान्तस्थैकारस्य ग्राम्येति संयुक्तात्पूर्वत्वेऽपि न गुरुत्वम् । एवं न छन्दोभङ्ग इत्यर्थः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रु०—पाद का अन्तिम लघुवर्ण विकल्प से गुरु होता है। जैसे–तरुणं दृश्य।दि पद्यं। हे सुन्दरि ! ग्रामीण मनुष्य थोड़े व्यय से ही नवीन सरसों का शाक, नय चावल, स्निग्ध दही इनको मीठा करके खाते हैं। इस श्लोक में आर्याछन्द है। इसका लक्षण है कि पहले पाद में बारह मात्रा, दूसरे में आठारह, तीसरे में बार और चौथे में पन्द्रह। इसलिये दूसरे और चौथे पाद के अन्तिम लघु अक्षर गुरु हो जाते हैं और तीसरे पाद का अन्तिम इकार संयुक्त के परे होने पर भी ह्रस्व ही रहता है। इसलिये छन्दोभङ्ग नहीं हुआ।

तथा मत्पितुः पारिजातहरणनाटके—

सिन्दूरपूरकृतगैरिकरागशोभे शश्वन्मदस्रवणनिर्झरवारिपूरे।
सङ्ग्रामभूमिगतमत्तसुरेभकुम्भकूटे मदीयनखराशनयो विशन्तु॥

अत्र तृतीयचतुर्थपादान्तलघ्वोर्गुरुत्वम्।

प्र०—पादान्तलघोर्गुरुत्वमुदाहरति—सिन्दूरेति। शक्रं प्रति क्रुद्धस्य गरु त्मत उक्तिरेषा। मदीयाः मामकीनाः नखराः नखा एव अशनयः वज्राणि, सिन्दूर पूरेण सिन्दूरसमूहेन कृता गैरिकरागस्य गैरिकसदृशलौहित्यस्य शोभा कान्ति र्यस्य तस्मिन्, शश्वत् नित्यं यत् मदस्रवणं दानक्षरणं तदेव निर्झरवारिपूरः प्रस्र वणसलिलसमूहः यतः तस्मिन् सङ्ग्रामभूमिगतः युद्धक्षेत्रगतः यः मत्तः सुरेभः देवकुञ्जरः ऐरावतः तस्य कुम्भ एव कूटं शिखरं तस्मिन्, विशन्तु प्रविशन्तु। एकदेशवर्तिरूपकालङ्कारः। उक्तं च 'यत्र कस्यचिदार्थत्वमेकदेशविवर्ति तत्' इति। वसन्ततिलकं वृत्तम्। अत्र तृतीयचतुर्थपादान्तस्ययोः 'म्भ' 'न्तु' वर्णयोर्ल घ्वोरपि गुरुत्वम्।

रु०—पाद का अन्तिम लघु गुरु होता है। जैसे—इन्द्र के प्रति क्रुद्ध गरुड़ के वचन। मेरे नखरूपी वज्र, सिन्दूरसमूह से किये गये गैरिकवर्ण के समान सुशोभि निरन्तर मदक्षरणरूप टपकते हुए सलिलसमूह से युक्त, युद्धस्थल में आये हुये म ऐरावत के कुम्भरूपी शिखर में प्रविष्ट हों। एकदेशवर्तिरूपक अलङ्कार है। वसन्त तिलक वृत्त है। यहां तीसरे और चौथे पाद के अन्तिम 'म्भ' 'न्तु' लघुवर्ण गुरु।

तथा ममाच्युतचरितेऽपि—

रक्तेन केशिदशनक्षतसम्भवेन रेजे स मण्डिततरो हरिबाहुदण्डः।
तद्दन्तसन्दलितभीमभुजप्रतापवह्नेरिव स्फुटकणप्रकरेण कीर्णः॥

अत्र प्रथमतृतीयपदान्तस्यापि लघोर्गुरुत्वम्।

प्र०—रक्तेनेति। सः हरिबाहुदण्डः हरेर्विष्णोर्बाहुरेव दण्डः, केशिदशनक्ष

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सम्भवेन केशिनामकदानवदन्तव्रणजातेन, रक्तेन लोहितेन, मण्डिततरः भूषिततरः, तस्य केशिनः दन्तैः दशनैः सन्दलितः कर्तितः यः भीमः भयङ्करः भुजः बाहुस्तस्य प्रतापः तेज एव वह्निः अग्निस्तस्य, स्फुटः प्रदीप्तः यः कणप्रकरः कण-समूहस्तेन सन्दीप्तस्फुलिङ्गसमूहेनेत्यर्थः, कीर्णः व्याप्त इव, रेजे शुशुभे। वसन्ततिलकं वृत्तम्। अत्र प्रथमतृतीयपादान्तस्थस्य 'नकारस्य' 'पकारस्य' च गुरुत्वं बोध्यम्।

रु०—वह विष्णु का बाहुदण्ड, केशी राक्षस के दांतों द्वारा काटने से निकले हुए रुधिर से अत्यन्त सुशोभित, उस (केशी राक्षस) के दाँतों से काटी हुई, भयङ्कर भुजाओं की प्रतापवह्नि की जलती हुई चिनगारियों से व्याप्त हुए के समान शोभायमान हुआ। वसन्ततिलक वृत्त है। वहाँ पहले और तीसरे पाद के अन्तिम 'न' और 'प' लघुवर्ण गुरु हैं।

'प्रह्रे वा' इति पुनः पिङ्गलमुनेर्विकल्पविधायकं सूत्रम्। उदाहरणं यथा कुमारे—

सा मङ्गलस्नानविशुद्धगात्री गृहीतप्रत्युद्गमनीयवस्त्रा।
निर्वृत्तपर्जन्यजलाभिषेका प्रफुल्लकाशा वसुधेव रेजे॥

अत्र प्रशब्दे परे गुरोर्लघुत्वम्॥

प्र०—प्रह्रे वेति। प्रे अथवा ह्रे शब्दे परतः पूर्वो लघुर्विभाषया गुरुः स्यादित्यर्थः। परतमेत्सूत्रं नाथत्वे प्रचलिते पिङ्गलछन्दःसूत्रे दृश्यते। सा मङ्गलेति। मङ्गलस्नानेन मङ्गलार्थाभिषेकेण विशुद्धगात्री पवित्रकलेवरा, गृहीतं धृतं प्रत्युद्गमनीयवस्त्रं पवित्रश्वेतवसनं यया सा, पार्वती, निर्वृत्तः सम्पन्नः पर्जन्यस्य जलदस्य जलेन सलिलेन अभिषेकः स्नानं यस्याः सा जलदजलक्लिन्नेत्यर्थः, प्रफुल्लकाशा विकसितकाशप्रसूना, वसुधा धरा इव, रेजे शुशुभे। उपजातिर्वृत्तम्। अत्र 'प्रे'तिसंयुक्तात्पूर्ववर्तिनस्तकारस्य न गुरुत्वम्। अतो न छन्दोभङ्गदोष इति।

रु०—प्र और ह्र शब्द परे होने पर पूर्ववर्ण विकल्प से गुरु होता है। वह मङ्गलार्थ स्नान से पवित्र शरीरवाली, शुभ्रवस्त्र धारण करनेवाली, मेघ के जल से स्नात पार्वती, खिले हुए काश के फूलों से शोभित पृथ्वी के समान अलङ्कृत हुई। उपजाति वृत्त है। यहां प्रशब्द के परे होने पर गृहीत शब्द का तकाराकार ह्रस्व ही है

प्राप्य नाभिह्रदमज्जनमाशु प्रस्थितं निवसनग्रहणाय।
औपनीविकमरुन्ध किल स्त्री वल्लभस्य करमात्मकराभ्याम्॥

अत्र ह्र शब्दे परे गुरोर्लघुत्वम्।

प्र०—प्राप्येति। स्त्री काचित्कान्ता, आत्मकराभ्यां स्वहस्ताभ्यां, नाभि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रेव ह्रदः तत्र मज्जनं प्राप्य आसाद्य, आशु त्वरितं, निवसनग्रहणाय वस्त्राकर्षणाय, प्रस्थितं प्रवृत्तम्, औपनीविकं नीविनिकटे समागतमित्यर्थः। वल्लभस्य प्रेयसः, करं हस्तम्, अरुन्ध रुरुधे। स्वागता वृत्तम्। अत्र नाभेरिकारस्य ह्रशब्दात्पूर्वस्य पूर्वनियमेन न गुरुत्वम्।

रु०—किसी स्त्री ने नाभिरूपी तालाब में स्नान करके, वस्त्रग्रहण के लिए नीवि (तगड़ी) के पास पहुँचे हुए पति के हाथ को अपने हाथों से रोक लिया। यह स्वागता वृत्त है। यहाँ ह्रशब्द के परे होने पर नाभि का इकार 'प्रह्रे वा' इस नियम से ह्रस्व ही रहा, इसलिए छन्दोभङ्ग नहीं हुआ।

तीव्रप्रयत्नोच्चारणेनात्र लघुत्वमिति कण्ठाभरणः। यदुक्तम्—

यदा तीव्रप्रयत्नेन संयोगादेरगौरवम्।
न छन्दोभङ्ग इत्याहुस्तदा दोषाय सूरयः॥

प्र०—तीव्रेति। तीव्रः उत्कटः प्रयत्नः यस्मिन् तादृशं यत् उच्चारणं तेन गुरुरपि लघुर्भवतीति कण्ठाभरणकार आचार्यो वदति। संयुक्तात्पूर्वो गुरुरिति नियमो न सार्वत्रिक इति पूर्वाचार्याणां राद्धान्तं निरूपयति–यदेति। यदा तीव्रप्रयत्नेन द्रुतगत्या पठनेन,संयोगदेः संयुक्तपूर्ववर्णस्य, अगौरवं लाघवं भवति, तदा छन्दोभङ्ग, ने दोषाय न दोषमावहति।

रु०—'नाभिह्रद' यहां पर झटके के साथ उच्चारण करने से 'भि' अक्षर लघु हो जाता है·ऐसा सरस्वतीकण्ठाभरण में लिखा है। जैसे–'जब झटके साथ उच्चारण करने से संयोग से पूर्व वर्ण लघु हो जाता है, तब छन्दोभङ्ग दोष नहीं होता है ऐसा पण्डित लोग कहते हैं'॥ ११॥

यतिर्जिह्वेष्टविश्रामस्थानं कविभिरुच्यते।
सा विच्छेदविरामाद्यैः पदैर्वाच्या निजेच्छया॥ १२॥

प्र०—सम्प्रति यतिलक्षणं निर्दिशति—यतिरिति। जिह्वाया इष्टं विश्रामस्थानं स्थितिस्थानं, कविभिः यतिरुच्यते कथ्यते। यत्र जिह्वा स्वेच्छाया विरमिति तत्र यतिरित्यर्थः। सा यतिः, निजेच्छया उच्चारयितुरिच्छया, विच्छेदविरामाद्यैः विच्छेदविरामप्रभृतिभिः, पदैः शब्दैः, वाच्या बोधनीया। विच्छेदविरामविरतिप्रभृतयः शब्द यतिपर्याया इत्यर्थः।

रु०—जिस जिस स्थान पर जिह्वा स्वेच्छापूर्वक विश्राम करती है, उसको 'यति' कहते हैं। वह उच्चारणकर्ता की इच्छा से ही होती है। विच्छेद, विराम, विरति-आदि इसके नामान्तर हैं॥ १२॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्वचिच्छन्दस्यास्ते यतिरभिहिता पूर्वकृतिभिः
पदान्ते सा शोभां व्रजति पदमध्ये त्यजति च।
पुनस्तत्रैवासौ स्वरविहितसन्धिः श्रयति तां
यथा कृष्णः पुष्णात्वतुलमहिमा मां करुणया ॥१३॥

अयं च श्लोकश्छन्दोगोविन्दे मम गुरोः।

प्र०—विशेषं निर्दिशति–क्वचिदिति। अयं 'क्वचि' दित्यादिः श्लोको गुरोः पुरुषोत्तमस्य छन्दोगोविन्दनामधेयग्रन्थे वर्तते। पूर्वकृतिभिः पूर्वविद्वद्भिः, अभिहिता यतिः क्वचिच्छन्दसि छन्दोविषये आस्ते वर्तते, नतु सर्वत्रेति भावः। परन्तु या यतिः पदान्ते स्थिता सती, शोभां मनोहरत्वं, व्रजति प्राप्नोति, सैव यतिः पदमध्ये स्थिता सती, त्यजति सुश्रवतां विमुञ्चति। पदमध्यस्था यतिः कर्णकटुरिति भावः। पुनः किन्तु, तत्रैव पदमध्य एव, असौ यतिः, स्वरविहितसन्धिः स्वरकृत-सन्धियुक्ता सती, तां शोभां, श्रयति समासादयति। तथा चोदाहरणम्—यथेति। अतुलः अनुपमो महिमा महत्त्वं यस्य स कृष्णः, करुणया अनुकम्पया, मां पुष्णातु रक्षतु। अत्र शिखरिणी नाम वृत्तम् 'रसै रुद्रैश्छिन्ने' त्यादि लक्षणम्। पूर्वषडक्षरैर्यतिः कार्या। उदाहृते च पुष्णेत्यत्र यतिः दुःश्रवा, परन्तु पुष्णात्वतुलेति सन्धिः-सम्बन्धात् शोभां प्राप्नोति। कविकल्पलतायाम्—

एवं यथा यथोद्वेगः सुधियां नोपजायते।
तथा तथा मधुरतानिमित्तं यतिरिष्यते॥

यस्मिन् यतिनिर्देशे सुश्रुवता भवेत्सा यतिरादरणीयेति भावः।

रु०—यति छन्द में सर्वत्र नहीं होती। यदि वह पदान्त में होती है तो शोभा को प्राप्त होती है। पदमध्य में शोभा को नष्ट कर देता है। परन्तु पदमध्यगत यति स्वरसन्धिसे युक्त होती है तो वह मनोहरता को प्राप्त होती है। उदाहरण श्लोकका चतुर्थ पाद स्वयं है। यहाँ शिखरिणी वृत्त है। यह 'क्वचिद्' इत्यादि श्लोक मेरे गुरु पुरुषोत्तमभट्ट की छन्दोगोविन्द नामक पुस्तक में है॥ १३॥

श्वेतमाण्डव्यमुख्यास्तु नेच्छन्ति मुनयो यतिम्।
इत्याह भट्टः स्वग्रन्थे गुरुर्मे पुरुषोत्तमः ॥ १४॥

प्र०—श्वेतेति। श्वेतमाण्डव्यमुख्याः श्वेतमाण्डव्यप्रभृतयो विद्वांसः, यतिं न इच्छन्ति न अङ्गीकुर्वन्ति, इति मे गुरुरुपाध्यायः पुरुषोत्तमभट्टः, स्वग्रन्थे आह कथयति। न मनोरमं मतमेतत्, यदिभ्रंशदोषापत्तेः। यथाह काव्यादर्शे—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्लोकेषु नियतस्थाने पदच्छेदं यतिं विदुः ।
तदपेतं यदिभ्रष्टं श्रवणोद्वेजनं यथा ॥

नियतस्थाने यतिः कार्यैव अन्यथा दुःश्रवता सम्पद्येत ।

रु०—श्वेतमाण्डलव्य आदि विद्वान् यति को स्वीकार नहीं करते हैं—ऐसा मेरे गुरु पुरुषोत्तमभट्ट ने अपनी पुस्तक में लिखा है। किन्तु यतिभङ्ग दोष होने के कारण यह मत अच्छा नहीं है।

अत एव मुरारिः—

सन्तुष्टे तिसृणां पुरामपि रिपौ कण्डूलदोर्मण्डली-
लीलालूनपुनःप्ररूढशिरसो वीरस्य लिप्सोर्वरम् ।
याच्ञादैन्यपराञ्चि यस्य कलहायन्ते मिथस्त्वं वृणु
त्वं वृण्वित्यभितो मुखानि, स दशग्रीवः कथं कथ्यताम् ॥

प्र०—संतुष्ट इति । मुरारिकृतोऽयं श्लोकः । जनकं प्रति रावणपुरोहितस्य शौष्कलस्य उक्तिरेषा। तिसृणां पुरां नगरीणां, रिपौ शत्रौ त्रिपुरारौ शिवे इत्यर्थः। सन्तुष्टे तपस्यया प्रसन्नेऽपि, कण्डूलया कण्डूयनपरया दोर्मण्डल्या बाहुसंहत्या लीलया क्रीडया लूनानि छिन्नानि पुनःप्ररूढानि भूयःसमुत्पन्नानि शिरांसि मूर्धानो यस्य तथाविधस्य, वरं वाञ्छितं लिप्सोः प्राप्तुमिच्छोर्यस्य वीरस्य रावणस्य मुखानि, याच्ञादैन्यं प्रार्थनाजातदीनभावः तेन पराञ्चि अवनतानि सन्ति, अभितः उभयतः, त्वं वृणु त्वं वृणु इति, कलहायन्ते विवाद कुर्वन्ति। एवं स रावणो, यो वरयाच्ञायामपि कुण्ठितः, कथं कथ्यतां वर्ण्यताम्, एवं महामहिमा ऽवर्णनीय एव । शार्दूलविक्रीडितं वृत्तम् । द्वादशाक्षरावसाने यतिर्नियता, सा तृतीय पादे कलहायन्त इति हावर्णान्ते न संलक्ष्यते ।

रु०—जनक के प्रति रावण के पुरोहित शौष्कल का वचन—तपस्या से सन्तुष्ट होकर वरप्रदानार्थ महादेव के समुपस्थित होने पर खेल-खेल में खुजलाकर शिर को काट देनेवाले और फिर उत्पन्न शिरयुक्त, वरयाचना के इच्छुक उस वीर के याचनाजनित दीनता से नत मुखसमूह आपस में एक दूसरे से 'तू वर माँग, तू वर माँग' यह कहकर विवाद कर रहे हैं, शिव से भी वरयाचना करने में लज्जित उस वीर का वर्णन कैसे किया जा सकता है। इस श्लोक में शार्दूलविक्रीडित छन्द है। बारह अक्षरों के पश्चात् यति होनी चाहिए, परन्तु तृतीय पाद में 'कलहायन्ते' यहां 'हा' 'वर्ण पर विश्राम नहीं है।

जयदेवोऽपि

साध्वी माध्वीक ! चिन्ता न भवति भवतः शर्करे ! कर्करासि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्राक्षे ! द्रक्ष्यन्ति के त्वाममृत ! मृतमसि क्षीर ! नीरं रसस्ते ।
माकन्द ! क्रन्द कान्ताधर ! धरणितलं गच्छ, यच्छन्ति यावद्
भावं शृङ्गारसारस्वतमयजयदेवस्य विष्वग्वचांसि ॥

प्र०—जयदेवकृतश्लोकोऽयम्—साध्वीति । हे माध्वीक ! हे मधो ! इह अस्मिन् संसारे, यावत यत्कालपर्यन्तं, शृङ्गारसारस्वतमयजयदेवस्य शृङ्गाररसभरभरितकवेर्जयदेवस्य, वचांसि सूक्तानि, विष्वक् समन्ततः, भावं प्रीतिं, यच्छन्ति वितरन्ति, तावत् भवतः चिन्ता निजसमादरविषयको विचारः; न साध्वी न मनोहरा भवति । हे शर्करे ! त्वं, कर्करा असि कठिनासि । हे द्राक्षे ! त्वां के रसज्ञाः, द्रक्ष्यन्ति अवलोकयिष्यन्ति, दुर्गमदेशजातत्वान्नादरास्पदं त्वमित्यर्थः । हे अमृत ! त्वं मृतमसि । न जीवन् कश्चित् त्वां प्राप्नोतीति भावः । हे क्षीर ! ते तव, रसः नीरं, सलिलसदृशम् , आवर्तनात्पूर्वमस्वादुत्वात् । हे माकन्द ! रसाल ! त्वं क्रन्द रुदिहि । हे कान्ताधर ! त्वं, धरणितलं, रसातलं गच्छ प्रयाहि । पथिव्यामवस्थानं न शोभमित्यर्थः । जयदेवकृतकाव्यस्य माधुर्यातिशयं द्योतयितुं माध्वीकादितिरस्कारः । स्रग्धरावृत्तम् । अत्र तृतीयचरणे सप्तमाक्षरेण विहिता यतिः स्वरसन्धिवशात् । सुश्रवैव, किं तु चातुर्थपादे सप्तमचतुर्दशयोर्यतिदोष एवेति ।

रु०—हे माध्वीक ! जब तक इस संसार में शृङ्गाररसिक जयदेव कवि की रचनाएँ सब ओर मन प्रसन्न करती हैं तब तक तेरी अपने आदर की चिन्ता अच्छी नहीं । हे शर्करे ! तू कड़ी है । हे द्राक्षे (अङ्गूर) ! कौन तुझे देखेंगे । हे अमृत ! तू तो मरा हुआ है । हे क्षीर (दूध) ! तेरा रसपानी का सा है । हे माकन्द (आम्र) ! तू चिल्लाता रहा । हे सुन्दरी के अधर ! तू रसातल में जा । यहां जयदेव की कविता के माधुर्य की अधिकता दिखलाने के लिये माध्वीक आदि का तिरस्कार किया गया है । यह स्रग्धरा वृत्त है । यहां तृतीय चरण में सातवें अक्षर से की हुई यति स्वरसन्धि के कारण सुनने में अच्छी है, किन्तु चतुर्थ चरण में सातवें और चौदहवें अक्षरों में यतिदोष अवश्य है ।

एवमन्येऽपि—

कत्यद्रिप्रतिरोधिताः कति नदीपाथोनिधिप्लाविताः
कत्येवाटवितां गताः कति न वा भूदेवदेवैर्वृताः ।
भूम्यो भूमिपतीन्द्र ! तावकयशःप्रस्तावनामण्डली
कोष्ठीकृत्य जगद्धनं कतिवराटीभिर्मुदं यास्यति ॥

प्र०—कतीति । कस्यचित नृपस्य प्रशस्तिरियम्—भूमिपतीन्द्र ! महाराज ! भवतः कति भूम्यः भूभागाः, अद्रिणा गिरिणा, प्रतिरोधिताः व्याप्ताः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कति भूम्यः, नद्यः सरितः पाथोनिधयः सागराश्च तैः प्लाविताः आर्द्रीकृताः। कति एवं च, अटविता अरण्यत्वं, गताः प्राप्ताः। कति भूम्यः भूदेवैर्ब्राह्मणैः देवैर्देवताभिश्च, न वृताः न गृहीता इति काकुः किं तु गृहीता एवेत्यर्थः। तावक-यशःप्रस्तावनामण्डली त्वत्कीर्तिकीर्तनसन्ततिः, जगद्धनं संसारस्य वित्तं, कोष्ठीकृत्य विषयीकृत्य, कतिवराटीभिः कतिपयैर्वराटकैः, मुदं प्रसन्नतां, यास्यति प्राप्स्यति। सामान्यं जगद्धनं भवतो नोपयुक्तमिति मत्वा न सन्तोषं प्रयास्यति। शार्दूलविक्रीडितं वृत्तम्। अत्र चतुर्थपादे द्वादशाक्षरे यतिभङ्गः कविना स्वीकृतः।

रु०—किसी नृप की स्तुति—हे महराज! आपके कितने ही प्रदेश पर्वतों से व्याप्त हैं, कितने ही नदी और समुद्रों से तथा कितने ही अरण्य हैं, कितने ही ब्राह्मणों और देवताओं से व्याप्त हैं। ये सब आपके राज्य के अन्तर्गत हैं। आपकी कीर्तिपरम्परा संसार के धन को तुच्छ समझ कर उससे सन्तुष्ट नहीं होती। यह शार्दूलविक्रीडित वृत्त है। यहाँ चौथे चरण में बारहवें अक्षर पर यतिभङ्ग को कवि ने स्वीकार कर लिया है ॥ १४ ॥

आरभ्यैकाक्षरात् पादादेकैकाक्षरवर्धितैः।
पादैरुक्थादिसंज्ञं स्याच्छन्दः षड्विंशतिं गतम् ॥ १५ ॥
उक्थाऽत्युक्था तथा मध्या प्रतिष्ठाऽन्या सुपूर्विका।
गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च ॥ १६ ॥
त्रिष्टुप् च जगती चैव तथाऽतिजगती मता।
शर्करी सातिपूर्वा स्यादष्ट्यत्यष्टी तथा स्मृते ॥ १७ ॥
धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः।
विकृतिः संस्कृतिश्चैव तथाऽतिकृतिरुत्कृतिः ॥ १८ ॥
इत्युक्ताश्छन्दसां संज्ञाः क्रमशो वच्मि साम्प्रतम्।
लक्षणं सर्ववृत्तानां मात्रावृत्तानुपूर्वकम् ॥ १९ ॥

इति छन्दोमञ्जर्यां मुखबन्धाख्यः प्रथमः स्तबकः।

प्र०—अक्षरलाघवगौरवेण समवृत्तानां नामभेदान् दर्शयति—आरभ्येति। एकस्मिन् श्लोके चत्वारः पादा भवन्ति, एकाक्षरात् एकमक्षरं यस्मिन् तादृशात् पादात् आरभ्य, एकैकाक्षरवर्धितैः एकैकाक्षरेण वर्धितैः द्व्यक्षरैरित्यर्थः, पादैः चरणैः, षड्विंशति षड्विंशतिप्रकारतां, गतं छन्दः, उक्थादिनामकं स्यात् भवेत्। यस्य वृत्तस्य प्रतिपादमेकमक्षरं, तदुक्थ्यासंज्ञकं स्यात्। द्व्यक्षररचितपादस्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नाम अत्युक्थेति। एवं षड्विंशत्यक्षरं यावत् क्रमेण नाम ज्ञेयम्। तथा-(१) उक्था (२) अत्युक्था (३) मध्या (४) प्रतिष्ठा (५) सुप्रतिष्ठा (६) गायत्री (७) उष्णिक् (८) अनुष्टुप् (९) बृहती (१०) पंक्तिः (११) त्रिष्टुप् (१२) जगती (१३) अतिजगती (१४) शर्करी (१५) अतिशर्करी (१६) अष्टिः (१७) अत्यष्टिः (१८) धृतिः (१९) अतिधृतिः (२०) कृतिः (२१) प्रकृतिः (२२) आकृतिः (२३) विकृतिः (२४) संस्कृतिः (२५) अतिकृतिः (२६) उत्कृतिः। पूर्वाचार्योक्ता एताश्छन्दसां संज्ञा उक्ताः। अनेनैव क्रमेण सर्ववृत्तानां लक्षणं लक्ष्यलक्षणप्रदर्शनपुरःसरं सर्वाणि वृत्तानि, मात्रावृत्तानुपूर्वकं मात्रावृत्तार्यादिलक्ष्यलक्षणप्रदर्शनपूर्वकं, साम्प्रतमिदानीं, वच्मि कथयामि।

इति छन्दोमञ्जरीटीकायां प्रभाख्यायां प्रथमः स्तवकः।

रु०—अक्षरों की ह्रास तथा वृद्धि के अनुसार समवृत्त छन्दों का नाम-निर्देश करते हैं-प्रत्येक श्लोक में चार पाद होते हैं। जिस छन्द के एक पाद में एक अक्षर हो, उसका नाम 'उक्था' तथा जिसके एक-एक पाद में दो-दो अक्षर हों, उसका नाम 'अत्युक्था' इस प्रकार एक-एक अक्षर की वृद्धि से २३ अक्षरान्त पादों के नाम क्रमशः संस्कृतव्याख्या में संख्यापूर्वक लिखे गये हैं। इसी क्रम से सब वृत्तों तथा आर्यादि मात्रावृत्तों के लक्षण कहता हूँ॥ १५-१९॥

छन्दोमञ्जरी की रुचिरा नामक भाषाटीका का प्रथम स्तबक समाप्त।

द्वितीयः स्तबकः

अथ समवृत्तम्।

(१) उक्था (एकाक्षरा वृत्तिः)।

ग

S

ग् श्रीः॥ १॥

श्रीस्ते। सास्ताम्॥

प्र०—एकाक्षरपादं समवृत्तं निर्दिशति—ग्श्रीरिति। यत्र एकस्मिन् पादे ग् एको वर्णो गुरुः, सा श्रीर्नाम। सर्वत्रैव कविना शब्दविन्यासनैपुण्येन तस्मिन्नेव वृत्ते तस्य लक्षणमुक्तम्, उदाहरणेऽपि वृत्तस्य नामोट्टङ्कितम्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बोधसौकर्याय लक्षणश्लोके लक्ष्येऽभिहितेऽपि पुनरुदाहरणं निर्दिशति—श्रीरिति। सा प्रसिद्धा, श्रीः लक्ष्मीः सरस्वती वा, ते तव, आस्तां भवतु। अथवा श्रीनाम वृत्तं तव ज्ञानविषयो भवतु।

रु०—जिस छन्द के चरण में एक गुरु अक्षर हो, उसका नाम 'श्री'–छन्द है। प्रत्येक छन्द का लक्षण प्रतिभाशाली कवि ने उसी छन्द में दिया है तथा उदाहरण में उस छन्द का नाम रक्खा है।

वह प्रसिद्ध लक्ष्मी या सरस्वती तुम्हारी हो। अथवा पूर्वोक्त श्री छन्द तुम्हारे ज्ञान का विषय हो ॥ १ ॥

(२) अत्युक्या (द्व्यक्षरा वृत्तिः)।

ग ग

ऽ ऽ

गौ स्त्री ॥ १ ॥

गोपस्त्रीभिः। कृष्णो रेमे ॥

प्र०—द्व्यक्षरपादं निर्दिशति—गाविति। यस्मिन् वृत्ते एकपादे गौ द्वौ वर्णौ गुरू, सा स्त्री नाम।

गोप इति। कृष्णः गोपस्त्रिभिः गोपवनिताभिः, रेमे क्रीडितवान्।

रु०—जिस छन्द के प्रत्येक पाद में दो गुरुवर्ण हों, उसका नाम 'स्त्री' छन्द है। कृष्ण ने गोपियों के साथ रमण किया ॥ १ ॥

(३) मध्या (त्र्यक्षरा वृत्तिः)।

म

ऽ ऽ ऽ

मो नारी ॥ १ ॥

गोपानां नारीभिः। श्लिष्टोऽव्यात् कृष्णो वः ॥

प्र०—म इति। यस्या एकस्मिन् पादे मगणः अर्थात् त्रयो वर्णा गुरवः, सा नारी नाम।

गोपानामिति। गोपानां नारीभिः गोपीभिः, श्लिष्टः आलिङ्गितः युगलमूर्तिरित्यर्थः, कृष्णः, वः युष्मान्, अव्यात् रक्षतु।

रु०—जिस छन्द के प्रत्येक पाद में मगण (तीन गुरु वर्ण) हो, उसको 'नारी' छन्द कहते हैं।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गोपियों से आलिङ्गित कृष्ण तुम्हारी रक्षा करें ॥ १ ॥

र

ऽ । ऽ

रो मृगी ॥ २ ॥

सा मृगीलोचना। राधिका श्रीपतेः ॥

प्र०—र इति। यस्या एकपादे रगणः अर्थात् त्रिवर्णेषु मध्यस्थो लघुः भवेत्, सा मृगी नाम।

सेति। श्रीपतेः कृष्णस्य, मृगीलोचना हरिणीतुल्यलोचनयुगला, सा राधिका प्रियतमेत्यर्थः।

रु०—जिस छन्द के प्रत्येक पाद में रगण (आदि अन्त में गुरु तथा मध्य में लघु) हो, वह 'मृगी' छन्द होता है।

श्रीकृष्ण की मृगलोचना राधिका प्रियतमा है ॥ २ ॥

(४) प्रतिष्ठा (चतुरक्षरा वृत्तिः)।

ग म

ऽ ऽऽऽ

ग्मौ चेत् कन्या ॥ १ ॥

भास्वत्कन्या सैका धन्या। यस्याः कूले कृष्णोऽखेलत्।

प्र०—ग्माविति। गश्च मश्चेति ग्मौ। यस्या एकपादे गः एको गुरुवर्णः, मश्च मगणश्च (त्रयो गुरुवर्णाः) वर्तन्ते, सा कन्या नाम।

भास्वदिति। सा अनिर्वचनीया, एका अद्वितीया, भास्वतः सूर्यस्य, कन्या पुत्री यमुना, 'कालिन्दी सूर्यतनया' इत्यमरः, धन्या सौभाग्यवती, यस्याः यमुनायाः, कूले तटे, कृष्णः अखेलत् क्रीडां कृतवान्।

रु०—जिस छन्द के एक पाद में एक गुरु वर्ण और एक मगण (तीन गुरु) अर्थात् चारों वर्ण गुरु हों, वह 'कन्या' नामक छन्द होता है।

वह यमुना ही केवल धन्य है, जिसके किनारे पर कृष्ण खेलते थे ॥ १ ॥

न गं

। । । ऽ

नगि सती ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मुररिपो ! तव पदम् । नमति सा ननु सती ॥

प्र०—नगीति । नश्च गश्च तयोः समाहारः तस्मिन् नगि, सप्तम्येकवचनम् । यस्या एकपादे नः नगणः (त्रयो लघुवर्णाः), तथा गः एको गुरुवर्णश्च भवेत्, सा सती नाम ।

मुररिपो इति । ननु हे, मुररिपो ! मुरारे ! श्रीकृष्ण ! सा सती साध्वी गोपी, तव पदं चरणं, नमति नमस्करोतीत्यर्थः ।

रु०—जिस छन्द के पाद में पहले एक नगण (तीन लघु) और एक गुरुवर्ण होता है, वह 'सती' नामक छन्द होता है ।

हे श्रीकृष्ण ! वह साध्वी गोपी तुम्हारे चरण में नमस्कार करती है ॥ २ ॥

(५) सुप्रतिष्ठा (पञ्चाक्षरा वृत्तिः) ।

भ ग ग

S I I S S

भ्गौ गिति पङ्क्तिः ॥ १ ॥

कृष्णसनाथा तर्णकपङ्क्तिः । यामुनकच्छे चारु चचार ॥

प्र०—भ्गाविति । यस्या एकपादे एको भगणः (आदिवर्णो गुरुः, द्वौ च लघू) द्वौ च गुरुवर्णौ भवतः, सा पङ्क्तिर्नाम ।

कृष्णेति । तर्णकपङ्क्तिः वत्सश्रेणिः, 'समौ वत्सकतर्णकौ' इत्यमरः । कृष्णसनाथा कृष्णयुक्ता, यामुनकच्छे यमुनापुलिने, 'जलप्रायमनूपं स्यात् पुंसि कच्छस्तथाविधः' इत्यमरः, चारु रम्यं, चचार भ्रमति स्म ।

रु०—जिस छन्द के प्रत्येक पाद में पहले भगण (आदि अक्षर गुरु दो लघु) और दो गुरु अक्षर होते हैं, वह 'पङ्क्ति' नामक छन्द कहाता है ।

कृष्ण के साथ बछड़े यमुना के पुलिन पर मनोहर रूप से घूमते थे ॥ १ ॥

स ल ग

I I S I S

सलगैः प्रिया ॥ २ ॥

व्रजसुभ्रुवो विलसत्कलाः । अभवन् प्रिया मुरवैरिणः ॥

प्र०—सलगैरिति । सश्च लश्च गश्चेति सलगाः तैः । यस्या एकपादे सगणः (द्वौ लघू एको गुरुः) तथा लः लघुः, गः गुरुश्च भवति, सा प्रिया नाम ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

व्रजस्त्रुभ्रुव इति। विलसत्कलाः विलसन्त्यः स्फुरन्त्यः कलाः नृत्यादयः कामविद्याः यासां ताः, व्रजसुभ्रुवः व्रजकामिन्यः, मुरवैरिणः श्रीकृष्णस्य प्रियाः अभवन्।

रु०—जिस छन्द के प्रत्येक पाद में एक सगण (पहले दो लघु एक गुरु), तथा एक लघुवर्ण और एक गुरु अक्षर होता है, वह 'प्रिया' नामक छन्द कहाता है।

सशोभित नृत्यादिकलायुक्त व्रज की स्त्रियाँ श्रीकृष्ण की प्रिया थीं॥ २॥

(६) गायत्री (षडक्षरा वृत्तिः)।

त य

ऽ ऽ । । ऽ ऽ

त्यौ चेत् तनुमध्या॥ १॥

(क) मूर्तिर्मुरशत्रोरत्यद्भुतरूपा। आस्तां मम चित्ते नित्यं तनुमध्या॥

(ख) नश्यन्ति ददर्श वृन्दानि कपीन्द्रः। हारीण्यबलानां हारीण्यबलानाम्॥

इति भट्टिः १०। १२।

पादान्तस्थत्वेन ददर्शेत्यत्र गुरुत्वम्।

प्र०—त्याविति। तश्च यश्च त्यौ। एकपादे चेत् यदि, त्यौ तगणः (अन्तलघुः) तथा यगणश्च (आदिलघुः) भवतः, तर्हि तनुमध्या नाम वृत्तम्।

(क) मूर्तिरिति। अत्यद्भुतरूपा अतिविचित्ररूपा, तनुमध्या तनु स्वल्पं मध्यं यस्याः सा, मुरशत्रोः श्रीकृष्णस्य, मूर्तिः, प्रतिमा, नित्यं सदा, मम चित्ते हृदये, आस्तां तिष्ठतु।

(ख) पूर्वोक्ता एकाक्षरादिवृत्तयः काव्येषु न दृग्गोचरतामुपयान्ति। तनुमध्यादीनां क्वचित् प्रयोग इति भट्टिगतं श्लोकमिहोदाहरति—नश्यन्तीति। कपीन्द्रः हनूमान्, अबलानाम् असहायानाम्, अबलानां कामिनीनाम्, हारीणि हारयुक्तानि, हारीणि रम्याणि, वृन्दानि सङ्घातान्, नश्यन्ति विनाशं गच्छन्ति तानि, ददर्श अपश्यत्। लङ्काज्वलनसमये तत्रस्थाः कामिन्योऽसहाया विनष्टा इति हनूमानवलोकयत्। नश्यन्तीति शत्रन्तस्य नश्धातोः क्लीबे द्वितीयाबहुवचने रूपम्। ददर्शेत्यत्र शकारस्य कर्तव्यं गुरुत्वं न कृतमिति न दोषः, पदान्तस्थस्य गुरुत्वं भवतीति नियमात्।

रु०—जिस छन्द के प्रत्येक पाद में एक तगण (अन्तलघु) और एक यगण (आदिलघु) हो, वह 'तनुमध्या' नामक छन्द होता है।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(क) अत्यधिक विचित्र, सूक्ष्ममध्यभाग-युक्त श्रीकृष्ण की मूर्ति सदा मेरे हृदय में निवास करे।

(ख) पूर्वोक्त एकाक्षर आदि वृत्तों का काव्यों में प्रयोग नहीं देखा जाता। परन्तु तनुमध्या आदि का प्रयोग होता है। अतः भट्टिकाव्य का उदाहरण देते हैं—लङ्कादाह के समय हनूमान् ने असहाय हारयुक्त, कामिनियों के मनोहर समूह को नष्ट होते हुए देखा। पदान्तवर्ण गुरु माना जाता है, अतः 'ददर्श' यहाँ पर शकारगत अकार गुरु जानना चाहिए ॥ २ ॥

न य

। । । । ऽ

शशिवदना न्यौ ॥ २ ॥

शशिवदनानां व्रजतरुणीनाम् । अधरसुधोर्मिं मधुरिपुरैच्छत् ॥

प्र०—शशीति । नश्च यश्च न्यौ । यस्या एकपादे नगणः (त्रिलघुः) यगणश्च (आदिलघुः) भवतः, सा शशिवदना नाम ।

शशिवदनेति । मधुरिपुः कृष्णः, शशिवदनानां चन्द्रमुखीनां, व्रजतरुणीनां व्रजकान्तानाम्, अधरसुधोर्मिम् ओष्ठामृततरङ्गम्, ऐच्छत् अभिलषितवान् । उपमारूपकालङ्कारः ।

रु०—जिस छन्द के प्रत्येक पाद में एक नगण (तीन लघु) और एक यगण (आदिलघु) होता है, वह 'शशिवदना' नामक छन्द होता है।

श्रीकृष्ण से चन्द्रमुखी व्रज की स्त्रियों की अधरामृततरङ्गों के पान की इच्छा की। यहाँ उपमारूपकालङ्कार है ॥ २ ॥

य य

। ऽ ऽ । ऽ ऽ

द्विधा सोमराजी ॥ ३ ॥

हरे ! सोमराजीसमा ते यशःश्रीः । जगन्मण्डलस्य भिनत्त्यन्धकारम् ॥

प्र०—द्विधेति । यस्या एकपादे द्वौ यगणौ (आदिलघुरूपौ) भवतः, सा सोमराजी नाम ।

हरे इति । हे हरे ! श्रीकृष्ण ! सोमराजी इन्दुपङ्क्तिः तत्समा तत्तुल्या, ते तव, यशःश्रीः कीर्तिसम्पत् कीर्तिप्रभा वा, जगन्मण्डलस्य संसारमण्डलस्य, अन्ध-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कारं तमः पापरूपमित्यर्थः, भिनत्ति विनाशयति। प्रभया तमोविनाशो भवतीति तद्वत्। 'जगन्मण्डलस्ये'त्यत्र स्यकारस्य पादान्तस्थत्वेन गुरुत्वं बोध्यम्। उपमालङ्कारः।

रु०—जिस छन्द के प्रत्येक पाद में दो यगण (आदिलघु) होते हैं, वह 'सोमराजी' नामक वृत्त होता है।

हे श्रीकृष्ण तुम्हारी चन्द्र के समान कीर्त्ति-कौमुदी संसार के अन्धकार (पाप) को दूर करती है। 'जगन्मण्डलस्य' यहां पर पाद के अन्त में स्थित स्यकारगत अकार को गुरु जानना चाहिये। इस श्लोक में उपमालङ्कार है ॥ ३ ॥

म म
ऽ ऽ ऽ ऽ ऽ ऽ

विद्युल्लेखा मो मः

क्वचित्पुस्तके विद्युल्लेखा नाम छन्दो न दृश्यते।

प्र०—विद्युल्लेखेति। यस्या एकपदे पूर्वं मगणः (त्रिगुरुः), ततश्च पुनरपि मगणो भवति, सा विद्युल्लेखा नाम।

रु०—जिस छन्द के प्रत्येक पाद में दो मगण (त्रिगुरु) होते हैं, वह विद्युल्लेखा' नामक छन्द होता है ॥ १ ॥

(७) उष्णिक् (सप्ताक्षरा वृत्तिः)

न न ग
। । । । । । ऽ

ननगि मधुमती ॥ १ ॥

रविदुहितृतटे वनकुसुमततिः। व्यधित मधुमती मधुमथनमुदम् ॥

प्र०—ननगीति। नश्च नश्च गश्च तेषां समाहारः ननग् तस्मिन् सति, मधुमतीनामकं वृत्तं भवति। यस्या एकपादे द्वौ नगणौ एको गुरुवर्णश्च; सा मधुमती नाम।

रवीति। रवेः सूर्यस्य, दुहिता कन्या यमुना, 'कालिन्दी सूर्यतनया यमुना शमनस्वसा' इत्यमरः, तस्यास्तटे कूले, मधुमती मधुयुक्ता सद्यःप्रस्फुटितेत्यर्थः, वनकुसुमततिः विपिनकुसुमसंहतिः, मधु दानवविशेषं मधु पुष्परसञ्च मथ्नातीति मधुमथनः कृष्णः मधुपश्च तस्य मुदं प्रसन्नतां, व्यधित सम्पादितवती। अत्र मकारस्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

असकृदावृत्तेर्वृत्त्यनुप्रासः शब्दालङ्कारः । श्लेषश्चार्थालङ्कारः ।

इ०—जिस छन्द के प्रत्येक पाद में दो नगण (त्रिलघु) और अन्त में एक गुरु होता है, वह 'मधुमती' नामक वृत्त होता है ।

यमुना के किनारे मधुयुक्त वन के कुसुमसमूह ने मधुमथन (श्रीकृष्ण और भ्रमर) को मुदित किया । यहाँ वृत्त्यनुप्रास और श्लेष अलङ्कार है ।

ज स ग

। ऽ । । । ऽ ऽ

कुमारललिता ज्सृगाः ॥ २ ॥

मुरारितनुवल्ली कुमारललिता सा । व्रजैणनयनानां ततान मुदमुच्चैः ॥

प्र०—कुमारेति । जश्च सश्च गश्च ज्सृगाः । यस्या एकपादे जगणः (गुरुमध्यः), सगणः । (अन्तगुरुः) तथा गः गुरुवर्णो भवति, सा कुमारललिता नाम ।

मुरारीति । मुरारेः कृष्णस्य तनुः शरीरं वल्लीव लतेव, कुमारललिता कौमारावस्थया मनोरमा स्कन्दवन्मनोहारिणी वा, एणस्य मृगस्येव नयने लोचने यासां ताः एणनयनाः, व्रजस्यैणनयनानां व्रजमृगलोचनानाम् , उच्चैः अधिकं, मुदं हर्षं, ततान कृतवती । 'मुत् प्रीतिः प्रमदो हर्षः' इत्यमरः । उपमालङ्कारः ।

इ०—जिस छन्द के प्रत्येक पाद में जगण (गुरुमध्य), सगण (अन्तगुरु) और एक गुरु वर्ण होता है, उसे 'कुमारललिता' छन्द कहते हैं ।

कुमारावस्थाके कारण सुन्दर, अथवा स्कन्दके सदृश मनोहर, श्रीकृष्णकी शरीररूपी लता ने व्रज की मृगलोचनाओं को हर्षित किया । यहाँ उपमालङ्कार है ॥२॥

म स ग

ऽ ऽ ऽ । । ऽ ऽ

म्सौ गः स्यान्मदलेखा ॥ ३ ॥

रङ्गे बाहुविरुग्णाद् दन्तीन्द्रान्मदलेखा ।
लग्नाऽभून्मुरशत्रौ कस्तूरीरसचर्चा ॥

प्र०—म्साविति । मश्च सश्च म्सौ । यस्या एकपादे पूर्वं मगणः, ततः सगणः, ततश्च एको गुरुर्भवति, सा मदलेखा नाम ।

रङ्ग इति । रज्यत्यस्मिन्निति रङ्गः रणभूमिः तस्मिन् , बाहुविरुग्णात् भुजेन

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मारितात्, दन्तीन्द्रात् करिश्रेष्ठात् कुवलयापीडादित्यर्थः, मुरशत्रौ कृष्णे, लग्ना व्याप्ता, मदलेखा मदजलधारा, कस्तूरीरसचर्चा कस्तूरीरसाङ्गरागः प्रभूत्। निहत-कुवलयापीडशरीरविनिर्गता मदधारा वासुदेवशरीरलग्ना कस्तूरीरसाङ्गरागोऽभूदिति प्रतीयमानोत्प्रेक्षा।

रु०—जिस छन्द के प्रत्येक पाद में पहले एक मगण, फिर एक सगण और एक गुरु वर्ण होता है, वह 'मदलेखा' छन्द कहाता है।

रण में भुजाओं से मारे हुए कुवलयापीड के शरीर से निकली हुई मदजल की धारा श्रीकृष्ण के शरीर में लगकर कस्तूरीरस के अङ्गराग के समान सुशोभित हुई। यहां प्रतीयमानोत्प्रेक्षा अलङ्कार है ॥ ३ ॥

(८) अनुष्टुप् (अष्टाक्षरा वृत्तिः)।

भ भ ग ग

ऽ । । ऽ । । ऽ ऽ

चित्रपदा यदि भौ गौ ॥ १ ॥

यामुनसैकतदेशे गोपवधूजलकेलौ।
कंसरिपोर्गतिलीला चित्रपदा जगदव्यात् ॥

प्र०—चित्रेति। यस्या एकपादे पूर्वं भौ द्वौ भगणौ, ततः गौ द्वौ गुरुवर्णौ भवतः, सा चित्रपदा नाम।

यामुनेति। यमुनायाः सिकतामयप्रदेशे, 'सैकतं सिकतामयम्' इत्यमरः, गोपवधूनां गोपाङ्गनानां जलकेलौ जलक्रीडायां, कंसरिपोः वासुदेवस्य, चित्रपदा अद्भुतपदन्यासयुक्ता, गतिलीला गमनलीला नृत्यमिति यावत्, जगत् संसारम्, अव्यात् रक्षेत्।

रु०—जिस छन्द के प्रत्येक पाद में प्रथम दो भगण और फिर दो गुरु अक्षर होते हैं, उसका नाम 'चित्रपदा' है।

गोपियों की जलक्रीड़ा के समय यमुना के रेतीले प्रदेश में विचित्र पदन्यास-युक्त, श्रीकृष्ण का नृत्य संसार की रक्षा करे ॥ १ ॥

भ त ल ग

ऽ । । ऽ ऽ । । ऽ

भात्तलगा माणवकम् ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चञ्चलचूडं चपलैर्वत्सकुलैः केलिपरम् ।
ध्याय सखे ! स्मेरमुखं नन्दसुतं माणवकम् ॥

प्र०—भादिति । यस्या एकपादे भात् भगणात् परं तलगाः तः तगणः, लः लघुवर्णः गः गुरुवर्णश्च भवन्ति, तत् माणवकं नाम वृत्तम् ।

चञ्चलेति । हे सखे । हे सुहृद् ! चञ्चला चपला चूडा शिखा यस्य तम्, चपलैः चलैः, वत्सकुलैः वत्ससमूहैः, 'सजातीयैः कुलं यूथम्' इत्यमरः, केलिपरं खेलन्तं माणवकं बालकं, स्मेरमुखं विकसितवदनं, नन्दसुतं नन्दनन्दनं कृष्णं, ध्याय स्मर ।

रु०—जिस छन्द के प्रत्येक पाद में पहले भगण, फिर तगण, एक लघु वर्ण और एक गुरु वर्ण होता है, वह 'माणवक' छन्द है ॥ २ ॥

हे मित्र ! चञ्चलशिखा-युक्त, चपल बछड़ों के झुण्ड से खेलते हुए प्रसन्नवदन, बालक श्रीकृष्ण को स्मरण कर ॥ २ ॥

म म ग ग
ऽऽऽ ऽऽऽ ऽऽ

मो मो गो गो विद्युन्माला ॥ ३ ॥

वासोवल्ली विद्युन्माला बर्हश्रेणी शाक्रश्चापः ।
यस्मिन्, स स्तात् तापोच्छित्त्यै गोमध्यस्थः कृष्णाम्भोदः ॥

प्र०—मो म इति । यस्या एकपादे मः मगणः, पुनः मः मगणः, ततः गः गुरुवर्णः, पुनः गः गुरुवर्णो भवति, सा विद्युन्माला नाम । अस्मिन् वृत्ते सर्वे वर्णा गुरवः । तथा च—

'सर्वे वर्णा दीर्घा यस्यां विश्रामः स्याद्वेदैर्वेदैः ।
विद्वद्वृन्दैर्वीणावाणि ! व्याख्याता सा विद्युन्माला' ॥

इति श्रुतबोधोक्तलक्षणात् चतुर्थाक्षरे यतिः कार्या ।

वास इति । यस्मिन् कृष्णमेघे, वासोवल्ली वस्त्रलता, मृदुत्वादायतत्वाच्च वल्ल्या साम्यम्, पीताम्बरमित्यर्थः । विद्युन्माला तडित्पङ्क्तिः, बर्हश्रेणी मयूरपिच्छ-माला, शाक्र ऐन्द्रः, चापः, इन्द्रधनुरित्यर्थः, स गोमध्यस्थः धेनुवृन्दमध्यगतः, मेघपक्षे-गवोः द्यावापृथिव्योः मध्यम् आकाशं तत्र स्थितः, कृष्णाम्भोदः श्रीकृष्ण एव मेघः, पक्षे कृष्णरूपो मेघः, तापोच्छित्त्यै दुःखत्रयविनाशाय, पक्षे आतपजनित-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दुःखविनाशाय, स्यात् भवतु । समस्तं व्यस्तं साङ्गरूपकमिदम् ।

रु०—जिस छन्द के प्रत्येक पाद में क्रमशः दो मगण और दो गुरु वर्ण होते हैं, वह 'विद्युन्माला' छन्द है । इस छन्द में चौथे अक्षर पर यति होती है।

'गौओं के बीच में विराजमान (द्युलोक और भूमि के बीच आकाश में स्थित मेघतुल्य श्रीकृष्ण (कृष्णवर्ण का मेघ) संसार के आधिभौतिक आदि तीनों दुःखों को दूर करने के लिये हो (ग्रीष्मऋतु के सन्ताप को हरे), जिस मेघतुल्य श्रीकृष्ण का पीताम्बर बिजली के सदृश है और सिर पर लगे हुए मोरपङ्ख इन्द्रधनुष के समान प्रतीत होते हैं ॥ ३ ॥

ग ल र ज

S I S I S I S I

ग्लौ रजौ समानिका तु ॥ ४ ॥

यस्य कृष्णपादपद्ममस्ति हृत्तडागसद्म ।
धीः समानिका परेण नोचिताऽत्र मत्सरेण ॥

प्र०—ग्लाविति । यस्या एकपादे पूर्वं गः गुरुवर्णः, ततो लः लघुवर्णः, ततश्च रः रगणः, ततो जः जगणो भवति, सा समानिका नाम । अस्मिन्वृत्ते पूर्वं गुरुः ततो लघुरिति अष्टाक्षरं यावत् क्रमः ।

यस्येति । कृष्णपादपद्मं वासुदेवचरणकमलं, यस्य भक्तस्य, हृत् हृदयं तडागं पद्माकरः तदेव सद्म भवनं यस्य तत् अस्ति, अर्थात् यस्य हृदयपद्माकरे कृष्णपादपद्मं तिष्ठति अत्र अस्मिन् भक्ते, मत्सरेण असूयया ईर्ष्यया वा, परेण अन्यमनुष्येण शत्रुरूपेण, समानिका तुल्या, धीर्मतिः नोचिता न योग्या । वासुदेवभक्तो हि न कस्यचिदपि रिपुरिति तत्त्वम् ।

रु०—जिस छन्द के प्रत्येक पाद में पहले गुरु, फिर लघु, तत्पश्चात् रगण और जगण होते हैं, उस छन्द का नाम 'समानिका' है ।

श्रीकृष्ण के चरण कमलों के लिए जिस भक्त का हृदय ही तालाब रूप आधार है, उसमें ईर्ष्याबुद्धि से शत्रुजनके समान बुद्धि नहीं करनी चाहिए अर्थात् उसे शत्रु नहीं जानना चाहिए, किन्तु मित्र जानो ॥ ४ ॥

ज र ल ग

I S I S I S I S

प्रमाणिका जरौ लगौ ॥ ५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(क) पुनातु भक्तिरच्युता सदाऽच्युताङ्घ्रिपद्मयोः।
श्रुतिस्मृतिप्रमाणिका भवाम्बुराशितारिका ॥

(ख) मतल्लिका मचर्चिका प्रकाण्डमुद्घतल्लजौ।
प्रशस्तवाचकान्यमून्ययः शुभावहो विधिः ॥
इत्यमरकोषे।

प्र०—प्रमाणिकेति। यस्या एकपादे पूर्वं जः जगणः, रः रगणः, लः लघुः, एवं गः गुरुश्च भवन्ति, सा प्रमाणिका नाम।

(क) पुनात्विति। श्रुतिर्वेदः स्मृतिर्धर्मसंहिता प्रमाणं यस्याः, भवाम्बुराशेः संसारसमुद्रस्य तारिका पारकर्त्री, अच्युता अविनष्टा सततप्रवाहेत्यर्थः, अच्युताङ्घ्रिपद्मयोः कृष्णपादपङ्कजयोः भक्तिः रागः, सदा नित्यं, पुनातु भक्तान् पवित्रान् करोतु।

(ख) मतल्लिकेति। अमूनि एतानि, 'मतल्लिका मचर्चिका प्रकाण्डम् उद्घ तल्लजः'—इति पञ्च पदानि, प्रशस्तवाचकानि श्रेष्ठार्थबोधकानि सन्ति। 'अयः' इत्येवः, शुभावहः कल्याणप्रदः विधिः अभिधीयते उच्यते।

हि०—जिस छन्द के प्रत्येक पाद में 'क्रमशः, जगण, रगण, लघु और गुरु वर्ण होते हैं, वह 'प्रमाणिका' वृत्त कहलाता है।

(क) वेद-स्मृति-प्रमाणित संसार-सागर से पारकर्त्री, नित्य कृष्ण के चरण कमलों में भक्ति सर्वदा भक्तजनों को पवित्र करे।

(ख) ये मतल्लिका आदि पाँच शब्द श्रेष्ठार्थ बोधक हैं। मङ्गलकारक विधि 'अय' कही जाती है ॥ ५ ॥

न भ ल ग

। । । ऽ । । । ऽ

नभलगा गजगतिः ॥ ६ ॥

(क) रविसुतापरिसरे विहरतो दृशि हरेः।
व्रजवधूगजगतिर्मुदमलं व्यतनुत ॥

(ख) अवतु वो गिरिसुता शशिभृतः प्रियतमा।
वसतु मे हृदि सदा भगवतः पदयुगम् ॥

प्र०—नभेति। यस्या एकपादे क्रमशः नः नगणः, भः भगणः, लः लघुः गः गुरुश्च भवन्ति, सा गजगतिर्नाम।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(क) रविसुतेति। व्रजवधूनां व्रजकामिनीनां गजगतिः हस्तितुल्यं मन्थरगमनं, रविसुतापरिसरे यमुनाकूले, विहरतः विहारं विदधतः, हरेः कृष्णस्य, दृशि चक्षुषि, अलम् अत्यधिकं, मुदं हर्षं, व्यतनुत अवर्धयत्।

(ख) अवत्विति। शशिभृतः चन्द्रमौलेः शिवस्य, प्रियतमा प्रेयसी, गिरिसुता गौरी, वः युष्मान्, अवतु पातु। एवं मे मम, हृदि हृदये, सदा नित्यं, भगवतः शिवस्य, पद्मयुगं चरणयुग्मं, वसतु स्थितिं करोतु।

रु०—जिस छन्द के प्रत्येक पाद में क्रमशः नगण, सगण, एक लघु और एक गुरु होता है, वह छन्द 'गजपति' कहलाता है!

(क) व्रजवधुओं की हाथी के सदृश मन्दगति, यमुना के किनारे विहार करते हुए श्रीकृष्ण की आँखों में अत्यधिक प्रसन्नता फैला रही थी।

(ख) शिव की प्रियतमा पार्वती तुम्हारी रक्षा करे एवं मेरे हृदय में शिव के चरणकमल सर्वदा वास करें ॥ ६ ॥

म न ग ग

S S S I I I S S

म्नौ गौ हंसरुतमेतत् ॥ १ ॥

त र ल ग

S S I S I S I S

नाराचिका तरौ लगौ ॥ २ ॥

हंसरुतं, नाराचिका छन्दश्च क्वचिन्न दृश्येते।

प्र०—म्नाविति। यस्य एकपादे क्रमशः मः मगणः, नः नगणः गौ द्वौ गुरुवर्णौ च भवतः तद् वृत्तं हंसरुतं कथ्यते ॥ १ ॥

नाराचिकेति। यस्य एकपादे क्रमशः तः तगणः, रः रगणः, लः लघुः, गः गुरुश्च भवन्ति, सा नाराचिका नाम ॥ २ ॥

रु०—जिस छन्द के प्रत्येक पाद में क्रमशः मगण, नगण और दो गुरु वर्ण होते हैं, वह 'हंसरुत' नामक छन्द होता है ॥ १ ॥

जिस छन्द के प्रत्येक पाद में क्रमशः तगण, रगण, लघु और एक गुरु वर्ण होता है, वह 'नाराचिका' छन्द कहलाता है ॥ २ ॥

(९) बृहती (नवाक्षरा वृत्तिः)।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न न म
। । । । । । ऽ ऽ ऽ

भुजगशिशुभृता[1] नौ मः ॥ १ ॥

ह्रदतटनिकटक्षोणी भुजगशिशुभृता याऽऽसीत्।
मुररिपुदलिते नागे व्रजजनसुखदा साऽभूत् ॥

प्र०—भुजगेति। यस्या एकपादे क्रमशः द्वौ नगणौ एको मगणश्च (पूर्वं षड् लघुवर्णाः त्रयो गुरवः) भवन्ति, सा भुजगशिशुभृता नाम।

ह्रदेति। या ह्रदतटनिकटक्षोणी कालियसरस्तीरसमीपवर्तिभूमिः, भुजगशिशुभृता सर्पशावकव्याप्ता आसीत्, सा मुररिपुणा कृष्णेन दलिते मारिते, नागे सर्पे सति, व्रजजनसुखदा व्रजनिवासिमनुजसुखप्रदा अभूत्। कालियसरसि सौभरिशापाद् गरुडस्यानागमनं विज्ञाय कालियः सर्पः सपरिवारस्तत्र वसति स्मेति पुराणवार्ता। कैश्चित् लक्षणलक्ष्यश्लोके च 'भृते'त्यस्य स्थाने 'वृते'ति पठ्यते। तदा वृता युक्तेत्यर्थो बोध्यः।

हि०—जिस छन्द के प्रत्येक पाद में पहले दो नगण अर्थात् छः लघु वर्ण और एक मगण होता है, उसका नाम 'भुजगशिशुभृता' है।

जो कालिय तालाब के समीप की भूमि सर्पों के बच्चों से युक्त थी, वह कृष्ण द्वारा कालिय सर्प के दले जाने पर व्रजनिवासिजन के लिए सुखकारी हुई। पौराणिक कथा है-कि सौभरि ऋषि के शाप से गरुड कालियतालाब पर नहीं आ सकता था। इसलिए कालियनाग सपरिवार वहां रहता था ॥ १ ॥

भ म स
ऽ । । ऽ ऽ ऽ । । ऽ

स्यान्मणिमध्यं चेद्भमसाः ॥ २ ॥

कालियभोगाभोगगतस्तन्मणिमध्यस्फीतरुचा।
चित्रपदाभो नन्दसुतश्चारु ननर्त स्मेरमुखः ॥

प्र०—स्यादिति। यस्या एकपादे क्रमशः भगणो मगणः सगणश्च भवन्ति, तदा मणिमध्यं नाम वृत्तम्।

कालियेति। कालियभोगाभोगगतः कालियाख्यनागफणविस्तारगतः, 'भोगः

---

1. इतः परम्—'सृता' इत्येवं शम्भुप्रभृतिषु पाठः। 'वृता' इत्येवमधुनिकाः पठन्ति—इति पुस्तकान्तरेऽधिकम्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मुखे फणे चाहेः' इति कोषः, तस्य कालियस्य मणिः शिरोरत्नं तन्मध्यात् स्फीतरुचा वृद्धकान्त्या, चिन्नपदाभः स्वच्छचरणशोभः, स्मेरमुखः ईषद्विकसितवदनः, नन्दसुतः कृष्णः, चारु रम्यं, ननर्त नृत्यं कृतवान् ।

स०—जिस छन्द के प्रत्येक पाद में क्रम से सगण, भगण और सगण होते हैं, वह 'मणिमध्य' छन्द कहलाता है ।

कालिय सर्प की फणामध्य में विराजमान, सिर के मणि से निकलती हुई उत्कट कान्ति से स्वच्छ-शोभायमान-चरणयुक्त, विकसितमुख कृष्ण ने सुन्दर नृत्य किया ॥ २ ॥

स ज र

ISIISI SIS

सजरैर्भुजङ्गसङ्गता ॥ ३ ॥

तरला तरङ्गरिङ्गितैर्यमुना भुजङ्गसङ्गता ।
कथमेति वत्सचारकश्चपलः सदैव तां हरिः ॥

प्र०—सजरैरिति । यस्या एकपादे क्रमशः सगणः, जगणः रगणश्च भवन्ति सा भुजङ्गसङ्गता नाम ।

तरलेति—यमुना कालिन्दी, तरङ्गरिङ्गितैः वीचिसमुद्गमैः, तरला चञ्चला तथा भुजङ्गसङ्गता सर्पव्याप्ता अस्ति । तां यमुनां, वत्सचारकः वत्सानां रक्षणादिकर्मसु नियुक्तः, सदैव चपलः चञ्चलः, हरिः कृष्णः कथम् एति गच्छति ।

स०—जिस छन्द के प्रत्येक पाद में क्रमशः सगण, जगण, रगण होते हैं, वह 'भुजङ्गसङ्गता' छन्द है ।

यमुना चञ्चल लहरों तथा सर्पों से व्याप्त है, वहां पर बछड़ों को चरानेवाला सदा चञ्चलस्वभाव कृष्ण किस प्रकार से जाता है ॥ ३ ॥

क्वचिदिमानि च्छन्दांसि वृत्तावस्यामधिकानि दृश्यन्ते—

र न स

SIS III IIS

राक्सा विह हलमुखी ॥ १ ॥

र न स

SIS III SIS

भद्रिका भवति रो नरौ ॥ २ ॥ इति छं० प० ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न न स

।।।।।।।।ऽ

द्विगुणनगणसहितः

सगण इह हि विहितः ।

फणिपतिमतिविमला

क्षितिप ! भवति कमला ॥३॥ इति छं. पं. ।

ऽऽऽऽऽऽऽऽऽ

अङ्कोन्माना वर्णा यत्र स्युः

सर्वे दीर्घाः सर्पेशेनोक्तम् ।

रूपामालीसंज्ञं तद् वृत्तं

यस्मिंश्चेतः केषामुद्वृत्तम् ॥ ४ ॥ इति छं. पं. ।

प्र०—राज्ञसाविति । इह अस्मिन् हलमुखीवृत्ते क्रमशः रगणः, नगणः, सगणो भवति ।

भद्रिकेति । यत्रैकपादे क्रमशः रगणः, नगणः रगणश्च भवन्ति, सा भद्रिका ॥ २ ॥

द्विगुणेति । हे क्षितिप ! नृप !, फणिपतिमतिविमला, अनन्तबुद्धिसमनिर्मला, कमला नाम भवति । इह द्विगुणनगणसहितः सगणः आदौ नगणौ द्वौ ततः सगणो भवति ॥ ३ ॥

अङ्कोन्माना इति । यत्र यस्मिन् वृत्ते सर्वे अङ्कोन्माना अङ्कपरिमिताः, नवसङ्ख्यायामङ्कानां समाप्तिरिति नवेत्यर्थः, वर्णाः दीर्घा भवन्ति, तद् वृत्तं रूपामालीसंज्ञकं भवतीति सर्पेशेन पिङ्गलमुनिना उक्तम् । यस्मिन् केषां श्रोतॄणां, चेतो हृदयम्, उद्वृत्तम् अनासक्तं भवेत् । रसिका एवाद्रियन्ते वृत्तमेतत् ॥ ४ ॥

हि०—'हलमुखी' छन्द में क्रमशः रगण, नगण, सगण होते हैं ॥ १ ॥

'भद्रिका' छन्द के एक पाद में क्रमशः रगण, नगण, रगण होते हैं ॥ २ ॥

हे राजन् ! अनन्त की बुद्धि के समान विमल 'कमला' नामक छन्द होता है जिसमें प्रथम दो नगण और फिर एक सगण होता है ॥ ३ ॥

जिस छन्द में अङ्कसंख्यापरिमित अर्थात् ९ वर्ण गुरु होते हैं वह 'रूपामाली' छन्द होता है—ऐसा पिङ्गलमुनि ने कहा है। जिसमें किन्हीं श्रोताओं का मन उकता जाता है। केवल रसिक ही इसका आदर करते हैं ॥ ४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(१०) पङ्क्तिः (दशाक्षरा वृत्तिः)।

भ भ स ग

S I I S S S I I S S

रुक्मवती सा यत्र भमस्गाः ॥ १ ॥

कायमनोवाक्यैः परिशुद्धैर्यस्य सदा कंसद्विषि भक्तिः।
राज्यपदे हर्म्यालिरुदारा रुक्मवती विघ्नः खलु तस्य ॥

प्र०—रुक्मेति। यस्या एकपादे क्रमेण भगणः, मगणः, सगणः, तत एको गुरुर्भवति, सा रुक्मवती नाम।

कायेति। यस्य भक्तस्य परिशुद्धैः, स्वच्छैः, कायमनोवाक्यैः शरीरहृदयवाक्यैः करणैः कंसद्विषि कृष्णे, भक्तिः प्रेम भवति, तस्य भक्तस्य, राज्यपदे राज्याधिकारे, उदारा प्रशस्ता, रुक्मवती स्वर्णयुक्ता, हर्म्यालिः प्रासादपङ्क्तिः, विघ्नः खलु प्रतिबन्धक एव। राज्यादिप्राप्तौ विवृद्धा भोगवासना भक्तिप्रतिबन्धिका भवति। चम्पकमाला रूपवती च नामान्तरमस्य बोध्यम्।

र०—जिस छन्द के प्रत्येक पाद में क्रम से भगण, मगण और एक गुरु वर्ण होता है, उसका नाम 'रुक्मवती' छन्द है।

जिस मनुष्य की विमल शरीर, हृदय और वाक्यों से कृष्ण में भक्ति है, उसको राज्य मिलने पर महल आदि विघ्नस्वरूप ही है। भोगवासना भक्ति की प्रतिबन्धिका है। चम्पकमाला और रूपवती भी इसके नाम हैं ॥ १ ॥

म भ स ग

S S S S I I I I S S

ज्ञेया मत्ता मभसगसृष्टा ॥ २ ॥

पीत्वा मत्ता मधु मधुपाली कालिन्दीये तटवनकुञ्जे।
उद्दीव्यन्तीर्व्रजवनरामाः कामासक्ता मधुजिति चक्रे ॥

प्र०—ज्ञेयेति। क्रमेण मगणभगणसगणैः एकेन गुरुवर्णेन च सृष्टा निबद्धा मत्ता नाम।

पीत्वेति। मधुपाली भ्रमरपङ्क्तिः, कालिन्दीये यमुनासम्बन्धिनि, तटवनकुञ्जे तीरस्थविपिनलतामण्डपे, 'निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे' इत्यमरः। मधु कुसुमरसं, पीत्वा आस्वाद्य, मत्ता मदयुक्ता सती, उद्दीव्यन्तीः औद्धत्येन

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

खेलन्तीः, व्रजजनरामाः व्रजस्त्रियः, मधुजिति कृष्णे, कामासक्ताः मदनचञ्चलाः, चक्रे कृतवती । मत्तभ्रमरवृन्दचेष्टादर्शनेन व्रजकामिनीनां कामोद्दीपनमभूदिति भावः ।

हि०—जिस छन्द में क्रम से मगण, भगण, सगण और एक गुरु होते हैं, वह छन्द 'मत्ता' कहलाता है ।

यमुना के तट पर स्थित वनकुञ्जमें फूलों के रस को पीकर मत्त भ्रमरों ने उद्दण्डता से खेलती हुई व्रज की स्त्रियोंको कृष्ण में कामासक्त किया । मत्त भौरों की चेष्टा को देखकर व्रज की स्त्रियों का काम उद्दीपित हुआ ॥ २ ॥

न ज न ग

। । । । ऽ । । । । ऽ

त्वरितगतिश्च नजनगैः ॥ ३ ॥

(क) त्वरितगतिर्व्रजयुवतिस्तरणिसुताविपिनगता ।
मुररिपुणा रतिगुरुणा सह मिलिता प्रमदमिता ॥

(ख) क्षितिविजितिस्थितिविहितिव्रतरतयः परगतयः ।
उरु रुरुधुर्गुरु दुधुवुर्युधि कुरवः स्वमरिकुलम् ॥

इति दण्डिनः काव्यादर्शे (३।८५)

प्र०—त्वरितेति । यस्या एकपादे क्रमेण नगणः, जगणः, नगणः एको गुरुश्च भवति, सा त्वरितगतिर्नाम ।

(क) त्वरितेति । त्वरितगतिः शीघ्रगामिनी, तरणिसुतायाः यमुनायाः विपिनगता केलिवनं प्राप्ता, व्रजयुवतिः व्रजकामिनी, रतिगुरुणा रतिदक्षेण, मुररिपुणा कृष्णेन सह, मिलिता सङ्गता सती, प्रमदम् अतिहर्षम्, इता प्राप्ता । क्वचित् 'सह मिलिते'त्यत्र 'परिरमिते'ति पाठः, तत्र विहारं प्रापितेत्यर्थो बोध्यः ।

(ख) क्षितीति । क्षितेः पृथिव्याः या विजितिर्विजयः या च स्थितिर्मर्यादा तयोर्या विहितिः कृतिः सैव व्रतं तत्र रतिः प्रेम येषां ते, परगतयः उत्कृष्टावस्थाः श्रेष्ठज्ञाना वा, कुरवः कुरुपुत्राः, युधि रणे, स्वं स्वीयम्, अरिकुलं वैरिवृन्दम्, उरु अधिकं रुरुधुः अरुन्धन्, गुरु अत्यधिकञ्च, दुधुवुः कम्पयामासुः । अकारोकारस्वरैरेव रचितोऽयं श्लोकः ।

हि०—जिस छन्द के पाद में क्रमशः नगण, जगण नगण और एक गुरु वर्ण होते हैं, वह 'त्वरितगति' छन्द है ।

(क) यमुना के जङ्गल में शीघ्रगामिनी व्रज की वधू रतिक्रीडा में चतुर कृष्ण के

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

साथ मिल कर अत्यधिक प्रसन्न हुई।

(ख) पृथ्वी की विजय और मर्यादा की रक्षा के व्रत में तत्पर, श्रेष्ठ-ज्ञानयुक्त, कौरवों ने अपने शत्रुओं को युद्ध में बहुत रोका और अत्यधिक कँपा दिया। इस उदाहरण श्लोक में अकार, इकार और उकार ये तीन ही स्वर हैं ॥ ३ ॥

न र ज ग

I I I S I S I S I S I S

नरजगैर्भवेन्मनोरमा ॥ ४ ॥

तरणिजातटे विहारिणी व्रजविलासिनीविलासतः।
मुररिपोस्तनुः पुनातु वः सुकृतशालिनां मनोरमा ॥

प्र०—नरजगैरिति। यस्या एकपादे क्रमेण नगणः, रगणः, जगणः, एको गुरुश्च भवति, सा मनोरमा नाम।

तरणिजेति। व्रजविलासिनीषु व्रजकामिनीषु विलासतः विहारार्थं तरणिजातटे यमुनातीरे, विहारिणी विचरन्ती, सुकृतशालिनां पुण्यात्मनां, मनोरमा हृदयसुखदा, मुरारिपोः कृष्णस्य, तनुः शरीरं, वः युष्मान्, पुनातु पवित्रान् करोतु।

रु०—जिसके एक पाद में क्रमशः नगण, रगण, जगण और एक गुरु वर्ण होवे हैं उसका नाम 'मनोरमा' छन्द है।

यमुना के किनारे व्रजवधुओं से विहार के लिए घूमते हुए, पुण्यात्माओं को सुखद, श्रीकृष्ण का शरीर तुम लोगों को पवित्र करे ॥ ४ ॥

अस्यां वृत्तौ इमानि छन्दांस्यधिकानि दृश्यन्ते—

म स ज ग

S S S I I S I S I S

म्सौ ज्गौ शुद्धविराडिदं मतम् ॥ १ ॥

म न य ग

S S S I I I I S S S

म्नौ य्गौ चेति पणवनामेदम् ॥ २ ॥

र ज र ग

S I S I S I S I S S

ज्रौ रगौ मयूरसारिणी स्यात् ॥ ३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त ज ज ग

ऽ ऽ । । ऽ । । ऽ । ऽ

तो जौ गुरुणेयमुपस्थिता ॥४॥ इति वृत्तरत्नाकरे ।

भ म ज ग

ऽ । । ऽ ऽ ऽ । ऽ । ऽ

दीपकमालां भ्मौ मता जगौ ॥ ५ ॥

म भ न ग

ऽ ऽ ऽ ऽ । । । । । ऽ

ज्ञेया हंसी मभनगयुता ॥ ६ ॥ इति तत्परिशिष्टे ।

प्र०—म्सावित्ति । यस्यैकपादे क्रमशः मगणः, सगणः, जगणः, एको गुरुश्च भवन्ति, तद् वृत्तं शुद्धविराट्संज्ञकं मतम् ॥ १ ॥

म्नाविति । यस्यैकपादे क्रमशः मगणः, नगणः, यगणो गुरुश्च भवन्ति, तत् पणवं नाम वृत्तम् ॥ २ ॥

ज्रौविति । यस्या एकपादे क्रमशः रगणः, जगणः, रगणः एको गुरुश्च भवन्ति सा मयूरसारिणी नाम ॥ ३ ॥

तो जाविति । यस्या एकपादे तगणः, द्वौ जगणौ गुरुश्च भवन्ति, सा उपस्थिता नाम ॥ ४ ॥

दीपकमालेति । यस्या एक पादे भगणः, मगणः, जगणः गुरुश्च भवन्ति, सा दीपकमाला नाम भवति ॥ ५ ॥

ज्ञेयेति । यस्या एकपादे मगणः, भगणः, नगणः गुरुश्च भवन्ति, सा हंसी नाम ॥ ६ ॥

हि०—जिस छन्द के प्रत्येक पाद में क्रम से मगण, सगण, जगण और एक गुरु वर्ण होते हैं, वह 'शुद्धविराट्' छन्द कहलाता है ॥ १ ॥

जिस छन्द के प्रत्येक पाद में क्रम से मगण, नगण, यगण और एक गुरु वर्ण होते हैं, वह 'पणव' छन्द कहलाता है ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जिस छन्द के प्रत्येक पाद में क्रम से रगण, जगण, रगण और एक गुरु होते हैं, वह 'मयूरसारिणी' छन्द कहाता है ॥ ३ ॥

जिस छन्द के प्रत्येक पाद में क्रम से तगण, दो जगण और एक गुरु वर्ण होते हैं, उसका नाम 'उपस्थिता' छन्द है ॥ ४ ॥

जिस छन्द के प्रत्येक पाद में क्रम से भगण, भगण, जगण और एक गुरु वर्ण होते हैं, उसका नाम 'दीपकमाला' छन्द है ॥ ५ ॥

जिस छन्द के प्रत्येक पाद में क्रम से मगण, भगण, नगण और एक गुरु वर्ण होते हैं, उसे 'हंसी' छन्द कहते हैं ॥ ६ ॥

(११) त्रिष्टुप् (एकादशाक्षरा वृत्तिः) ।

त त ज ग ग

S S I S S I I S I S S

स्यादिन्द्रवज्रा यदि तौ जगौ गः ॥ १ ॥

गोष्ठे गिरिं सव्यकरेण धृत्वा रुष्टेन्द्रवज्राहतिमुक्तवृष्टौ ।
यो गोकुलं गोपकुलञ्च सुस्थं चक्रे स नो रक्षतु चक्रपाणिः ॥

प्र०—स्यादिति । यदि तौ द्वौ तगणौ, जः जगणः, गः गुरुः, पुनरपि गः गुरुश्च भवन्ति, तदा इन्द्रवज्रा नाम वृत्तं भवति ।

गोष्ठ इति । चक्रपाणिः, कृष्णः, रुष्टेन्द्रेण पूजावस्तुभक्षणात्कुपितवासवेन वज्राहत्या वज्राघातेन तत्सहितेत्यर्थः, मुक्ता कृता वृष्टिर्वर्षणं यत्र, तत्र गोष्ठे गोशालायां, सव्यकरेण वामपाणिना, गिरिं गोवर्धनपर्वतं धृत्वा, गोकुलं धेनुसमूहं, गोपकुलञ्च गोपवृन्दञ्च, सुस्थं विपद्रहितं चक्रे स चक्रपाणिः कृष्णः, नः अस्मान्, रक्षतु पातु । पुरा प्रतिवर्षं गोपा वृद्धिलिप्सया इन्द्रोत्सवं चक्रुः । एकदा कृष्णवचनेन न विदधुः । गोवर्धनयात्रां च चक्रुः, तदा क्रुद्ध इन्द्रः सप्त दिवसानि यावत् वज्रपातयुतं ववर्ष । तदा कृष्णेन वामहस्तस्य कनिष्ठिकाङ्गुल्यग्रभागेण गोवर्धनगिरिं धृत्वा गोवृन्दं गोपवृन्दञ्च रक्षितमिति पुराणवार्ताऽत्रानुसन्धेया । अत्र पदार्थहेतुकं काव्यलिङ्गमलङ्कारः ।

हि०—जिस छन्द में क्रमशः दो तगण, जगण और दो गुरु होते हैं, वह 'इन्द्रवज्रा' छन्द कहलाता है ।

जिन कृष्ण ने क्रुद्ध इन्द्र के वज्रपात सहित घोर वर्षा के समय बायें हाथ से गोवर्धनपर्वत को उठाकर गौओं और गोपों को आपत्ति से बचाया, वे कृष्ण

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हमारी रक्षा करें। 'पहले गोपजन वर्षा के लिए इन्द्रोत्सव करते थे। श्रीकृष्ण की आज्ञा से एकबार इन्द्रोत्सव न मनाकर वे गोवर्धनपर्वत की यात्रा करने लगे। उस समय क्रुद्ध होकर इन्द्र ने वज्रसहित घोर वर्षा प्रारम्भ की। तब कृष्ण ने बायें हाथ की कनिष्ठा अङ्गुलि से गोवर्धनपर्वत उठाकर उनकी रक्षा की।' ऐसी पुराण-कथा है। यहाँ काव्यलिङ्ग अलङ्कार है ॥ १ ॥

ज त ज ग ग
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ

उपेन्द्रवज्रा प्रथमे लघौ सा* ॥ २ ॥

उपेन्द्र! वज्रादिमणिच्छटाभिर्विभूषणानां छुरितं वपुस्ते।
स्मरामि गोपीभिरुपास्यमानं सुरद्रुमूले मणिमण्डपस्थम् ॥

प्र०—उपेन्द्रेति। इन्द्रवज्राया एव प्रथमे वर्णे लघौ सति उपेन्द्रवज्रा नाम वृत्तं भवति।

उपेन्द्रेति। उपेन्द्र! कृष्ण! 'उपेन्द्र इन्द्रावरजः' इत्यमरः, सुरद्रुमूले कल्पवृक्षतले, मणिमण्डपस्थं मुक्ताखचितमण्डपे विराजमानं, विभूषणानाम् आभूषणानां, वज्रादिमणिच्छटाभिः हीरकादिमणिप्रभाभिः छुरितं व्याप्तं, गोपीभिः गोपाङ्गनाभिः, उपास्यमानम् सेव्यमानं। ते तव, वपुः शरीरं, स्मरामि चिन्तयामि ॥ २ ॥

र०—इन्द्रवज्रा के ही प्रथम अक्षर को लघु कर देने से 'उपेन्द्रवज्रा' छन्द होता है। हे श्रीकृष्ण! कल्पवृक्ष के नीचे मणिमण्डप में विराजमान, आभूषणों में लगे हुए हीरा-आदि मणियों की कान्ति से सुशोभित, गोपियों से सेवा किये जाते हुए तुम्हारे शरीर का ध्यान करता हूँ ॥ २ ॥

अनन्तरोदीरितलक्ष्मभाजौ
पादौ यदीयावुपजातयस्ताः।
इत्थं किलान्यास्वपि मिश्रितासु
वदन्ति जातिष्विदमेव नाम ॥ ३ ॥

यथा ममाच्युतचरिते—

(क) काचिन्मुरारेर्वदनारविन्दं सङ्क्रान्तमालोक्य जले नवोढा।
व्यक्तं सलज्जा परिचुम्बितुं तत्तदर्थमेवाम्भसि निर्ममज्ज ॥

* 'उपेन्द्रवज्रा जतजास्ततो गौ' इति वृत्तरत्नाकरे।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(ख) मुखारविन्दैर्व्रजसुन्दरीणामामोदमत्युत्कटमुद्गिरद्भिः ।
अहारि चित्तेन समं मुरारेर्हेमाम्बुजेभ्योऽपि मधुव्रतौघः ॥
(ग) तोयेषु तस्याः प्रतिबिम्बितासु व्रजाङ्गनानां नयनावलीषु ।
स्वबन्धुपङ्क्तिभ्रमतोऽतिमुग्धा गोष्ठीं शफर्यो रचयाम्बभूवुः ॥

तथा गोपालशतके—

(घ) वनेषु कृत्वा सुरभिप्रचारं प्रकाममुग्धो मधुवासरेषु ।
गायन्कलं क्रीडति पद्मिनीषु मधूनि पीत्वा मधुसूदनोऽसौ ॥
एवमनयोर्नानाविधा अप्युपजातयो बोद्धव्याः ।
तथा वंशस्थविलेन्द्रवंशयोरित्थमुदाहार्यम्—
(ङ) इत्थं रथाश्वेभनिषादिनां प्रगे गणो नृपाणामथ तोरणाद्बहिः ।
प्रस्थानकालक्षमवेशकल्पनाकृतक्षणक्षेपमुदैक्षताच्युतम् ॥

इति माघे

प्र० अनन्तरेति । यदीयौ पादौ चरणौ, अनन्तरोदीरितयोः पूर्वोक्तयोरिन्द्रवज्रोपेन्द्रवज्रयोः लक्ष्मभाजौ लक्षणयुक्तौ भवतः, ताः उपजातयः उपजातिनामानि वृत्तानि भवन्ति । इत्थमेव अन्यासु, मिश्रितासु वृत्तद्वयलक्षणयुक्तासु, जातिषु छन्दःसु, इदमेव 'उपजातिः' इति नाम वदन्ति कथयन्ति । यत्रैकस्मिन् श्लोके वृत्तद्वयस्य लक्षणं दृश्यते, तस्य सर्वस्यैव 'उपजाति'रिति नाम बोध्यम् । न सर्वत्र नामान्तरम् ।

(क) काचिदिति । काचित् नवोढा सद्यः परिणीता कान्ता, सा च अधिकसलज्जा भवतीति ध्वनिः, मुरारेः कृष्णस्य, वदनारविन्दं मुखपद्मं, जले सलिले, सङ्क्रान्तं प्रतिबिम्बितम् , आलोक्य दृष्ट्वा, तत् मुखपद्मं, व्यक्तं प्रकाशं, परिचुम्बितुं सलज्जा लज्जावती असमर्थेति यावत् , तदर्थमेव चुम्बनार्थमेव, अम्भसि जले, निर्ममज्ज निमग्ना बभूव । अत्र पूर्वपादत्रये इन्द्रवज्रा, चतुर्थे तूपेन्द्रवज्रेति साङ्कर्यादुपजातिः । अतिशयोक्तिरलङ्कारः ।

(ख) मुखारविन्दैरिति । अत्युत्कटमतितीव्रम् , आमोदं सुगन्धिम् , उद्गिरद्भिः व्रजसुन्दरीणां व्रजकान्तानां, मुखारविन्दैः वदनपद्मैः, हेमाम्बुजेभ्यः स्वर्णपद्मेभ्यः अपि, मधुव्रतौघः मधुपकुलं, मुरारेः कृष्णस्य, चित्तेन हृदयेन, समं सहितम् , अहारि आकृष्टः । मुखारविन्दैरिति रूपकम् । हेमाम्बुजेभ्यो मुखपद्मानामाधिक्यवर्णनात् व्यतिरेकोऽलङ्कारः । अत्र प्रथमतृतीयपादयोरुपेन्द्रवज्रा, द्वितीयचतुर्थयोश्चेन्द्रवज्रेति साङ्कर्यादुपजातिः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(ग) तोयेष्विति। अतिमुग्धा अतिसुन्दर्यः अतिमूर्खाश्च 'मुग्धस्तु सुन्दरे मूढे' इति कोषः, शफर्यः प्रोष्ठ्यौ मीनविशेषाः 'प्रोष्ठी तु शफरी द्वयोः इत्यमरः, तस्याः यमुनायाः, तोयेषु जलेषु, प्रतिबिम्बतासु प्रतिबिम्बं प्राप्तासु, नयनावलीषु नेत्रपङ्क्तिषु स्वबन्धुभ्रमतः सजातीयभ्रान्त्या, गोष्ठीं परिषदं, रचयाम्बभूवुः चक्रुः। जलमध्ये प्रतिबिम्बितानि व्रजवधूलोचनानि मत्स्यकुलानि च सादृश्यात् सम्मिलितानि बभूवुः। अत्र प्रथमचतुर्थयोरिन्द्रवज्रा, द्वितीयतृतीययोश्चोपेन्द्रवज्रेति साङ्कर्यादुपजातिः। अत्र भ्रान्तिमानलङ्कारः।

(घ) वनेष्विति। स्वरचित-'गोपालशतक'-ग्रन्थस्योदाहरणं कविर्ददाति-प्रकाममुग्धः अत्यधिकसुन्दरः मूढश्च, मधुसूदनः कृष्णः भ्रमरश्च 'मधुसूदनस्तु पुंसि भ्रमरे कंसविद्विषि' इति कोषः, मधुवासरेषु वसन्तदिनेषु 'मधुर्दैत्ये मधुश्चैत्रे वसन्ते मधुरुच्यते' इति कोषः, वनेषु अरण्येषु जलेषु च 'सलिलं भुवनं वनम्' इत्यमरः। सुरभिप्रचारं गोचारणं पक्षे सुरभेः वसन्तस्य प्रचारं वृत्तान्तं प्रकाशश्च कृत्वा विधाय, 'सुरभिर्गवि गन्धे च वसन्ते च मनोरमे' इति मेदिनी, मधूनि कुसुमरसान् पक्षे अधरामृतानि, पीत्वा आस्वाद्य, कलं मधुरं गायन् गानं कुर्वन्, पद्मिनीषु तन्नामकनायिकाविशेषेषु, पक्षे कमलिनीषु, क्रीडति विहरति। 'पद्मिनी पद्मसङ्घाते स्त्रीविशेषे च कथ्यते' इति कोषः। अत्र प्रथमद्वितीयचतुर्थेष्विन्द्रवज्रा, तृतीये तूपेन्द्रवज्रेति साङ्कर्यादुपजातिः। श्लेषोऽलङ्कारः।

एकादशाक्षरेतरजात्योर्वृत्तयोर्द्वयोः सङ्करमप्युपजातिमेव कथयन्ति। यथा—

(ङ) इत्थमिति। इत्थं प्रगे प्रातःकाले 'सायं साये प्रगे प्रातः' इत्यमरः, अथ सूर्योदये, रथाश्वेभनिषादिनां स्यन्दनहयगजारोहिणां, नृपाणां भूपतीनां, गणः समूहः, तोरणात् बहिर्द्वारात् 'तोरणोऽस्त्री बहिर्द्वारम्' इत्यमरः, बहिः बाह्यस्थाने, प्रस्थानकाले प्रयाणसमये क्षमः योग्यो यो वेशः नेपथ्यम् 'आकल्पवेशौ नेपथ्यम्' इत्यमरः, तस्य कल्पनया विधानेन कृतक्षणक्षेपं विहितवेलाविलम्बम्, अच्युतं श्रीकृष्णम्, उदैक्षत प्रतीक्षां कृतवान्, अत्र पदार्थहेतुकं काव्यलिङ्गमलङ्कारः। अत्र प्रथमतृतीययोरिन्द्रवंशावृत्तं द्वितीयचतुर्थयोश्च वंशस्थमिति साङ्कर्यादुपजातिः।

हि०—इन्द्रवज्रा और उपेन्द्रवज्रा दोनों जहाँ पर सम्मिलित हो जाते हैं वहाँ 'उपजाति' छन्द होता है। इस प्रकार अन्य दो-दो छन्दों के भी साङ्कर्य को 'उपजाति' कहते हैं।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(क) किसी नवविवाहिता स्त्री ने श्रीकृष्ण के मुखकमल को जल में प्रतिबिम्बित देखकर लज्जावश स्पष्ट चुम्बन में असमर्थ होकर चुम्बन की इच्छा से ही जल में डुबकी लगाई। यहाँ प्रथम तीन चरणों में इन्द्रवज्रा और चतुर्थ में उपेन्द्रवज्रा है, इसलिये यह 'उपजाति' छन्द है तथा अतिशयोक्ति अलङ्कार है।

(ख) व्रज की स्त्रियों ने मुखकमल की उत्कट गन्ध से श्रीकृष्ण के हृदय को हर लिया तथा स्वर्णकमल पर बैठे हुए भौंरों को भी साथ ही आकृष्ट कर लिया। यहाँ प्रथम और तृतीय चरण में उपेन्द्रवज्रा तथा द्वितीय में इन्द्रवज्रा है, इसलिये यह 'उपजाति' छन्द है।

(ग) अतिसुन्दर मछलियों ने यमुना के जल में प्रतिबिम्बित व्रजवधुओं की आँखों को अपना सजातीय समझ कर उनके साथ गोष्ठी बनाई। जल में व्रजवधुओं की आँखें और मछलियों की आँखें समान प्रतीत हो रही थीं। यहाँ प्रथम-चतुर्थ पाद में इन्द्रवज्रा तथा द्वितीय-तृतीय पाद में उपेन्द्रवज्रा है, इसलिए यह 'उपजाति' छन्द है। यहाँ भ्रान्तिमान् अलङ्कार है।

(घ) अत्यन्त मुग्ध मधुसूदन (श्रीकृष्ण और भ्रमर) वसन्त समय में जङ्गलों में (जल में) गोचारण (वसन्त तथा सुगन्धि का प्रचार) करके तथा अधरामृत (पुष्परस) का पान करके, सुन्दर गान करता हुआ, पद्मिनीनामक नायिकाओं में (कमलिनियों में) विहार करता है। यहाँ प्रथम, द्वितीय, चतुर्थ पाद में इन्द्रवज्रा तथा तृतीय में उपेन्द्रवज्रा है, इसलिए यह 'उपजाति' छन्द है। यहाँ श्लेष अलङ्कार है।

(ङ) एकादशाक्षर से इतर जाति के दो छन्दों के सङ्कर को भी 'उपजाति' ही कहते हैं। जैसे—इस प्रकार सूर्योदय के पश्चात् रथ, अश्व तथा हाथियों पर बैठे हुए राजवृन्द ने तोरणों के बाहर जाकर यात्राकाल के उचित वेष-भूषा बनाने में देर करते हुए श्रीकृष्ण की प्रतीक्षा की। यहाँ प्रथम तथा तृतीय पाद में इन्द्रवंशा और द्वितीय चतुर्थ चरण में वंशस्थ है, इसलिए 'उपजाति' छन्द है। यहाँ काव्यलिङ्ग अलङ्कार है॥ ३॥

न ज ज ल ग

। । । । ऽ । । ऽ । । ऽ

नजजलगैर्गदिता सुमुखी॥ ४॥

तरणिसुतातटकुञ्जगृहे वदनविधुस्मितदीधितिभिः।
तिमिरमुदस्य वृतं सुमुखी हरिमवलोक्य जहास चिरम्॥

प्र०—नजजेति। यस्या एकपादे क्रमेण नगणः, जगणः जगणः, एको लघुः,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एको गुरुश्च भवन्ति, सा सुमुखी नाम।

तरणीति। सुमुखी काचित् सुन्दरवदना गोपी, तरणिसुतातटकुञ्जगृहे यमुनातीरस्थलतामण्डपे, वदनविधोः मुखचन्द्रस्य स्मितदीधितिभिः ईषद्धास्यज्योत्स्नाभिः, तिमिरं लतामण्डपान्धकारम्, उदस्य प्रक्षिप्य, वृतं गुप्तम् अदृष्टमित्यर्थः, हरिं कृष्णम्, अवलोक्य दृष्ट्वा, चिरं बहुकालं, जहास अहसत्। गोपी 'मामन्धकारयुक्ते लतामण्डपे द्रष्टुं न शक्नोती'ति निलीनं कृष्णं सा गोपी समासाद्य 'त्वं धृष्टोऽसी'ति कथयित्वा चिरं हसितवती। क्वचित् पुस्तके—'तिमिरमुदस्य मुखं सुमुखी हरिमवलोक्य चुचुम्ब चिरम्' इति पाठः। तत्र ज्योत्स्नया सुस्पष्टं हरेर्मुखं चुम्बितवतीत्यर्थो बोध्यः। अत्र रूपकमतिशयोक्तिश्चालङ्कारौ।

रु०—जिस छन्द के एक पाद में क्रम से नगण, दो जगण, एक लघु और एक गुरु होते हैं, वह 'सुमुखी' छन्द कहलाता है।

कोई गोपी यमुना-तट के लतामण्डप में अपने मुखचन्द्र की हास्यकिरण से वहाँ के अन्धकार को दूर कर छिपे हुए कृष्ण को देखकर बहुत देर तक हँसी। गोपी से बचने के लिए अन्धकारयुक्त लतामण्डप में कृष्ण छिप गये, परन्तु गोपी उनको खोजकर और शठ कहकर बहुत हँसी। किसी पुस्तक में-'तिमिरमुदस्य मुखं सुमुखी हरिमवलोक्य चुचुम्ब चिरम्', ऐसा पाठ है। वहाँ—गोपी ने श्रीकृष्ण के मुख का चुम्बन किया—ऐसा अर्थ जानना चाहिए। यहाँ रूपक और अतिशयोक्ति अलङ्कार है ॥ ४ ॥

म त त ग ग

ऽ ऽ ऽ ऽ ऽ । ऽ ऽ । ऽ ऽ

मात्तौ गौ चेच्छालिनी वेदलोकैः ॥ ५ ॥

अंहो हन्ति ज्ञानवृद्धिं विधत्ते धर्मं दत्ते काममर्थं च सूते।
मुक्तिं दत्ते सर्वदोपास्यमाना पुंसां श्रद्धाशालिनी विष्णुभक्तिः ॥

प्र०—मात्ताविति। यस्या एकपादे मात् मगणात् परं, तौ द्वौ तगणौ, गौ द्वौ गुरुवर्णौ चेद् यदि भवतः, तदा शालिनी नाम वृत्तम्। अत्र वेदैश्चतुर्भिः, लोकैः सप्तभिश्च वर्णैर्यतिः कार्या।

अंहो हन्तीति। श्रद्धाशालिनी विश्वासयुक्ता, विष्णुभक्तिः कृष्णानुरागः, सर्वदा नित्यम्, उपास्यमाना प्रस्तूयमाना सती, पुंसां मनुष्याणाम्, अंहः दुष्कृतम् 'कलुषं वृजिनैनोऽघमंहोदुरितदुष्कृतम्' इत्यमरः, हन्ति नाशयति। ज्ञानवृद्धिं विवेका-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तिशयं, विधत्ते उत्पादयति। धर्मं पुण्यं, दत्ते वितरति। कामम् ईप्सितम्, अर्थञ्च धनञ्च, सूते जनयति। मुक्तिं मोक्षं, दत्ते वितरति। अतः सर्वदा सर्वदा कृष्णभक्तिः कर्तव्येति भावः। 'अथ कारकमेकं स्यादनेकासु क्रियासु चेत्' इति लक्षणाद् दीपकालङ्कारः।

हि०—जिस छन्द के प्रत्येक पाद में क्रमशः मगण, दो तगण और दो गुरु होते हैं, वह 'शालिनी' वृत्त होता है। इस छन्द में चौथे और सातवें वर्ण पर यति करनी चाहिये।

सदा श्रद्धा से की गई विष्णुभक्ति पाप नष्ट करती है, ज्ञान की वृद्धि करती है, पुण्य उत्पन्न करती है, कामनाओं और धन को पैदा करती है, मुक्ति को देती है, इसलिए सदा सब देनेवाले विष्णुभक्ति करनी चाहिए। यहाँ दीपक अलङ्कार है।

म भ त ग ग

S S S S I I S S I S S

वातोर्मीयं गदिता म्भौ तगौ गः॥ ६॥

ध्याता मूर्तिः क्षणमप्यच्युतस्य श्रेणी नाम्नां गदिता हेलयापि।
संसारेऽस्मिन् दुरितं हन्ति पुंसां वातोर्मी पोतमिवाम्भोधिमध्ये॥

प्र०—वातोर्मीति। यस्या एकपादे क्रमेण मगणः, भगणः, तगणः, द्वौ गुरू च भवतः सा वातोर्मी नाम भवति।

ध्यातेति। अच्युतस्य कृष्णस्य, मूर्तिः प्रतिमा, क्षणमपि स्वल्पकालमपि, ध्याता स्मृता सती, नाम्नां श्रेणी कृष्णहरिप्रभृतयो नामसमूहाः, हेलया क्रीडया अनिच्छयापि, गदिता उच्चारिता सती, अस्मिन् संसारे जगति पुंसां नराणां दुरितं दुष्कृतं, वातोर्मी वायुसञ्जातवीचिः अम्भोधिमध्ये समुद्रमध्ये, पोतं यानम् इव, हन्ति नाशयति।

हि०—जिस छन्द के एक पाद में क्रम से मगण, भगण, तगण और दो गुरुवर्ण होते हैं, वहाँ 'वातोर्मी' नामक छन्द होता है।

थोड़ी देर भी ध्यान में लाई हुई श्रीकृष्ण की मूर्ति तथा अनिच्छा से भी कहे गये उनके नामसमूह इस संसार में मनुष्यों के पापों को वैसे ही नष्ट कर देते हैं जैसे समुद्र के बीच में तूफानी लहरें जहाज को॥ ६॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

म ग न न ग

ऽऽऽऽऽ।।।।।।ऽ

मो गो नौ गो भ्रमरविलसिता ॥ ७ ॥

भ्रमरविलसितं क्वापि ।

मुग्धे ! मानं परिहर नचिरात्तारुण्यं ते सफलयतु हरिः ।
फुल्ला वल्ली भ्रमरविलसिताभावे शोभां कलयति किमु ताम् ?

प्र०—मो ग इति । यस्या एकपादे क्रमशः मगणः, एको गुरुः, द्वौ नगणौ, एको गुरुश्च भवन्ति, सा भ्रमरविलसिता नाम ।

मुग्धे इति । हे मुग्धे । हे सुन्दरि । मानं गर्वं, परिहर त्यज । हरिः कृष्णः ते तव, तारुण्यं यौवनं, न चिरात् झटिति, सफलयतु सार्थकं करोतु, 'तारुण्यं यौवनं समे' इत्यमरः । अन्यथा तारुण्यस्य वैयर्थ्यमुदाहरणेन बोधयति—फुल्लेति । फुल्ला विकसिता, वल्ली लता 'वल्ली तु व्रततिर्लता' इत्यमरः, भ्रमरविलसिताभावे मधुपलास्यविरहे, तां तादृशीं, शोभां श्रियं कलयति धारयति किमु ? न धारयतीत्यर्थः । भ्रमरविलासैरेव पुष्पितलतासाफल्यमिति भावः । अत्र दृष्टान्तालङ्कारः ।

हि०—जिस छन्द के प्रत्येक पाद में क्रमशः मगण, एक गुरु, दो नगण और एक गुरु वर्ण होते हैं, वह 'भ्रमरविलसिता' छन्द कहलाता है ।

हे सुन्दरि ! तू अभिमान को छोड़ दे । श्रीकृष्ण तेरे यौवन को शीघ्र ही सफल करें । भ्रमरों की क्रीडा के बिना क्या खिली हुई लता की वैसी शोभा होती है ? अर्थात् नहीं । जिस प्रकार भ्रमर-क्रीडा से पुष्पित लता की सफलता है, इसी प्रकार श्रीकृष्णद्वारा तेरा यौवन सफल हो । यहाँ दृष्टान्त अलङ्कार है ॥ ७ ॥

भ त न ग ग

ऽ।।ऽऽ।।।।ऽऽ

स्यादनुकूला भतनगगाश्चेत् ॥ ८ ॥

वल्लववेशा मुररिपुमूर्तिर्गोपमृगाक्षीकृतरतिपूर्तिः ।
वाञ्छितसिद्ध्यै प्रणतिपरस्य स्यादनुकूला जगति न कस्य ?

प्र०—स्यादिति । चेत् यदि, एकपादे क्रमेण भगणः, तगणः, नगणः, द्वौ गुरू च भवतः, तदा अनुकूला नाम वृत्तं भवति ।

वल्लवेति । वल्लववेशा गोपसदृशनेपथ्या, गोपमृगाक्षीभिः गोपकान्ताभिः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कृता रतिपूर्तिः विहितो रागातिशयः कृतः कामातिशयो वा यस्याः सा, मुररिपु-मूर्तिः कृष्णशरीरं, जगति संसारे, प्रणतिपरस्य विनतस्य, कस्य मनुष्यस्य, वाञ्छित-सिद्धयै इष्टपूर्त्यै, अनुकूला साहाय्यकारी न स्यात् ? सर्वेषां प्रणतजनानामिष्टं सदा कृष्णः पूरयतीति स सर्वदोपास्य इति भावः ।

हि०—यदि क्रम से भगण, तगण, नगण और दो गुरु होते हैं, तो 'अनुकूला' नामक छन्द होता है ।

गोपसदृशवेशयुक्त, गोपियों द्वारा किये गये कामातिशय से युक्त, कृष्ण का शरीर किस विनीत भक्त के इष्ट का पूरण करने में सहायक नहीं होता ? अर्थात् कृष्ण सदा विनीत भक्तों के अभीष्ट की पूर्ति करते हैं ॥ ८ ॥

र न र ल ग

S I S I I I S I S I S

रात् परैर्नरलगै रथोद्धता ॥ ९ ॥

राधिका दधिविलोडनस्थिता कृष्णवेणुनिनदैरथोद्धता ।
यामुनं तटनिकुञ्जमञ्जसा सा जगाम सलिलाहृतिच्छलात् ॥

प्र०—रात्परैरिति । यस्या एकपादे रात् रगणात् परं, क्रमशः नगणः, रगणः, एको लघुः, एको गुरुश्चभवन्ति, सा रथोद्धता नाम ।

राधिकेति । दधिविलोडने दधिमन्थनकृत्ये स्थिता व्यापृता, सा राधिका, कृष्णवेणुनिनदैः वासुदेववादितमुरलीध्वनिभिः, उद्धता विकला सती, अथ दधि-मन्थनसमाप्तौ, सलिलाहृतिच्छलात् जलानयनव्याजेन, अञ्जसा त्वरितं, यामुनं कालिन्दीयं, तटनिकुञ्जं कूलसमीपवर्ति लतामण्डपं, जगाम गतवती । अत्रालङ्कारौ काव्यलिङ्गमपह्नुतिश्च ।

हि०—जिस छन्द के एक पाद में क्रमशः रगण से परे नगण, रगण, एक लघु और एक गुरु होते हैं, वह 'रथोद्धता' नामक छन्द है ।

दही बिलोने में लगी हुई राधिका कृष्ण की वंशी के शब्द को सुन व्याकुल होकर शीघ्र ही जल लाने के बहाने यमुना-किनारे के लतामण्डप में चली गई । यहां काव्यलिङ्ग और अपह्नुति अलङ्कार हैं ॥ ९ ॥

र न भ ग ग

S I S I I I S I I S S

स्वागता रनभगैर्गुरुणा च ॥ १० ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यस्य चेतसि सदा मुरवैरी बल्लवीजनविलासविलोलः ।
तस्य नूनममरालयभाजः स्वागतादरकरः सुरराजः ॥

प्र०—स्वागतेति । यस्यां एकपादे क्रमेण रगणः, नगणः, भगणः द्वौ गुरुवर्णौ च भवन्ति, सा स्वागता नाम ।

यस्येति । बल्लवीजनेषु गोपीषु, विलासे क्रीडायां, विलोलः लग्नः बल्लवीजनविलासविलोलः, मुरवैरी कृष्णः, यस्य भक्तस्य, चेतसि हृदये, सदा अस्ति, सुरराजः इन्द्रोऽपि, अमरालयभाजः स्वर्गं प्राप्तस्य, तस्य भक्तस्य, स्वागतेन शुभागमनेन 'सुखेन आगतो भवान् ?' इति प्रश्नेन आदरकरः सम्मानकरः, नूनं निश्चयेन भवेदिति । कृष्णभक्तः स्वर्गंगत इन्द्रेण सम्मान्यत इति भावः । काव्यलिङ्गमलङ्कारः ।

हि०—जिस छन्द के एक पाद में क्रम से रगण, नगण, भगण और दो गुरु होते हैं, वह 'स्वागता' छन्द होता है ।

गोपियों के साथ क्रीडा में आसक्त कृष्ण जिस भक्त के हृदय में सदा निवास करते हैं, स्वर्ग में जाने पर उस भक्त का इन्द्र भी स्वागत करते हैं । यह काव्यलिङ्ग अलङ्कार है ।

भ भ भ ग ग

ऽ।। ऽ।। ऽ।। ऽ ऽ

दोधकमिच्छति भत्रितयाद् गौ ॥ ११ ॥

देव ! सदोध ! कदम्बतलस्थ ! श्रीधर ! तावकनामपदं मे ।
कण्ठतलेऽसुविनिर्गमकाले स्वल्पमपि क्षणमेष्यति योगम् ? ॥

प्र०—दोधकमिति । भत्रितयात् भगणत्रयात् परं, यदि गौ द्वौ गुरुवर्णौ भवतः, तदा दोधकं नाम वृत्तम् ।

देवेति । हे सदोध ! सवत्स ! 'वत्सः शकृत्करिर्दोग्धा दोधको दोध इत्यपि' इति कोषः । हे कदम्बतलस्थ ! हे श्रीधर ! लक्ष्मीपते ! तावकनामपदं तव कृष्ण इति नाम, असुविनिर्गमकाले मृत्युसमये मे मम, कण्ठतले मुखे, स्वल्पं क्षणमपि अत्यल्पकालमपि, योगं सम्बन्धम्, एष्यति प्राप्स्यति ? मृत्युसमये मम मुखात् कृष्णनाम निर्गमिष्यतीति भावः ।

हि०—जिस छन्द में तीन भगण के बाद दो गुरु होते हैं, उसका नाम 'दोधक' छन्द है ।

हे वत्ससहित विराजमान ! कदम्बतलस्थ श्रीपति कृष्ण ! तुम्हारा कृष्ण नाम

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मृत्यु के समय मेरे मुख में क्षणभर के लिये संयुक्त होगा? अर्थात् मृत्युसमय में मेरे मुख से कृष्ण नाम निकलेगा?

त ज ज ल ग

S S I I S I I S I I S

स्यान्मोटनकं तजजाश्च लगौ ॥ १२ ॥

रङ्गे खलु मल्लकलाकुशलश्चाणूरमहाभटमोटनकम्।
यः केलिलवेन चकार स मे संसाररिपुं परिमोटयतु ॥

प्र०—स्यादिति। यस्यैकपादे क्रमशः तगणः, द्वौ जगणौ, एको लघुः, एको गुरुश्च भवन्ति, तत् मोटनकं नाम वृत्तम्।

रङ्ग इति। रङ्गे युद्धभूमौ, मल्लकलाकुशलः बाहुयुद्धविद्यादक्षः, यः कृष्णः, केलिलवेन अल्पक्रीडया, चाणूरमहाभटस्य चाणूराख्यश्रेष्ठयोधस्य मोटनकं विनाशं, चकार कृतवान, स कृष्णः मे मम, संसाररिपुं स्वकर्मानुरूपं पुनः पुनरुत्पत्तिरूपशत्रुं परिमोटयतु नाशयतु। अत्र रूपकमलङ्कारः।

रु०—जिस छन्द के एक पाद में क्रमशः तगण, दो जगण, एक लघु और एक गुरु वर्ण होते हैं, वह 'मोटनक' छन्द होता है।

बाहुयुद्ध-विद्या में निपुण जिन श्रीकृष्ण ने रणक्षेत्र में चाणूर-नामक महाबलवान् योधा को खेल-खेल में मारा है, वे कृष्ण मेरे संसाररूपी शत्रु को नष्ट कर दें, जिससे फिर मैं जन्म न लूं। यहां रूपक अलङ्कार है ॥ १२ ॥

र ज र ल ग

S I S I S I S I S I S

श्येन्युदीरिता रजौ रलौ गुरुः ॥ १३ ॥

यस्य कीर्तिरिन्दुकुन्दचन्दनश्येन्यशेषलोकपावनी सदा।
जाह्नवीव विश्ववन्द्यविभ्रमा तं भजामि भावगम्यमच्युतम् ॥

प्र०—श्येनीति। यस्या एकपादे क्रमशः रगणः, जगणः, रगणः, एको लघुः, एको गुरुश्च भवन्ति, सा श्येनी नाम।

यस्येति। यस्य कृष्णस्य, कीर्तिः यशः, जाह्नवीव भागीरथीव, इन्दुः चन्द्रः, कुन्दं माघ्यम् चन्दनञ्च तद्वत् श्येनी श्वेतवर्णा, सदा नित्यम्, अशेषलोकपावनी सम्पूर्णभुवनपवित्रकारिणी, विश्ववन्द्यविभ्रमा संसारपूजनीयविलासा। गङ्गापि चन्द्रवद् धवला त्रिलोकपावनी समस्तसंसारवन्द्यप्रचारा च भवति। तादृशी च यस्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कृष्णस्य कीर्तिः, तं भावगम्यं भक्तिप्राप्यम्, अच्युतं कृष्णं, भजामि आश्रयामि। उपमालङ्कारः।

१०—जिस छन्द के एक पाद में क्रमशः रगण, जगण, रगण, एक लघु और एक गुरुवर्ण होते हैं, उसे 'श्येनी' छन्द कहते हैं।

चन्द्रमा, कुन्दपुष्प तथा चन्दन के सदृश स्वच्छ, समस्त संसार के पूजनीय गङ्गा के सदृश जिन कृष्ण की कीर्ति समस्त लोक को पवित्र करती है, उन भक्तिसे प्राप्त होने योग्य कृष्ण का मैं भजन करता हूँ। यहां उपमा अलङ्कार है ॥ १३ ॥

पुस्तकान्तरेषु वृत्तानीमान्यधिकानि दृश्यन्तेऽस्यां वृत्तौ—

न न ल ग ग

। । । । । । । । S S S

ननलगगुरुरचिता वृत्ता ॥ १ ॥

न न र ल ग

। । । । । । S । S । S

ननरलगुरुभिश्च भद्रिका ॥ २ ॥

ज स त ग ग

। S । । । S S S । S S

उपस्थितमिदं जसौ ताद् गकारौ ॥ ३ ॥

ज स त ग ग

। S । । । S S S । S S

शिखण्डितमिदं जसौ तगौ गुरुश्चेत् ॥ ४ ॥

स स स ल ग

। । S । । S । । S । S

उपचित्रमिदं सससाल्लगौ ॥ ५ ॥

न न र ग ग

। । । । । । S । S S S

कुपुरुषजनिता ननौ गौं गः ॥ ६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न य भ गग

।।।।SS S।।SS

अनवसिता न्यौ भ्गौ गुरुरन्ते ॥ ७ ॥

त त त गग

SS।SS।SS।SS

विष्वङ्कमाला भवेत्तौ तगौ गः ॥ ८ ॥

भ त न गल

S।।SS।।।।S।

सान्द्रपदं स्याद् भतनगलैश्च ॥ ९ ॥

र ज स लग

S।S।S।।।S।S

रेण जेन सेन लगयोर्वृत्ता ॥ १० ॥

न र र लग

।।।S।SS।S।S

नररलैर्गुरुविन्द्रिवा मता ॥ ११ ॥

प्र०—ननसेति। यस्या एकपादे क्रमशो नगणद्वयं, सगणो, द्वौ गुरुवर्णौ च भवन्ति, सा वृत्ता नाम ॥ १ ॥

ननरलेति। यत्र क्रमेण द्वौ नगणौ, रगणः, लघुः, गुरुश्च भवन्ति, सा भद्रिका नाम ॥ २ ॥

उपस्थितमिति। यत्र क्रमेण जगणः, सगणः, तगणः, द्वौ गुरुवर्णौ च भवन्ति, तत् उपस्थितं नाम वृत्तं भवति ॥ ३ ॥

शिखण्डितमिति। यस्यैकपादे क्रमेण जगणः, सगणः, तगणः, द्वौ गुरुवर्णौ च भवन्ति, तत् शिखण्डितं नाम वृत्तम्। पूर्ववृत्तस्यैव नामान्तरमिदम्, सदृशलक्षणत्वात् ॥ ४ ॥

उपचित्रमिति। यस्यैकपादे क्रमेण त्रयः सगणाः, एको लघुः, एको गुरुश्च भवन्ति, तद् उपचित्रं नाम वृत्तम् ॥ ५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कुपुरुषेति । यस्या एकपादे क्रमेण नगणौ, रगणः द्वौ गुरुवर्णौ च भवन्ति, सा कुपुरुषजनिता नाम ॥ ६ ॥

अनवसितेति । यस्या एकपादे क्रमेण नगणः, यगणः, भगणः, द्वौ गुरुवर्णौ च भवन्ति, सा अनवसिता नाम ॥ ७ ॥

विष्वंकेति । यस्या एकपादे क्रमशः त्रयस्तगणाः द्वौ गुरुवर्णौ च भवन्ति, सा विष्वङ्कमाला नाम ॥ ८ ॥

सान्द्रपदमिति । यस्यैकपादे क्रमेण भगणः, तगणः नगणः, एको गुरुः, एको लघुश्च भवन्ति, तत् सान्द्रपदं नाम वृत्तम् ॥ ९ ॥

रेणेति । यस्या एकपादे क्रमेण रगणः, जगणः, सगणः, एको लघुः, एको गुरुश्च भवन्ति, सा द्रुता नाम ॥ १० ॥

नररलैरिति । यस्या एकपादे क्रमेण नगणः, द्वौ रगणौ, एको लघुः, एको गुरुश्च भवन्ति, सा इन्दिरा नाम । जयति तेऽधिकं जन्मना व्रज' इत्युदाहरणम् । 'ते तव, जन्मना उत्पत्त्या, व्रजः व्रजभूमिः, अधिकं जयति शोभां लभत इत्यर्थः ॥११॥

रु०—जिस छन्द में क्रमशः दो नगण, सगण, दो गुरु वर्ण होते हैं, वह 'वृत्ता' नामक छन्द होता है ॥ १ ॥

जिस छन्द में क्रमशः दो नगण, रगण, एक लघु और एक गुरु वर्ण होते हैं, उसे 'भद्रिका' छन्द कहते हैं ॥ २ ॥

जिस छन्द के प्रत्येक पाद में क्रमशः जगण, सगण, तगण और दो गुरु वर्ण होते हैं, उसे 'उपस्थित' छन्द कहते हैं ॥ ३ ॥

जिस छन्द के प्रत्येक पाद में क्रमशः जगण, सगण, तगण और दो गुरु वर्ण होते हैं, उसे 'शिखण्डित' छन्द कहते हैं । पूर्व छन्द का यह नामान्तर ही है । दोनों के लक्षण समान हैं ॥ ४ ॥

जिस छन्द के प्रत्येक पाद में क्रमशः तीन सगण, एक लघु और एक गुरु वर्ण होते हैं, उसे 'उपचित्र' छन्द कहते हैं ॥ ५ ॥

जिस छन्द के प्रत्येक पाद में क्रमशः दो नगण, रगण और दो गुरु वर्ण होते हैं, उसे 'कुपुरुषजनिता' नामक छन्द कहते हैं ॥ ६ ॥

जिस छन्द के प्रत्येक पाद में क्रमशः नगण, यगण भगण और दो गुरु वर्ण होते हैं, उसे 'अनवसिता' छन्द कहते हैं ॥ ७ ॥

जिस छन्द में क्रम से तीन तगण और दो गुरु होते हैं, उसे 'विष्वङ्कमाला' छन्द कहते हैं ॥ ८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जिस छन्द में क्रम से भगण, तगण, नगण, एक गुरु और एक लघु वर्ण होता है, उसे 'सान्द्रपद' छन्द कहते हैं ॥ ९ ॥

जिस छन्द में क्रम से रगण, जगण, सगण, एक लघु और एक गुरु होते हैं; उसे 'द्रुता' छन्द कहते हैं ॥ १० ॥

जिस छन्द में क्रम से नगण, दो रगण, एक लघु और गुरु वर्ण होते हैं, उसे 'इन्दिरा' छन्द कहते हैं। उदाहरणार्थ—हे कृष्ण! तेरे जन्म से यह व्रजभूमि अधिक शोभा को प्राप्त हो रही है ॥ ११ ॥

(१२) जगती (द्वादशाक्षरा वृत्तिः)

र	न	भ	स
ऽ।ऽ	।।।	ऽ।।	।।ऽ

चन्द्रवर्त्म निगदन्ति रनभसैः ॥ १ ॥

चन्द्रवर्त्म पिहितं घनतिमिरै राजवर्त्म रहितं जनगमनैः।
इष्टवर्त्म तदलङ्कुरु सरसे! कुञ्जवर्त्मनि हरिस्तव कुतुकी ॥

प्र०—चन्द्रेति। यस्यैकपादे क्रमेण रगणः, नगणः, भगणः सगणश्च भवन्ति, तत् चन्द्रवर्त्म नाम वृत्तं भवति।

चन्द्रेति। हे सरसे! रसिके! घनतिमिरैः घोरान्धकारैः मेघान्धकारैर्वा, चन्द्रवर्त्म गगनं, पिहितम् आच्छादितम्। अपिपूर्वस्य धा धातोः कर्मणि क्तः। अपेरकारलोपो 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः' इति नियमात्। 'अपिधानतिरोधानपिधानाच्छादनानि च' इत्यमरः। राजवर्त्म राजपथः, जनगमनैः मनुष्यगमनागमनैः, रहितं मुक्तम्, राजमार्गे न कश्चिज्जन इत्यर्थः। तत् तस्मात्, त्वं गोपी, इष्टवर्त्म अभिलषितमार्गम्, अलङ्कुरु गच्छ, साङ्केतिकस्थानं गच्छेत्यर्थः। हरिः कृष्णः, तव ते, कुञ्जवर्त्मनि लतामण्डपमार्गे, कुतुकी उत्सुकः तिष्ठति। अद्य तव गमनं सर्वथा निर्विघ्नमिति भावः।

रु०—जिस छन्द के एक पाद में क्रम से रगण, नगण, भगण और सगण होते हैं, उसे 'चन्द्रवर्त्म' छन्द कहते हैं।

हे रसिके! आज आकाश बादलों से ढका हुआ है, राजमार्ग मनुष्यों से शून्य है, इसलिए अपने इष्ट सांकेतिक स्थान को जा, कृष्ण लतामण्डप के मार्ग में उत्कण्ठित होकर तेरी प्रतीक्षा कर रहे हैं ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ज त ज र

। ऽ । ऽ ऽ । । ऽ । ऽ । ऽ

वदन्ति वंशस्थबिलं जतौ जरौ ॥ २ ॥

विलासवंशस्थविलं मुखानिलैः प्रपूर्य यः पञ्चमरागमुद्गिरन् ।
व्रजाङ्गनानामपि गानशालिनां जहार मानं स हरिः पुनातु नः ॥

वंशस्तनितमिति क्वापि ।

प्र०—वदन्तीति । यस्यैकपादे क्रमेण जगणः, तगणः, जगणः, रगणश्च भवन्ति, तद् वंशस्थविलं नाम वृत्तम् ।

विलासेति । यः हरिः कृष्णः, मुखानिलैः मुखवायुभिः, विलासवंशस्थविलं क्रीडार्थमुरलीच्छिद्रं, प्रपूर्य पूर्णं कृत्वा, पञ्चमरागं पञ्चमनामकरागम्, उद्गिरन् उच्चारयन् ।

'निषादर्षभगान्धारषड्जमध्यमधैवताः ।
पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः ।' इत्यमरः ।

व्रजाङ्गनानां व्रजवधूनां, गानशालिनां नारदादीनामपि, मानं प्रेमाभिमानं पक्षे नायकत्वगर्वं च, जहार हृतवान्, सः कृष्णः, नः अस्मान्, पुनातु पवित्रान् करोतु ।

इ०—जिस छन्द में क्रम से जगण, तगण, जगण और रगण होते हैं, उसे 'वंशस्थविल' छन्द कहते हैं ।

जिस कृष्ण ने क्रीडा की वंशी के छिद्रों को मुख की वायु से भरकर पञ्चमराग से गाते हुए व्रजवधुओं और नारदादि गायनाचार्यों के अभिमान को हर लिया, वे कृष्ण हमको पवित्र करें ॥ २ ॥

त त ज र

ऽ ऽ । ऽ ऽ । । ऽ । ऽ । ऽ

तच्चेन्द्रवंशा प्रथमेऽक्षरे गुरौ* ॥ ३ ॥

दैत्येन्द्रवंशाग्निरुदीर्णदीधितिः पीताम्बरोऽसौ जगतां तमोऽपहः ।
यस्मिन्नमज्जुः शलभा इव स्वयं ते कंसचाणूरमुखा मखद्विषः ॥

प्र०—तच्चेति । वंशस्थविलस्य प्रथमेऽक्षरे गुरौ सति इन्द्रवंशावृत्तं भवति ।

दैत्येन्द्रेति । उदीर्णदीधितिः प्रसृतकिरणः, जगतां समस्तभुवनानां, तमो-

* 'स्यादिन्द्रवंशा ततजै रसंयुतैः' इति वृत्तरत्नाकरे ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ऽपहः पापान्धकारनाशकः, असौ पीताम्बरः कृष्णः, दैत्येन्द्रवंशाग्निः श्रेष्ठराक्षसकुलरूपवेणुदाहकवह्निः, आसीत्। यस्मिन् कृष्णरूपवह्नौ, ते प्रख्याताः, मखद्विषः यागविनाशकाः, कंसचाणूरमुखाः कंसचाणूरप्रमुखाः, शलभाः पतङ्गा इव, स्वयमेव ममज्जुः मग्ना अभूवन्। अग्निर्यथा पतङ्गान् ज्वलयति तथा कृष्णेन चाणूरादयो राक्षसा नाशिताः। रूपकोपमे अलङ्कारौ।

रु०—वंशस्थविल छन्द के प्रथम वर्ण के गुरु होने पर 'इन्द्रवंशा' छन्द होता है।
तेजोमय समस्त संसार के पापों के नाशक कृष्ण बड़े बड़े राक्षसों के कुलरूपी बांसों के लिये दाहक अग्नि थे। जिस कृष्णरूपी अग्नि में यज्ञों का विध्वंस करनेवाले कंस, चाणूर–आदि दैत्य पतङ्गों के सदृश पड़कर भस्म हो गये। यहां रूपक और उपमा अलङ्कार हैं ॥ ३ ॥

ज स ज स

। ऽ । । । ऽ । ऽ । । । ऽ

जसौ जसयुतौ जलोद्धतगतिः ॥ ४ ॥

(क) यदीयहलतो विलोक्य विपदं कलिन्दतनया जलोद्धतगतिः।
विलासविपिनं विवेश सहसा करोतु कुशलं हली स जगताम् ॥
(ख) सनाकवनितं नितम्बरुचिरं चिरं सुनिनदैर्नदैर्वृतममुम्।
मता फणवतोऽवतो रसपरा परास्तवसुधा सुधाधिवसति ॥
इति भारविः।

प्र०—जसाविति। यस्या एकपादे क्रमेण जगणः, सगणः, पुनः जगणः, सगणश्च भवन्ति, सा जलोद्धतगतिर्नाम।

(क) यदीयेति। जलैः वीचिमयसञ्चारैः उद्धतगतिः तीव्रगतिः, कलिन्दतनया कालिन्दी, यदीयहलतो यस्य लाङ्गलात्, विपदम् आपत्तिं, विलोक्य दृष्ट्वा, सहसा सत्वरं, विलासविपिनं क्रीडाकाननं, विवेश जगाम। बलरामस्य जलक्रीडार्थमिति भावः। स हली बलरामः, जगतां भुवनानां, कुशलं शुभं, करोतु सम्पादयतु। कदाचित् गोपीभिः सह जलक्रीडाकामनया बलरामो यमुनामाहूतवान्। सा हलाकर्षणभयेन स्वयं क्रीडावनमागतेति पुराणवार्ताऽनुसन्धेया।

(ख) सनाकेति। सनाकवनितम् अप्सरःसहितं, नितम्बरुचिरं कटककमनीयं 'कटकोऽस्त्री नितम्बोऽद्रे'रित्यमरः, सुनिनदैः शोभनतरङ्गरवैः, नदैः जलप्रवाहैश्च, वृतं व्याप्तम्, अमुं पर्वतम्, अस्मिन् गिरौ, 'अधिशीङ्स्थासां कर्मे'ति सप्तम्याः स्थाने द्वितीया, रसपरा श्रेष्ठास्वादयुक्ता, परास्तवसुधा त्यक्तवसुन्धरा, अवतः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धरां रक्षतः, फणावतः शेषस्य, मता इष्टा, सुधा अमृतम्, अधिवसति तिष्ठति। पृथिव्यां न क्वापि सुधा, अत्रैव सा केवलमिति भावः।

रु०—जिस छन्द के एक पाद में क्रम से जगण, सगण, जगण और सगण होते हैं, उसे 'जलोद्धतगति' छन्द कहते हैं।

(क) लहरों से तीव्रगामिनी यमुना हल से आपत्ति देखकर सहसा जिन बलराम के क्रीडावन में आ गई वे बलराम संसार को सकुशल करें। 'एक बार गोपियों के साथ जलक्रीडा के लिए मत्त बलराम ने यमुना को बुलाया। वह हल से खींचे जाने के भय से स्वयं उनके क्रीडावन में आ गई।' ऐसी पौराणिक कथा है।

(ख) अप्सराओं से सेवित अधोभाग तथा नदियों की मधुर ध्वनि से युक्त इस पर्वत पर ही मधुर, शेषनाग से वाञ्छित, अमृत पृथ्वी को छोड़ कर विद्यमान है। अर्थात् अमृत पृथ्वी पर कहीं नहीं है, केवल इस पर्वत पर ही है ॥ ४ ॥

य य य य

ISS ISS ISS ISS

भुजङ्गप्रयातं चतुर्भिर्यकारैः ॥ ५ ॥

सदारात्मजज्ञातिभृत्यो विहाय स्वमेतं ह्रदं जीवनं लिप्समानः।
मया क्लेशितः कालियेत्थं कुरु ! त्वं भुजङ्ग ! प्रयातं द्रुतं सागराय ॥

प्र०—भुजङ्गेति। चतुर्भिः यगणैर्युक्तं भुजङ्गप्रयातं नाम वृत्तं भवति।

सदारेति। हे कालिय! सर्प! त्वं मया इत्थम् एवं प्रकारेण, क्लेशितः पीडितः, असि। सदारात्मजज्ञातिभृत्यः पत्नीपुत्रबन्धुभृत्यादियुक्तः, जीवनं जीवितं जलञ्च, 'जीवनं भुवनं वनम्' इत्यमरः, जलपर्याया एते, लिप्समानः प्राप्तुमिच्छन्, एतं स्वं, ह्रदं कालियाभिधेयं सरः, विहाय मुक्त्वा, द्रुतं झटिति, सागराय समुद्राय, प्रयातं प्रस्थानं कुरु विधेहि। अन्यथा नैव ते कुशलमिति भावः।

रु०—जिस छन्द में क्रमशः चार यगण होते हैं, उसे 'भुजङ्गप्रयात' छन्द कहते हैं।

हे कालियसर्प! तू इस प्रकार मेरे द्वारा पीडित, पत्नी-पुत्र-बन्धु-भृत्यादि के साथ जीवन और जल चाहता हुआ शीघ्र ही इस तालाब को छोड़ कर समुद्र में चला जा। नहीं तो यहाँ मारा जायगा ॥ ५ ॥

स स स स

IIS IIS IIS IIS

वद तोटकमब्धिसकारयुतम् ॥ ६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यमुनातटमच्युतकेलिकलालसदङ्घ्रिसरोरुहसङ्गरुचिम् ।
मुदितोऽट कलेरपनेतुमघं यदि चेच्छसि जन्म निजं सफलम् ॥

प्र०—वदेति । अब्धिसकारयुतं सगणचतुष्टययुक्तं तोटकं नाम वृत्तं भवति ।

यमुनेति । हे साधो ! यदि कलेः कलियुगस्य, अघं पापम्, अपनेतुं परिहर्तुं, निजं जन्म स्वजीवितं, सफलं सार्थकं च, कर्तुमिच्छसि, तदा मुदितः प्रसन्नः, अच्युतकेलिकलया कृष्णनृत्यविधया, लसदङ्घ्रिसरोरुहस्य, विलासयुक्तपादपद्मस्य, सङ्गेन सम्पर्केण, रुचिः मनोरमकान्तिर्यस्य तत्, यमुनातटं कालिन्दीकूलम्, अट विहर । 'कूलं रोधश्च तीरश्च प्रतीरश्च तटं त्रिषु' इत्यमरः । 'रुचिः स्वादे मयूखे च रुचिः शोभाभिलाषयोः' इति मेदिनी ।

हि०—जिस छन्द के प्रत्येक पाद में चार सगण होते हैं उसे 'तोटक' छन्द कहते हैं।

हे साधो ! यदि तू कलिकाल के पाप को दूर करना चाहता है और अपने जीवन को सफल करना चाहता है, तो कृष्ण के नृत्यकालिक विलासयुक्त पादपद्मों के सम्पर्क से सुन्दर शोभायमान यमुना के किनारे विचरण कर ॥ ६ ॥

र र र र

ऽ । ऽ ऽ । ऽ ऽ । ऽ ऽ । ऽ

कीर्तितैषा चतू रेफिका स्रग्विणी ॥ ७ ॥

इन्द्रनीलोपलेनेव या निर्मिता शातकुम्भद्रवालङ्कृता शोभते ।
नव्यमेघच्छविः पीतवासा हरेर्मूर्तिरास्तां जयायोरसि स्रग्विणी ॥

प्र०—कीर्तितेति । यस्या एकपादे चत्वारो रगणा भवन्ति, सा स्रग्विणी नाम ।

इन्द्रेति । या, नव्यमेघच्छविः नूतनपयोधरकान्तिसदृशकान्तियुक्ता, पीतवासाः पीताम्बरयुक्ता, अत एव इन्द्रनीलोपलेन मरकतमणिना, निर्मिता विरचिता, एवं शातकुम्भद्रवालङ्कृता स्वर्णरसभूषिता इव शोभते, उरसि वक्षःस्थले, स्रग्विणी हारमनोहारिणी, सा हरेः कृष्णस्य, मूर्तिः शरीरं, जयाय विजयलाभाय, आस्तां भवेत् ।

हि०—जिसके एक पाद में चार रगण होते हैं, उसे 'स्रग्विणी' छन्द कहते हैं।

जिन कृष्ण का शरीर बादलों के समान श्याम, पीताम्बर से युक्त, मरकतमणि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

से बने हुए और सोने के पानी से रँगे हुए,के तुल्य शोभित होता है, वह हारयुक्त कृष्ण की मूर्ति विजय के लिए हो ॥ ७ ॥

म म य य

S S S S S S । S S । S S

बाणाश्वैश्छिन्ना वैश्वदेवी म मौ यौ ॥ ८ ॥

अर्चामन्येषां त्वं विहायाऽमराणामद्वैतेनैकं विष्णुमभ्यर्च भक्त्या।
तत्राशेषात्मन्यर्चिते भाविनी ते भ्रातः! सम्पन्नाराधना वैश्वदेवी ॥

प्र०—बाणाश्वैरिति। यस्या एकपादे द्वौ मगणौ, द्वौ यगणौ च भवतः, सा वैश्वदेवी नाम। तत्र च बाणाश्वैश्छिन्ना पञ्चमे सप्तमे च वर्णे यतिः कार्या।

अर्चामिति। भक्तस्य भक्तं प्रत्युक्तिः। हे भ्रातः! बन्धो! त्वम्, अन्येषाम्, अमराणां देवतानाम्, अर्चां पूजां, विहाय मुक्त्वा, अद्वैतेन 'एकमेवाद्वितीयं ब्रह्मेति' श्रुत्या एकज्ञानेन, भक्त्या श्रद्धया, एकं केवलं, कृष्णं मुरारिम्, अभ्यर्च पूजय। अशेषात्मनि विश्वरूपे, तत्र तस्मिन् कृष्णे, अर्चिते पूजिते, ते तव, वैश्वदेवी समस्ता देवसंहतिः, सम्पन्नाराधना विहितार्चना, भाविनी भविष्यति। 'सर्वदेवमयो विष्णुः' 'तस्मिंस्तुष्टे जगत्तुष्टम्' इति वचनाभ्यां विष्णुपूजने सर्वदेवतापूजासिद्धेरिति भावः।

सु०—जिस छन्द के प्रत्येक पाद में दो मगण और दो यगण होते हैं, उसे 'वैश्वदेवी' छन्द कहते हैं। इस छन्द में पांचवें और सातवें अक्षरों पर यति करनी चाहिए।

भक्त का भक्त को सम्बोधन। हे बन्धो! तू अन्य देवताओं की पूजा छोड़कर अद्वैतभाव से भक्तिपूर्वक केवल कृष्ण की ही पूजा कर। क्योंकि विष्णु विश्वरूप हैं, इसलिए उनकी पूजा में ही सब देवताओं की पूजा सिद्ध हो जाती है ॥ ८ ॥

स ज स स

। । S । S । । । S । । S

प्रमिताक्षरा सजससैः कथिता ॥ ९ ॥

(क) अमृतस्य शीकरमिवोद्गिरती रदमौक्तिकांशुलहरीच्छुरिता।
प्रमिताक्षरा मुररिपोर्भणितिर्व्रजसुभ्रुवामधिजहार मनः ॥
(ख) प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता।
अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपि ॥
इति माघः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्र०—प्रमितेति। यस्या एकपादे क्रमेण सगणः, जगणः, द्वौ सगणौ च भवतः, सा प्रमिताक्षरा नाम।

(क) अमृतस्येति। अमृतस्य सुधायाः, शीकरं कणम्, उद्गिरती विकिरन्ती इव, रदमौक्तिकानां दन्तमुक्तानाम्, अंशुलहर्या किरणजालेन, छुरिता व्याप्ता, प्रमिताक्षरा स्वल्पवर्णमयी, मुररिपोः कृष्णस्य, भणितिः उक्तिः, व्रजसुभ्रुवां व्रजकान्तानां, मनः हृदयम्, अविजहार आकर्षितवती। काव्यलिङ्गमुत्प्रेक्षा चालङ्कारौ।

(ख) प्रतिकूलतामिति। विधौ दैवे इन्दौ च, प्रतिकूलतां प्रतीपताम्, उपगते प्राप्ते सति, बहुसाधनता, बहुकर्तव्यता, विफलत्वं व्यर्थताम्, एति प्राप्नोति। भाग्ये विरुद्धे सर्वं कृत्यजातं व्यर्थमेव भवतीत्यर्थः। पतिष्यतः पतनोन्मुखस्य, दिनभर्तुः भानोः, करसहस्रमपि किरणसहस्रमपि पाणिसहस्रमपि च, अवलम्बनाय साहाय्याय, न अभूत्। अत्र विधावित्यत्र श्लेषः अर्थान्तरन्यासश्चालङ्कारौ।

द०—जिस छन्द के प्रत्येक पाद में क्रम से सगण, जगण, और दो सगण होते है, उसे 'प्रमिताक्षरा' कहते हैं।

(क) अमृतबिन्दुओं को बिखेरती हुई सी, दन्तमुक्ता की किरणावली से रञ्जित कृष्ण की संक्षिप्त उक्ति ने व्रजवधुओं के मन को हर लिया।

(ख) भाग्य के (चन्द्रमा के) विपरीत होने पर बहुत उपाय आदि सब व्यर्थ ही होता है। सूर्यास्त के समय सूर्य के सहस्रों कर (किरण, हस्त) रोकने में समर्थ नहीं हुए ॥ ९ ॥

न म भ र

। । । ऽ । । ऽ । । ऽ । ऽ

द्रु त वि लम्बित माह नभौ भरौ ॥ १० ॥

तरणिजापुलिने नवबल्लवीपरिषदा सह केलिकुतूहलात्।
द्रुतविलम्बितचारुविहारिणं हरिमहं हृदयेन सदा वहे।

प्र०—द्रुतेति। यस्यैकपादे क्रमेण नगणभगणौ भगणरगणौ च भवतः तद् द्रुतविलम्बितं नाम वृत्तम्।

तरणिजेति। तरणिजापुलिने कालिन्दीसैकते, नवबल्लवीपरिषदा तरुणगोपीवृन्देन, सह सहितं, केलिकुतूहलात्, क्रीडाकामनया, द्रुतविलम्बितचारुविहारिणं शीघ्रमन्थरगमनाभ्यां मनोज्ञनृत्यपरं, हरिं कृष्णम्, अहं हृदयेन मनसा, सदा, नित्यं, वहे धारयामि, स्मरामीति भावः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

१०—जिस छन्द के एक पाद में क्रम से नगण, दो भगण और रगण होते हैं, उसे 'द्रुतविलम्बित' छन्द कहते हैं।

यमुना के रेतीले स्थान पर तरुणी गोपियों के साथ विहार की इच्छा से शीघ्र तथा मन्थर गतिसे युक्त, नृत्यमें संलग्न कृष्णको मैं सदा हृदयमें धारण करता हूँ॥

न न र र

। । । । । । S । S S । S

न न र रघटिता तु मन्दाकिनी ॥ ११ ॥

(क) बलिदमनविधौ बभौ सङ्गता पदजलरुहि यस्य मन्दाकिनी।
सुरनिहितसिताम्बुजस्रङ्निभा हरतु जगदघं स पीताम्बरः॥

(ख) सहशरधि निजं तथा कार्मुकं वपुरतनु तथैव संवर्मितम्।
निहितमपि तथैव पश्यन्नसिं वृषभगतिरुपाययौ विस्मयम्॥

इति भारविः।

(ग) अतिसुरभिरभाजि पुष्पश्रियामतनुतरतयेव सन्तानकः।
तरुणपरभृतः स्वनं रागिणामतनुत रतये वसन्तानकः।

इति माघः।

ननेति। यस्या एकपादे द्वौ रगणौ द्वौ नगणौ च भवतः, सा मन्दाकिनी नाम।

(क) बलीति। मन्दाकिनी गङ्गा, बलिदमनविधौ बलिदानवबन्धनकृत्ये, यस्य कृष्णस्य, पदजलरुहि चरणकमले, सङ्गता संयुक्ता सती, सुरनिहिता देवगणदत्ता या सिताम्बुजस्रक् स्वच्छकमलहारः तन्निभा तत्सदृशी, बभौ रुरुचे, स पीताम्बरः कृष्णः जगदघं संसारपापं, हरतु नाशयतु।

(ख) सहेति। वृषभगतिः वृषभसदृशमन्दगतिः, सः अर्जुनः, सहशरधि सतूणीरं, निजं कार्मुकं गाण्डीवधनुः, तथैव पूर्ववत्, संवर्मितं कवचसंयुक्तम्, अतनु महत्, वपुः शरीरम्, निहितं स्थापितम्, असिमपि खड्गमपि, तथैव पूर्ववत्, पश्यन् विलोकयन्, विस्मयम् आश्चर्यम्, उपाययौ प्राप। किरातवेषिणा शिवेनार्जुनस्य तूणीरादिकं भक्षितम्। तत्पश्चात् तत्प्रसादेन सर्वं प्राप्यार्जुन आश्चर्यान्वितोऽभूदिति भावः।

(ग) अतिसुरभिति। अतिसुरभिः महासुगन्धियुक्तः, 'सुरभिर्गवि गन्धे च वसन्ते च मनोरमे' इति कोषः, सन्तानकः कल्पवृक्षः, पुष्पश्रियां कुसुमसम्पत्तीनाम्, अतनुतरतया आधिक्येन, अभाजि इव त्रुटित इव। पुष्पाधिक्येऽतिनम्रोऽ-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मूदिति भावः। एवं वसन्तस्य ऋतुराजस्य, आनकः दुन्दुभिरूपः, तरुणपरभृतः युवा कोकिलः, रागिणां कामिनां, रतये अनुरागवर्धनाय, स्वनं शब्दम्, अतनुत कृतवान्। कलं कूजितवानित्यर्थः।

हि०—जिस छन्द के एक पाद में दो नगण और दो रगण होते हैं, उसे 'मन्दाकिनी' छन्द कहते हैं।

(क) गङ्गा बलि के बन्धन के समय जिन कृष्ण के चरणकमलों में लिपटी हुई, देवताओं से अर्पित श्वेतकमलमाला के सदृश शोभित हुई वे पीताम्बरधारी कृष्ण संसार के पाप को दूर करें।

(ख) बैल के सदृश मस्त गतियुक्त अर्जुन पूर्ववत् तूणीर, गाण्डीव धनुष तथा कवच से युक्त अपने शरीर और तलवार को देखकर आश्चर्यान्वित हुआ। शिव ने किरातवेष धारण कर ये सब वस्तुएं हर ली थीं, इसलिए उन्हें पुनः देखकर अर्जुन को आश्चर्य हुआ।

(ग) अतिसुगन्धित कल्पतरु पुष्पसमृद्धि के आधिक्य से अत्यधिक झुक गया, तथा वसन्त की दुन्दुभि के सदृश तरुण कोकिल ने रागियों के अनुराग की वृद्धि के लिए मनोहर ध्वनि की ॥ ११ ॥

न य न य

I I I I S S I I I I S S

नयसहितौ न्यौ कुसुमविचित्रा ॥ १२ ॥

विपिनविहारे कुसुमविचित्रा कुतुकितगोपीमहितचरित्रा।
मुररिपुमूर्तिर्मुखरितवंशा चिरमवताद्वस्तरलवतंसा ॥

प्र०—नयेति। यस्या एकपादे क्रमेण नगणयगणौ पुनश्च नगणयगणौ भवतः, सा कुसुमविचित्रा नाम।

विपिनेति। विपिनविहारे क्रीडाकानने विहारकाले, कुसुमविचित्रा पुष्पालङ्कृता, कुतुकितगोपीभिः उत्कण्ठितगोपाङ्गनाभिः, महितचरित्रा अर्चितचरित्रा, मुखरितवंशा वादितमुरली, तरलवतंसा चञ्चलकर्णाभरणा, 'अवतंसः शिरोभूषा कर्णभूषा च कथ्यते' इति कोषः, मुररिपुमूर्तिः कृष्णतनुः, वः युष्मान्, चिरं बहुकालम्, अवतात् रक्षतु।

हि०—जिस छन्द के एकपाद में क्रम से नगण, यगण और फिर नगण, यगण होते हैं, उसे 'कुसुमविचित्रा' कहते हैं।

क्रीडावन में विहार के समय फूलों से अलङ्कृत, उत्कण्ठित गोपियों से पूजित-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चरित्र, वंशी बजाते हुए तथा चञ्चल कर्णभूषण से युक्त कृष्ण तुम्हारी चिरकाल तक रक्षा करें ॥ १२ ॥

न ज ज य

। । । । ऽ । । ऽ । । ऽ ऽ

इह वद तामरसं नजजा यः ॥ १३ ॥

स्फुटसुषमामकरन्दमनोज्ञं व्रजललनानयनालिनिपीतम् ।
तव मुखतामरसं मुरशत्रो ! हृदयतडागविकाशि ममास्तु ॥

प्र०—इहेति । इह अस्मिन् छन्दशास्त्रे, यस्यैकपादे नगणः, द्वौ जगणौ, यगणश्च भवन्ति, तत् तामरसं नाम वृत्तम् ।

स्फुटेति । हे मुरशत्रो ! कृष्ण ! स्फुटसुषमा स्पष्टश्रेष्ठकान्तिकः सैव मकरन्दः पुष्परसः तेन मनोज्ञं मञ्जुलम्, 'सुषमा परमा शोभा' मकरन्दः पुष्परसः' 'मनोज्ञं मञ्जु मञ्जुलम्' इत्यमरः व्रजललनानयनालिनिपीतं गोपीनां लोचनभ्रमरैः सतृष्णं निरीक्षितं, तव मुखतामरसं मुखपद्मं, 'पङ्केरुहं तामरसं सारसं सरसीरुहम्' इत्यमरः, मम हृदयतडागे चेतःसरसि, विकाशि शोभायमानम्, अस्तु भवतु । रूपकालङ्कारोऽत्र ।

रु०—जिस छन्द के एक पाद में क्रम से, नगण, दो जगण और यगण होते हैं, उसे 'तामरस' कहते हैं ।

हे कृष्ण ! व्याप्त श्रेष्ठ शोभा-रूपी रस से मनोहर, गोपियों के नेत्ररूपी भौंरों से पीया गया (तृष्णासहित देखा गया) तुम्हारा मुखकमल मेरे हृदयरूपी तालाब में शोभायमान हो । यहां रूपक अलङ्कार है ॥ १३ ॥

न ज ज र

। । । । ऽ । । ऽ । ऽ । ऽ

भवति नजावथ मालती जरौ ॥ १४ ॥

(क) इह कलयाऽच्युत केलिकानने मधुरससौरभसारलोलुपः ।
कुसुमकृतस्मितचारुविभ्रमामलिरपि चुम्बति मालतीं मुहुः ॥

(ख) अयि विजहीहि दृढोपगूहनं त्यज नवसङ्गमभीरु ! वल्लभम् ।
अरुणकरोद्गम एष वर्तते वरतनु ! सम्प्रवदन्ति कुक्कुटाः ॥

इति भारविः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्र०—भवतीति। यस्या एकपादे पूर्वं नगणजगणौ, ततो जगणो रगणश्च भवतः, सा मालती नाम।

(१) इहेति। हे अच्युत ! कृष्ण। कलय पश्य। किमिति कर्म वक्ष्यते, तेन सम्बन्धः। केलिकानने क्रीडावने, मधुरसस्य पुष्परसस्य सौरभसारे सुगन्धे लोलुपः लुब्धः, अलिः मधुपः, कुसुमकृतस्मितं पुष्पैर्विहितमीषद्धास्यमेव चारुविभ्रमः मनोरमविलासो यस्यास्तां हास्यप्रकाशिताभिप्रायामित्यर्थः, मालतीम् एतन्नामकलतां, मुहुः पुनः पुनः चुम्बति। अत्र अचेतनलतायां भ्रमरस्य मनोविकारः, चेतनस्य तु का कथा ? अत्र नायकनायिकाव्यवहारप्रतीतेः समासोक्तिरलङ्कारः।

(ख) अयीति। अयि ! नवसङ्गमभीरु ! नूतनसहवासप्रकाशभययुते ! दृढोपगूहनं गाढमालिङ्गनं, विजहीहि मुञ्च, वल्लभं प्रियं, त्यज मुञ्च। (यतः) हे वरतनु ! हे सुन्दरि ! एव लोचनगोचरः, अरुणकरोद्गमः भानुकिरणमात्रोदयः वर्तते, नाधुनापि सूर्योदयो जात इत्यर्थः। कुक्कुटाः। पक्षिविशेषाः रात्रिसमाप्तिबाधकाः, सम्प्रवदन्ति शब्दं कुर्वन्ति। साम्प्रतं किञ्चिद् रात्रिरवशिष्टाऽस्ति, एतस्माच्छय्यातः समुत्थानं युक्तमिति भावः। काव्यलिङ्गमलङ्कारः।

रु०—जिस छन्द के एक पाद में क्रम से नगण, जगण और जगण, रगण होते हैं, उसे मालती छन्द कहते हैं।

(क) हे कृष्ण ! देखो, इस क्रीडावन में रस की सुगन्धि से लुब्ध भ्रमर, पुष्पकी मधुर मुस्कान से मनोहर मालती लता को बार-बार चूमता है। अचेतन में चेतनवत् वर्णन है। अचेतन पुष्प में तुच्छ भ्रमर का इस प्रकार चित्तविक्षेप है, तो चेतनों का कहना ही क्या ? यहाँ नायक-नायिका के व्यवहार की प्रतीति से समासोक्ति अलङ्कार है।

(ख) हे नवीन सहवास के प्रकाश से भीरु ! गाढ आलिङ्गन को छोड़ दे, पति को छोड़ दे, क्योंकि हे सुन्दरि ! सूर्यकिरणें निकलने लगी हैं और मुर्गा रात्रि की समाप्तिसूचक अपनी बाग देने लगा है। अभी सूर्योदय नहीं हुआ, इसलिए समय है। तू शीघ्र शय्या से उठ जा। यहाँ काव्यलिङ्ग अलङ्कार है ॥ १४ ॥

त य त य

ऽ ऽ । । ऽ ऽ ऽ ऽ । । ऽ ऽ

त्यौ त्यौ मणि माला छिन्ना गुहवक्त्रैः ॥ १५ ॥

महामरमौलौ रत्नोपलक्लृप्ते जातप्रतिबिम्बा शोणा मणिमाला।
गोविन्दपदाब्जे राजी नखराणामास्तां मम चित्ते ध्वान्तं शमयन्ती ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्र०—त्याविति । यत्र तगणयगणौ पुनश्च तगणयगणौ भवतः, सा मणिमाला नाम । एषा गुहवक्त्रैः षडाननमुखैः, छिन्ना कृतयतिर्भवति । अर्थात् षडक्षरैरत्र यतिः कर्तव्याः ।

प्रह्वेति । रत्नोपलक्लृप्ते चन्द्रकान्तादिमणिसमूहसंयुक्ते, प्रह्वामरमौलौ प्रणत देवगणकिरीटे, जातप्रतिबिम्बा सङ्क्रान्तप्रतिमूर्तिः, अत एव शोणा लोहितवर्णा, मणिमाला मणियुक्तहारतुल्या, गोविन्दपदाब्जे कृष्णपादपद्मे, नखराणां नखानां, राजी पङ्क्तिः, मम चित्ते हृदये, ध्वान्तम् अज्ञानतिमिरं, शमयन्ती नाशयन्ती, आस्तां विराजताम् । 'प्रह्वोऽवनतकायः स्यात्', 'चूडाकिरीटकेशाश्च संयता मौलयस्त्रयः' इत्यमरौ । कृष्णपादपद्मयोर्यदा देवाः प्रणमन्ति स्म, तदा कृष्णपादनखानां प्रतिबिम्बं देवानां मणिमयकिरीटे मणिमये मुकुटे शोभते स्म । अत्र नखानां मणिमालात्वारोपणाद् रूपकालङ्कारः, स च काव्यलिङ्गानुप्राणित इति ।

हि०—जिस छन्द के एक पाद में क्रम से तगण, यगण और फिर तगण, यगण होते हैं, उसे 'मणिमाला' छन्द कहते हैं । इसमें छः अक्षरों पर यति करनी चाहिए ।

चन्द्रकान्तादिमणियुक्त देवताओं के मुकुटों में प्रतिबिम्बित लाल कृष्ण के पादपद्मों की नखपंक्ति मणिमय माला के सदृश शोभायमान, मेरे हृदय में अज्ञानरूपी अन्धकार को दूर करती हुई विराजमान हो । अर्थात् देवता जब कृष्ण के पैरों में प्रणाम करते थे, तब कृष्ण के पैरों के नाखून उनके मणियुक्त मुकुटों में मणिमय माला के सदृश शोभायमान होते थे ।

म भ स म

ऽऽऽ ऽ।। ।।ऽ ऽऽ

मो भः स्मौ चेज्जलधरमालाऽब्ध्यन्त्यैः ॥ १६ ॥

या भक्तानां कलिदुरितोत्तप्तानां तापच्छेदे जलधरमाला नव्या ।
भव्याकारा दिनकरपुत्रीकूले केलीलोला हरितनुरव्यात्सा वः ॥

प्र०—मो भ इति । यस्या एकपादे मगणः, भगणः, ततः सगणमगणौ च भवतः । सा जलधरमाला नाम । अत्र अब्धिभिश्चतुरक्षरैः, अन्त्यैः द्वादशाक्षरैश्च यतिः कार्या ।

या भक्तानामिति । या (कृष्णमूर्तिः) कलिदुरितोत्तप्तानां कलिकालदुष्कर्मज्वलितानां, भक्तानां सेवकानां, तापच्छेदे सन्तापनाशे, नव्या नूतना, जलधरमाला

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जलदराशितुल्या, सा भव्याकारा कल्याणमूर्तिः मनोज्ञाकृतिर्वा, दिनकरपुत्रीकूले यमुनातीरे, केलीलोला क्रीडाचञ्चला, हरितनुः कृष्णमूर्तिः, वः युष्मान्, अव्यात् पातु। अत्र रूपकालङ्कारः।

२०—जिस छन्द में प्रत्येक पाद में क्रम से मगण, भगण, सगण और मगण होते हैं, उसे 'जलधरमाला' छन्द कहते हैं। इस छन्द में चौथे और बारहवें अक्षर पर यति करनी चाहिये।

जो कृष्ण कलिकाल के पापों से दग्ध भक्तजनों के सन्ताप को दूर करने के लिए बादलों के तुल्य हैं, वे यमुना के किनारे क्रीडा में आसक्त, मनोहरमूर्ति कृष्ण तुम्हारी रक्षा करें। वहाँ रूपक अलंकार है॥ २७॥

पुस्तकान्तरेष्वस्यां वृत्तावधिकानीमानि वृत्तानि दृश्यन्ते—

न न भ य

। । । । । । ऽ ऽ ऽ । ऽ ऽ

वसुयुगविरतिर्नौ म्यौ पुटोऽयम्॥ १॥

न भ ज र

। । । ऽ । । । ऽ । ऽ । ऽ

भुवि भवेन्नभ जरैः प्रियंवदा॥ २॥

त भ ज र

ऽ ऽ । ऽ । । । ऽ । ऽ । ऽ

धीरैरभाणि ललिता नभौ जरौ॥ ३॥

न न भ र

। । । । । । ऽ । । ऽ । ऽ

ननभरसहिता गदितोज्ज्वला॥ ४॥

न ज भ य

। । । । ऽ । ऽ । । । ऽ ऽ

इह नवमालिका नजभयैः स्यात्॥ ५॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भ म स स

ऽ । । ऽ ऽ ऽ । । ऽ । । ऽ

पञ्चमुनी भमौ स्यात् सयुगा ललना ॥ ६ ॥

न न म र

। । । । । । ऽ ऽ ऽ ऽ । ऽ

ललितमभिहितं नौ म्रौ नामतः ॥ ७ ॥

न भ न य

। । । ऽ । । । । । । ऽ ऽ

द्रुतपदं भवति नभनयाश्चेत् ॥ ८ ॥

म म म म

ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ

सर्वे मा यस्मिन् सोऽयं विद्याधारः स्यात् ॥ ९ ॥

। ऽ । ऽ । ऽ । ऽ । ऽ । ऽ

लघुर्गुरुर्वदन्ति पञ्चचामरम् ॥ १० ॥

त त त त

ऽ ऽ । ऽ ऽ । ऽ ऽ । ऽ ऽ ।

सारङ्गसंज्ञं समस्तैस्तकारैस्तु ॥ ११ ॥

ज ज ज ज

। ऽ । । ऽ । । ऽ । । ऽ ।

समस्तजमीर य मौक्तिक दाम ॥ १२ ॥

भ भ भ भ

ऽ । । ऽ । । ऽ । । ऽ । ।

मोटकनाम समस्त भमीरय ॥ १३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

। । । । । । । । । । । ।

रविलघु तरलनयनमिह ॥ १४ ॥

प्र०—वसुयुगेति । यत्र द्वौ नगणौ मगणयगणौ च भवतः, स पुटः नाम । अत्र वसुभिरष्टाक्षरैः युगैश्च चतुर्भिश्चाक्षरैः यतिः कार्या ॥ १ ॥

भुवीति । यस्या एकपादः क्रमेण नगणभगणजगणरगणैर्युक्तः स्यात् , सा भुवि लोके, प्रियंवदा नाम ॥ २ ॥

धीरैरिति । यस्या एकपादे क्रमशः तगणभगणौ जगणरगणौ च भवतः, सा धीरैः विद्वद्भिः, ललिता नाम अभाणि प्रोक्ता ॥ ३ ॥

ननेति । यस्या एकपादे क्रमेण द्वौ नगणौ, भगणः रगणश्च भवन्ति, सा उज्ज्वला नाम ॥ ४ ॥

इहेति । यत्र नगणजगणभगणयगणा भवन्ति, सा नवमालिका नाम ॥ ५ ॥

पञ्चेति । यस्या एकपादे क्रमशः भगणमगणौ ततो द्वौ सगणौ च भवतः, सा ललना नाम । अत्र पञ्चाक्षरैश्च सप्ताक्षरैश्च यतिर्विधेया ॥ ६ ॥

ललितमिति । यत्र द्वौ नगणौ भगणरगणौ च भवतः, तद् ललितं नाम वृत्तम् ॥ ७ ॥

द्रुतेति । चेद् यदि, नगणभगणनगणयगणा भवन्ति तदा द्रुतपदं नाम वृत्तं भवति ॥ ८ ॥

सर्वे इति । यस्मिन् सर्वे मा मगणा अर्थात् द्वादशापि वर्णा दीर्घा भवन्ति, सोऽयं विद्याधारो नाम ॥ ९ ॥

लघुरिति । यस्मिन् (द्वादशवर्णात्मकपादवृत्ते) लघुः पूर्वं लघुवर्णः, पश्चात् गुरुः गुरुवर्ण इत्येवंरूपः क्रमो भवति, तत् पञ्चचामरं नाम वृत्तं भवति ॥ १० ॥

सारङ्गेति । समस्तैस्तकारैः चतुर्भिस्तगणैर्युक्तो यस्य पादः, तद् वृत्तं सारङ्गसंज्ञकं भवति ॥ ११ ॥

समस्तेति । समस्तजं जगणचतुष्टयनिबद्धं वृत्तं मौक्तिकदाम इत्थं वद ॥१२॥

मोटकेति । समस्तं भगणचतुष्टयनिबद्धं मोटकं नाम वृत्तम् , इत्थं वद ॥१३॥

रवीति । यत्र रविलघु द्वादशैव वर्णा लघवः, तत् तरलनयनं नाम वृत्तम् ॥ १४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रु०—जिसके एक पाद में दो नगण, मगण और यगण होते हैं, उसे 'पुट' नामक छन्द कहते हैं। इस छन्दमें आठवें और चौथे अक्षर पर यति करनी चाहिए॥

जिस छन्द के एक पाद में क्रम से नगण, भगण, जगण और रगण होते हैं, उसे 'प्रियंवदा' नामक छन्द कहते हैं॥ २॥

जिस छन्द के प्रत्येक पाद से क्रमशः तगण, भगण, जगण और रगण होते हैं उसे 'ललिता' छन्द कहते हैं॥ ३॥

जिस छन्द के प्रत्येक पाद में क्रमशः दो नगण, मगण और रगण होते हैं, उसे 'उज्ज्वला' छन्द कहते हैं॥ ४॥

जिस छन्द के प्रत्येक पाद में क्रमशः नगण, जगण, भगण और यगण होते हैं उसे 'नवमालिका' छन्द कहते हैं॥ ५॥

जिस छन्द के प्रत्येक पाद में क्रमशः भगण, मगण और दो सगण होते हैं, उसे 'ललना' नामक छन्द कहते हैं। इस छन्द में पाँचवें और सातवें वर्ण पर यति करनी चाहिए॥ ६॥

जिस छन्द के प्रत्येक पाद में क्रमशः दो नगण, मगण और रगण होते हैं उसे 'ललित' नामक छन्द कहते हैं॥ ७॥

जिस छन्द के प्रत्येक पाद में क्रमशः एक नगण, एक भगण, एक नगण और एक यगण होते हैं, उसे 'द्रुतपद' नामक छन्द कहते हैं॥ ८॥

जिस छन्द के प्रत्येक पाद में सब मगण होते हैं, अर्थात् बारहो अक्षर गुरु होते हैं, उसे 'विद्याधार' नामक छन्द कहते हैं॥ ९॥

बारह-अक्षरात्मक जिस छन्द के प्रत्येक पाद में पहले लघु फिर गुरु यह क्रम होता है, उसे 'पञ्चचामर' नामक छन्द कहते हैं॥ १०॥

जिस छन्द के प्रत्येक पाद में समस्त तगण होते हैं, उसे 'सारङ्ग' छन्द कहते हैं॥

जिस छन्द के प्रत्येक पाद में समस्त जगण होते हैं, उसे 'मौक्तिकदाम' छन्द कहते हैं॥ १२॥

जिस छन्द के प्रत्येक पाद में समस्त भगण होते हैं, उसे 'मोटक' छन्द कहते हैं॥

जिस छन्द के प्रत्येक पाद में समस्त वर्ण लघु होते हैं, उसे 'तरलनयन' छन्द कहते हैं॥ १४॥

(१३) अतिजगती (त्रयोदशाक्षरा वृत्तिः)।

म न ज र ग

S S S | | | | | S | S | S | S S

त्र्याशाभिर्मनजरगाः प्रहर्षिणीयम्॥ १॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गोपीनामधरसुधारसस्य पानैरुत्तुङ्गस्तनकलशोपगूहनैश्च ।
आश्चर्यैरपि रतिविभ्रमैर्मुरारेः संसारे मतिरभवत्प्रहर्षिणीह ॥

प्र०—त्र्याशाभिरिति । यस्या एकपादे क्रमेण मगणनगणजगणरगणा एको गुरुश्च भवन्ति, सा प्रहर्षिणी नाम । अत्र त्रिभिः त्र्यक्षरैः आशाभिर्दशभिश्च वर्णैर्यतिः कार्या ॥ १ ॥

गोपीनामिति । इह संसारे, गोपीनां गोपकान्तानाम्, अधरसुधारसस्य ओष्ठपीयूषद्रवस्य, पानैः आस्वादनैः, उत्तुङ्गस्तनकलशोपगूहनैः उच्चकुचकुम्भालिङ्गनैः आश्चर्यैः विस्मयजनकैः, रतिविभ्रमैः सुरतविलासैरपि चेत्यर्थः, मुरारेः कृष्णस्य, प्रहर्षिणी उत्कृष्टानन्दप्रदा, मतिः अभिलाषः अभवत् । 'मतिः स्त्रीच्छाधियौ स्मृता' इति मेदिनी ।

हि०—जिसके एक पाद में क्रम से मगण, नगण, जगण, रगण और एक गुरु वर्ण होते हैं, उसे 'प्रहर्षिणी' छन्द कहते हैं। इस छन्द में तीसरे और दसवें वर्ण पर यति करनी चाहिए।

इस संसार में गोपियों के अधरामृत-पान से स्तन-कुम्भों के आलिङ्गन से तथा अद्भुत रति-विलासों से कृष्ण की अत्यधिक आनन्ददायिनी इच्छा हुई। अर्थात् इस प्रकार आनन्दपूर्वक कृष्ण की अधिक समय तक संसार में रहने की इच्छा हुई॥१॥

ज भ स ज ग

। ऽ । ऽ । । । । ऽ । ऽ । ऽ

जभौ सजौ गिति रुचिरा चतुर्ग्रहैः ॥ २ ॥

(क) पुनातु वो हरिरतिरासविभ्रमी परिभ्रमन् व्रजरुचिराङ्गनान्तरे ।
समीरणोल्लसितलतान्तरालगो यथा मरुत्तरलतमालभूरुहः ॥
(ख) अभून्नृपो विबुधसखः परन्तपः श्रुतान्वितो दशरथ इत्युदाहृतः ।
गुणैर्वरं भुवनहितच्छलेन यं सनातनः पितरमुपागमत् स्वयम् ॥
इति भट्टिः ।

प्र०—यस्या एकपादे क्रमशः जगणभगणौ, सगणजगणौ, एको गुरुश्च भवन्ति सा रुचिरा नाम । अत्र चतुर्भिरक्षरैः ग्रहैश्च नवाक्षरैश्च, यतिः कार्या ।

(क) पुनात्विति । अतिरासविभ्रमी अतिशयेन रासविहारी, हरिः कृष्णः, समीरणोल्लसितलतानां वायुचालितवल्लीनाम्, अन्तरालगः, मध्यगामी, मरुत्तरलः वायुचपलः, तमालभूरुहः तमालनामकवृक्षो यथा, तथा व्रजस्य गोकुलस्य, रुचिराङ्ग-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नान्तरे मनोहरयुवतिमध्ये, परिभ्रमन् विभ्रमपूर्वकं नृत्यन्, वः युष्मान्, पुनातु। पवित्रान् करोतु।

(ख) अभूदिति। विबुधानां सुराणां विदुषां या सखा सुहृद् विबुधसखः, परन्तपः शत्रुमर्दनः, श्रुतान्वितः शास्त्रयुतः शास्त्रज्ञ इत्यर्थः, दशरथ इति नाम्ना उदाहृतः प्रसिद्धः, नृपः भूपतिः आसीत। सनातनः नारायणः, भुवनहितच्छलेन रावणवधादिरूपलोकोपकारव्याजेन, गुणैः शौर्यादिभिः, वरं श्रेष्ठं, यं भूपतिं स्वयम् आत्मना, पितरं जनकत्वेन, उपागमत् स्वीकृतवान्।

रु०—जिस छन्द के एक पाद में क्रम से जगण, भगण, सगण, जगण और एक गुरु वर्ण होते हैं उसे 'रुचिरा' छन्द कहते हैं। इस छन्द में चतुर्थ और तत्पश्चात् नवम वर्ण पर यति करनी चाहिये।

(क) अत्यधिक रासविहारी, वायु से चञ्चल तमाल (आबनूस) वृक्ष के सदृश, वायु से चालित लताओं के मध्य में गमनकारी, व्रज की सुन्दर गोपिकाओं के मध्य में विलासयुक्त नृत्य करते हुए श्रीकृष्ण तुम्हें पवित्र करें।

(ख) देवताओं और विद्वानों का प्रिय, रिपुमर्दन, शास्त्रज्ञ दशरथ नाम का प्रसिद्ध राजा था। जिस धैर्यशौर्यादिगुण-युक्त नृप को स्वयं नारायण ने संसार के उपकार के लिए अपना पिता स्वीकार किया॥ २॥

म त य स ग

ऽऽऽऽ ऽ।। ऽऽ।। ऽऽ

वेदै रन्ध्रैर्म्तौ यसगा मत्तमयूरम्॥ ३॥

(क) लीलानृत्यन्मत्तमयूरध्वनिकान्तं नृत्यन्नीपामोदिपयोदानिलरम्यम्।
रासक्रीडाकृष्टमना गोपवधूभिः कंसध्वंसी निर्जनवृन्दावनमाप॥

(ख) हा तातेति क्रन्दितमाकर्ण्य विषण्णस्तस्यान्विष्यन् वेतसमूढं प्रभवं सः।
शल्यप्रोतं वीक्ष्य सकुम्भं मुनिपुत्रं तापादन्तःशल्य इवासीत्क्षितिपोऽपि॥

इति रघुवंश।

प्र०—वेदैरिति। यत्रैकपादे क्रमेण मगणः, तगणः, यगणः, सगणः, एको गुरुश्च भवन्ति, तत् मत्तमयूरं नाम वृत्तम्। अत्र वेदैश्चतुरक्षरैः रन्ध्रैर्नवाक्षरैश्च यतिः कार्या।

(क) लीलेति। गोपवधूभिः गोपीभिः सह, रासक्रीडाकृष्टमना रासविलासा-हृतमानसः, कंसध्वंसी कंसनाशकः, कृष्ण इत्यर्थः, लीलया विकासेन, नृत्यतां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नृत्यं कुर्वतां, मत्तमयूराणां मत्तकेकिनां, ध्वनिभिः केकारवैः, कान्तं रम्यम् , नृत्यन् चलन् , नीपामोदी कदम्बकुसुमसुरभिसंयुक्तः, पयोदानिलः जलदसम्पृक्तः पवनः, तेन रम्यं रुचिरं, निर्जनवृन्दावनं जनरहितं वृन्दावनम् , आप प्राप्तवान् ।

(ख) हा तातेति । स क्षितिपः दशरथोऽपि, 'हा तात !' इति क्रन्दितं रोदनम् , आकर्ण्य श्रुत्वा, विषण्णः दुःखितः 'किं मयानुष्ठित'मिति तस्य रोदन-शब्दस्य, वेतसगूढं वेतसतिरोहितं, प्रभवं कारणम् , अन्विष्यन् गवेषयन् , शल्येन शरेण प्रोतं विद्धं, सकुम्भं घटयुक्तं, मुनिपुत्रम् , ऋषितनयं, वीक्ष्य दृष्ट्वा, तापात् दुःखात् , अन्तःशल्य इव बाणविद्ध इव, आसीत् अभूत् ।

रु०—जिस छन्द के एक पाद में क्रम से मगण, तगण, यगण, सगण और एक गुरु वर्ण होते हैं, उसे 'मत्तमयूर' छन्द कहते हैं। इस छन्द में चतुर्थ और तत्पश्चात् नवम वर्ण पर यति करनी चाहिए।

(क) गोपियों के साथ रासक्रीडा से आकृष्टचित्त कृष्ण, क्रीडापूर्वक नृत्य करते हुए मत्तमयूरों की ध्वनि से मनोहर, मन्द कदम्ब के कुसुमों की सुगन्धि से मनोहर, मेघमिश्रित वायु से सुन्दर निर्जन वृन्दावन को प्राप्त हुए।

(ख) राजा दशरथ भी 'हा तात !' इस रोने के शब्द को सुनकर 'हा ! मैंने क्या कर दिया' इस विचार से अतिदुःखित होकर बेंतों के झुण्ड से छिपे हुए रोने के कारण को ढूँढ़ता हुआ बाण से विद्ध, घड़ा लिए हुए ऋषि के पुत्र को देखकर दुःख से बाण-विद्ध के सदृश हो गया ॥ ३ ॥

न न स स ग

। । । । । । । । ऽ । । ऽ ऽ

नयुगलसयुगलगैरिति चण्डी ॥ ४ ॥

जयति दितिजरिपुताण्डवलीला कुपितकवलकरकालियमौलौ ।
चरणकमलयुगचापलचण्डी पदनखरुचिजितभोगमणिश्रीः ॥

प्र०—न युगलेति । यस्या एकपादे क्रमशः नयुगलं द्वौ नगणौ, सयुगलं द्वौ सगणौ, गः गुरुरेको वर्णश्च भवन्ति, सा चण्डी नाम ।

जयतीति । कुपितस्य स्वस्थाने जनप्रवेशात् क्रुद्धस्य कवलकरस्य ग्रासं विदधतः मुखं व्याददत इत्यर्थः, कालियस्य मौलौ शिरसि, पदनखरुचिभिः चरणनख-कान्तिभिः जितभोगमणिश्रीः तिरस्कृतफणगतरत्नकान्तिः, चरणकमलयुगचापलचण्डी

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पादपद्मद्वयचाञ्चल्यभीषणा, दितिजरिपोः दैत्यारेः कृष्णस्य ताण्डवलीला नृत्यविलासः, जयति सर्वोत्कृष्टतया वर्तते ।

रु०—जिस छन्द के पाद में क्रम से दो नगण, दो सगण और एक गुरु वर्ण होते हैं, उसे 'चण्डी' नामक छन्द कहते हैं।

क्रुद्ध होकर मुँह फाड़ते हुए कालिय सर्प के सिर पर पैर के नाखूनों की शोभा से फणा के रत्नों को तिरस्कृत करते हुए, दोनों पादपद्मों की चञ्चलता से भीषण, कृष्ण का ताण्डव नृत्य सर्वोत्कृष्टतया विराजमान होता है ॥ ४ ॥

स ज स ज ग

। । S । S । । । S । S । S

सजसा जगौ च यदि मञ्जुभाषिणी ॥ ५ ॥

अमृतोर्मिशीतलकरेण लालयंस्तनुकान्तिचोरितविलोचनो हरे ! ।
नियतं कलानिधिरसीति वल्लवी मुदमच्युते व्यधित मञ्जुभाषिणी ॥

प्र०—सजसा इति । यस्या एकपादे क्रमशः सगणः, जगणः, सगणः, जगणः, एको गुरुश्च भवन्ति, सा मञ्जुभाषिणी नाम ।

अमृतोर्मीति । हे हरे । हे कृष्ण । तनुकान्त्या शरीरशोभया चोरितविलोचनः आकृष्टजनचक्षुः, अमृतोर्मिशीतलकरेण, जातावेकवचनम् , सुधावीचिसदृशैः शीतलहस्तैः शीतलकिरणैः, 'बलिहस्तांशवः कराः' इत्यमरः, लालयन् सस्पृहं स्पृशन् , अस्मानिति शेषः, नियतं निश्चयं, कलानिधिः चन्द्रः असि, इति एवं, मञ्जुभाषिणी मधुरवादिनी, वल्लवी गोपी, अच्युते कृष्णे कृष्णस्येत्यर्थः, मुदं प्रसन्नतां, व्यधित अकरोत् । अन्यत्र 'तनुकान्तिरोचितविलोचन' इति पाठः । तत्र तनुकान्त्या रोचिते साभिलाषे दर्शनोत्सुके कृते विलोचने लोकानां नयने येन स इत्यर्थः ।

रु०—जिस छन्द के एक पाद में क्रमशः सगण, जगण, सगण, जगण और एक गुरु वर्ण होते हैं, उसे 'मञ्जुभाषिणी' छन्द कहते हैं।

हे कृष्ण ! शरीर के सौन्दर्य से जनों के मनमोहक, अमृत की लहरों के तुल्य शीतल हाथों (किरणों) से हमको स्पृहायुक्त हो छूते हुए तुम निश्चित ही चन्द्रमा हो, इस प्रकार मधुरवादिनी गोपी ने कृष्ण को अत्यधिक प्रसन्न किया ॥ ५ ॥

न न त त ग

। । । । । । S S । S S । S

ननततगुरुभिश्चन्द्रिकाश्वर्तुभिः ॥ ६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(क) शरदमृतरुचश्चन्द्रिकाक्षालिते दिनकरतनयातीरदेशे हरिः।
विहरति रभसाद्बल्लवीभिः समं त्रिदिवयुवतिभिः कोऽपि देवो यथा॥
(ख) इह दुरधिगमैः किञ्चिदेवागमैः सततमसुतरं वर्णयन्त्यन्तरम्।
अमुमतिविपिनं वेद दिग्व्यापिनं पुरुषमिव परं पद्मयोनिः परम्॥

इति भारविः।

उत्पलिनीति केचित्।

प्र०—नन्विति। यस्या एकपादे क्रमशो द्वौ नगणौ, द्वौ तगणौ, एको गुरुश्च भवन्ति, सा चन्द्रिका नाम। अत्र अश्वैः सप्तभिः ऋतुभिः षड्भिश्चाक्षरैः यतिः कार्या।

(क) शरदमृतेति। हरिः कृष्णः, शरदमृतरुचः, शरत्कालिकचन्द्रस्य, चन्द्रिकाभिः ज्योत्स्नाभिः क्षालिते धौते अन्धकारेऽपहृते इत्यर्थः, दिनकरतनयातीरदेशे यमुनातटे, बल्लवीभिः गोपीभिः, समं सार्धं, त्रिदिवयुवतिभिः स्वर्गवनिताभिः अप्सरोभिरित्यर्थः, समं सह, कोऽपि देव इव, रभसात् हर्षात्, विहरति क्रीडति। 'रभसो वेगहर्षयोः' इति मेदिनी।

(ख) इहेति। इह अस्मिन् पर्वते, असुतरं दुर्गमं पक्षे दुर्ज्ञेयम्, अन्तरं मध्यभागं पक्षे तत्त्वम्, दुरधिगमैः दुरारोहैः पक्षे दुर्ज्ञेयैः, अगमैर्वृक्षैः अन्यत्र आगमैः शास्त्रैः किञ्चिदेव सततं वर्णयन्ति, विद्वांस इति शेषः। किन्तु अतिविपिनम् अतिगहनं, दिग्व्यापिनं, सर्वदिशाव्यापकम्, अमुं पर्वतं, परं पुरुषम् इव परमात्मानम् इव, परं केवलं, पद्मयोनिः ब्रह्मैव, वेद जानाति, नान्य इत्यर्थः।

हि०—जिस छन्द के एक पाद में क्रमशः दो नगण, दो तगण और एक गुरु वर्ण होते हैं उसे 'चन्द्रिका' छन्द कहते हैं। इस छन्द में सातवें और तत्पश्चात् छठे अर्थात् तेरहवें वर्ण पर यति करनी चाहिये।

(क) श्रीकृष्ण चन्द्रमा की किरणों से प्रकाशित यमुना के किनारे गोपियों के साथ, अप्सराओं के सदृश हर्ष से विहार करते हैं।

(ख) इस पर्वत पर दुर्गम (दुर्ज्ञेय) मध्यभाग (तत्त्व) को दुरारोह (दुर्ज्ञेय) वृक्षों (शास्त्रों) से विद्वान् लोग कुछ ही वर्णन करते हैं, किन्तु अतिगहन, दिग्व्यापी परमात्मा के सदृश इस पर्वत को ब्रह्मा ही केवल जानते हैं, अन्य कोई नहीं जानता॥ ६॥

स ज स स ग
I I S I S I I I S I I S S

सजसा सगौ च कथितः कलहंसः॥ ७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यमुनाविहारकुतुके कलहंसो व्रजकामिनीकमलिनीकृतकेलिः ।
जनचित्तहारिकलकण्ठनिनादः प्रमदं तनोतु तव नन्दतनूजः ॥
सिंहनादः क्वापि ।

प्र०—सजसा इति । यस्य वृत्तस्यैकपादे क्रमेण सगणः, जगणः, द्वौ सगणौ, एको गुरुश्च भवन्ति, स कलहंसो नाम ।

यमुनेति । यमुनाविहारकुतुके कालिन्दीजलक्रीडाकौतूहले, व्रजकामिन्यो गोपाङ्गना एव कमलिन्यो नलिन्यः तासु कृतकेलिः विहितविहारः, जनचित्तहारी जनमनोहरणशीलो यः कलकण्ठनिनादः मधुरमुखध्वनिः, कलहंसः हंसविशेषरूपः, नन्दतनूजः नन्दनन्दनः कृष्णः, तव प्रमदं हर्षं, तनोतु प्रसारयतु । 'कादम्बः कलहंसः स्यात्' इत्यमरः । अत्र रूपकमलङ्कारः ।

ह०—जिस छन्द के एक पाद में क्रम से सगण, जगण, दो सगण और एक गुरु वर्ण होते हैं उसे 'कलहंस' छन्द कहते हैं ।

यमुनाजल की क्रीडा के कौतूहल में गोपीरूप कमलिनियों में विहारी, मनोहारी मधुर ध्वनियुक्त कलहंस के सदृश श्रीकृष्ण तुम्हारे आनन्द को बढावें । यहां रूपक अलङ्कार है ॥ ७ ॥

स ज स ज ग

I I S I S I I I S I S I S

सजसा जगौ च भवति प्रबोधिता ॥ ८ ॥

शयिता मृषा चटुलमाननिद्रया रतिकेलिकुञ्जनिलये विलासिनी ।
मुरवैरिणा श्रवणखर्जनादिना स्मितमाततान सपदि प्रबोधिता ॥

प्र०—सजसा इति । यस्या एकपादे क्रमेण सगणजगणसगणाः, जगणः, एको गुरुश्च भवन्ति, सा प्रबोधिता नाम । प्रबोधिताच्छन्दो मञ्जुभाषिणीच्छन्दसो नामान्तरम्, समानलक्षणत्वात् । एवमुक्तिरन्यत्रापि दृश्यते । यथा वृत्तरत्नाकरतत्परिशिष्टयोः उपस्थितशिखण्डितयोः, क्षमाविद्युतोः, श्रीमौक्तिकमालयोः चित्रलेखातिशायिन्योश्चेति ।

शयितेति । मृषा मिथ्या, चटुलमाननिद्रया चञ्चलप्रणयकोपनिद्रया, रतिकेलिकुञ्जनिलये विहारलतामण्डपस्थाने, शयिता सुप्ता, विलासिनी काचिद्गोपी, मुरवैरिणा कृष्णेन, श्रवणखर्जनादिना कर्णकण्डूयनादिकृत्येन, सपदि झटिति, प्रबोधिता उत्थापिता सती, स्मितम् ईषद्धास्यम्, आततान चकार । मानममुञ्चदित्यर्थः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

'श्रवणखर्जनादिने'त्यत्र 'वदनचुम्बनादिने'ति पाठान्तरम् । वदनचुम्बनादिना मुखचुम्बनादिव्यापारेणेति तदर्थो बोध्यः ।

हि०—जिस छन्द के एक पाद में क्रम से सगण, जगण पुनः सगण, जगण और एक गुरु वर्ण होते हैं, उसे 'प्रबोधिता' छन्द कहते हैं। प्रबोधिता और मञ्जुभाषिणी के लक्षण समान हैं, परन्तु नामभेद से पृथक् परिगणन है। जैसे कि वृत्तरत्नाकर और उसके परिशिष्ट में उपस्थित और शिखण्डित, क्षमा और विद्युत्, श्री और मौक्तिकमाला, चित्रलेखा और अतिशायिनी ये एक ही लक्षण के दो दो छन्द पृथक् पृथक् नामों से माने गये हैं।

चञ्चल—प्रणयकोप की निद्रा से विहार के कुञ्जभवन में नकली सोई हुई किसी विलासिनी गोपी को कृष्ण ने 'कान खुजलाना' इत्यादि व्यापार से जगा दिया और वह मुसकिराने लगी अर्थात् उसका मान छूट गया ॥ ८ ॥

न ज ज र ग

।।। ।ऽ। ।ऽ। ऽ।ऽ ऽ

भवति मृगेन्द्रमुखं नजौ जरौ गः ॥ ९ ॥

गुरुभुजवीर्यभरं हरिं मदान्धा युधि समुपेत्य न दानवा जिजीवुः ।
क्षुधितमृगेन्द्रमुखं मृगा उपेत्य क्व नु खलु बिभ्रति जीवनस्य योगम् ? ॥

प्र०—भवतीति । यस्य एकस्मिन् पादे क्रमेण नगणजगणजगणरगणाः तथा एको गुरुश्च भवन्ति, तत् मृगेन्द्रमुखं नाम वृत्तं भवति ।

गुरुभुजेति । मदान्धाः मदेन गर्वेणौद्धत्येनेति यावत्, अन्धाः परिपूर्णाः दर्पबहुलाः, दानवा असुराः, युधि सङ्ग्रामे, गुरुभुजवीर्यभरं गुरुः महान् भुजयोः बाह्वोः वीर्यभरः सामर्थ्यातिरेको यस्य तं, हरिं मधुसूदनं भगवन्तं कृष्णं, समुपेत्य अधिगत्य स्वसंमुखीनं दृष्ट्वेत्यर्थः, न नहि, जिजीवुः प्राणितवन्तः मृता इत्यर्थः । एतदेवार्थान्तरन्यासेन प्रतिपादयन्नाह—क्षुधितेति । मृगाः हरिणाः वन्याः पशवश्च, क्षुधितस्य बुभुक्षोः बुभुक्षया पर्याकुलस्येति वा मृगेन्द्रस्य सिंहस्य मुखम् उपेत्य मुखस्य मध्यं गत्वा, क्व नु खलु, जीवनस्य प्राणनस्य स्वकीयप्राणानां, योगं सम्बन्धं, बिभ्रति धारयति । अपि तु म्रियन्त एवेत्यर्थः ।

हि०—जिस छन्द के एक पाद में नगण, जगण, जगण और रगण क्रम से हों तथा उसके बाद एक गुरु हो, वह 'मृगेन्द्रमुख' वृत्त होता है।

मदोन्मत्त दानव युद्ध में भगवान् कृष्ण को पाकर जीवन की आस छोड़ बैठे।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जैसे भूखे सिंह के मुख में पहुँचे हुए पशु-हरिणादि कभी जीवन की आशा कर सकते हैं ? अर्थात् नहीं ॥ ९ ॥

इमानि वृत्तान्यधिकानि दृश्यन्ते पुस्तकान्तरेषु—

य म र र ग

ISS SSS SIS SIS S

यम्नौ रौ विख्याता चञ्चरीकावली गः (१) ॥ १ ॥

न स र र ग

III IIS SIS SIS S

नसरयुगगैश्चन्द्ररेखर्तुलोकैः ॥ २ ॥

ज स त स ग

ISI IIS SSI IIS S

उपस्थितमिदं ज्सौ त्सौ सगुरुकं चेत् ॥ ३ ॥

ज त स ज ग

ISI SSI IIS ISI S

जतौ सजौ गो भवति मञ्जुहासिनी ॥ ४ ॥

य य य य ग

ISSISS ISS ISS S

इदं कन्दुकं यत्र येभ्यश्चतुर्भ्यो गः ॥ ५ ॥

प्र०—यमाविति । यस्याः प्रथमे पादे यगणः, मगणः, रगणद्वयं च क्रमेण स्यात् तथैको गुरुश्च भवति, सा चञ्चरीकावली नाम ॥ १ ॥

नसरेति । यस्याः पादे नगणः, सगणः, रगणद्वयं तत एको गुरुश्च भवन्ति, सा चन्द्ररेखा इति कथ्यते । अत्र षड्भिः सप्तभिश्चाक्षरैः यतिः करणीया ॥ २ ॥

उपस्थितमिति । यस्याः पादे क्रमेण जगणः, सगणः, तगणः, सगणः, तत एको गुरुश्च स्यात्, तत् उपस्थितं नाम वृत्तमुच्यते ॥ ३ ॥

जताविति । यस्याः पादे क्रमेण जगणः, तगणः, सगणः, जगणः, ततो गुरुश्च स्यात्, सा मञ्जुहासिनी नाम भवति ॥ ४ ॥

(१) चञ्चरीकावलीप्रभृतीनि पञ्चैतानि वृत्तानि वृत्तरत्नाकरपरिशिष्टे दृश्यन्ते ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इदमिति । यत्र यस्मिन् वृत्ते चतुर्भ्यो यगणेभ्यः परमेको गुरुः स्यात्, तत् कन्दुकं नाम वृत्तम् ।

हि०—जिसके प्रत्येक पाद में यगण, मगण, दो रगण तथा एक गुरु हों, उसे 'चञ्चरीकावली' कहते हैं ॥ १ ॥

जिसके एक चरणमें क्रमशः नगण, सगण, दो रगण और एक गुरु हों, वह 'चन्द्ररेखा' नामक वृत्त है । इसमें छः तथा सात अक्षरों पर यति करनी चाहिये ॥२॥

जिसके एक पादमें क्रमशः जगण, सगण, तगण, सगण और एक गुरु हों, उसे 'उपस्थित' नामक वृत्त कहते हैं ॥ ३ ॥

जिसके एक पादमें क्रमशः जगण, तगण, सगण, जगण और एक गुरु हों, वह 'मञ्जुहासिनी' नामक वृत्त कहलाता है ॥ ४ ॥

जिस वृत्त में चार यगणों के पश्चात् एक गुरु हो, वह 'कन्दुक' नामक वृत्त कहा जाता है ॥ ५ ॥

त भ स ज ग

SSI SII IIS ISI S

एते क्रमात्तभसजसंज्ञका गणा
गश्चान्ततो यदि निहितो महीपते ।
वेदैर्ग्रहैश्च भवति यतिश्च शोभना
नागाधिपो वदति तथा प्रभावतीम् ॥ १ ॥

इति वृत्तरत्नावल्याम् ।

प्र०—हे महीपते राजन् ! यदि एते तभसजसंज्ञका गणाः तगणभगणसगणजगणाख्या इत्यर्थः, क्रमेण भवन्ति, एषामन्ते चैको गुरुः निहितः सन्निवेशितः स्यात्, वेदैश्चतुर्भिः ग्रहैर्नवभिश्चाक्षरैः शोभना स्पष्टमुपलभ्यमाना यतिश्च स्यात्, तदा नागाधिपः पिङ्गलमुनिः, प्रभावतीं तन्नाम वृत्तं, वदति कथयति ।

हि०—हे राजन् ! यदि क्रमशः तगण, भगण, सगण और जगण हों और उनके अन्त में एक गुरु रखा गया हो तथा चार और नौ अक्षरों पर यति की गई हो तो नागाधिप (पिङ्गलाचार्य) उसे 'प्रभावती' नामक छन्द कहते हैं ॥ १ ॥

(१४) शक्वरी (चतुर्दशाक्षरा वृत्तिः) ।

म ग ग न न म

SSS SS III III SSS

मो गौ नौ मश्चेच्छरनवभिरसम्बाधा ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वीर्याग्नौ येन ज्वलति रणवशात्क्षिप्ते दैत्येन्द्रे जाता धरणिरियमसम्बाधा ।
धर्मस्थित्यर्थं प्रकटिततनुसम्बन्धः साधूनां बाधां प्रशमयतु स कंसारिः ॥

प्रं०—म्तो गाविति । यस्याः पादे प्रथमं मगणः, अनन्तरं द्वौ गुरू ततो नगणद्वयं, ततः परं मगणः स्यात्, शरैः पञ्चभिः नवभिश्चाक्षरैः यतिश्च स्यात्, सा असम्बाधा नामोच्यते ।

वीर्याग्नाविति । येन श्रीकृष्णेन, रणवशात् रणं द्वारीकृत्य युद्ध इत्यर्थः, ज्वलति दीपिते प्रवृद्ध इति यावत्, वीर्यं सामर्थ्यमेव अग्निर्वह्निः शत्रूणां भस्मीकरणादिति भावः, तस्मिन्, दैत्येन्द्रे कंसे, क्षिप्ते आहुतीकृते सति निहते इत्यर्थः, इयं धरणिः पृथ्वी, असम्बाधा निर्दुःखा जातेत्यर्थः । धर्मस्थित्यर्थं धर्मरक्षार्थं, प्रकटितः प्रकाशितः तनुसम्बन्धः शरीरपरिग्रहो येन तादृशः स्वमाययाऽऽविर्भूत-सगुणमूर्तिः, सः कंसारिः श्रीकृष्णः, साधूनां महात्मनां, बाधां पीडां प्रशमयतु निवारयतु ।

'परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥'

इति भगवद्गीतास्मृतेः ।

ह०—जिसमें मगण, दो गुरु, दो नगण और अन्त में मगण हों तथा पांच और नौ अक्षरों पर विराम हो, उसे 'असम्बाधा' नामक छन्द कहते हैं ।

जिस श्रीकृष्ण भगवान् ने युद्ध करके अपनी प्रदीप्त प्रतापाग्नि में दैत्यराज कंस की आहुति देकर इस पृथ्वी को निरुपद्रव कर दिया, धर्म की रक्षा के लिये लीला-विग्रह धारण करनेवाले वे भगवान् श्रीकृष्ण महात्माओं का दुःख शान्त करें ॥१॥

त भ ज ज ग ग

SSI SII ISI ISI S S

ज्ञेयं वसन्ततिलकं तभजा जगौ गः ॥ २ ॥

फुल्लं वसन्ततिलकं तिलकं वनाल्या
लीलापरं पिककुलं कलमत्र रौति ।
वात्येष पुष्पसुरभिर्मलयाद्रिवातो
यातो हरिः स मथुरां, विधिना हताः स्मः ॥

सिंहोद्धता क्वापि ।

प्र०—ज्ञेयमिति । यत्र तगणभगणौ, जगणद्वयं पुनर्द्वौ गुरू भवेताम्, तः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वसन्ततिलकं नाम वृत्तं ज्ञेयम् । वसन्ततिलका, उद्धर्षिणी, सिंहोद्धताऽप्यस्यैव नामान्तरम् । तदुक्तं वृत्तरत्नाकरे—

उक्ता वसन्ततिलका तभजा जगौ ग
सिंहोन्नतेयमुदिता मुनिकाश्यपेन ।
उद्धर्षिणीति गदिता मुनिसैतवेन
रामेण सेयमुदिता मधुमाधवीति ॥

फुल्लमिति । वनाल्याः वनपङ्क्तेः स्त्रिया इवेति गम्यते, तिलकं विशेषकस्वरूपं, 'तमालपत्रतिलकचित्रकाणि विशेषकम्' इत्यमरः, वसन्ततिलकं वसन्तस्य ऋतुराजस्य तिलकं तिलपुष्पं, फुल्लं विकसितम्, फुल्लमिति 'फुल्ल विकसने' इत्यस्य पचाद्यचि बोध्यम्, अत्र वसन्तसमये. लीलापरं क्रीडासक्तं, पिककुलं परभृतगणः, कलमव्यक्तमधुरं यथा तथा, रौति पञ्चमस्वरेण कूजति । पुष्पसुरभिः पुष्पगन्धेन मनोहरः, मलयाद्रिवातः मलयाचलपवनः, वाति मन्दं मन्दं प्रसर्पति । एवं सर्वमप्युद्दीपकं वस्तुजातं सन्निहितं वर्तत इति भावः । परन्तु स विनोदनक्षमः प्रियतमः, हरिः श्रीकृष्णः, मथुरां यातः गतः, अतो वयं विधिना भाग्येन, हताः पीडिताः स्मः । मथुरां गतस्य श्रीकृष्णस्य विरहविधुराणां व्रजयोषितामुक्तिरियम् ।

हि०—जिसमें तगण, भगण, जगण पुनः जगण और अन्त में दो गुरु हों, उस छन्द को 'वसन्ततिलक' कहते हैं ।

वनश्रेणी का तिलक-स्वरूप तिल-पुष्प खिल रहा है, विहार करता हुआ कोकिलवृन्द राग अलाप रहा है, पुष्प-सुगन्धित मलयपवन चल रहा है, परन्तु प्रियतम श्रीकृष्ण मथुरा चले गये हैं; हा दुर्दैव ने हमें मार डाला ॥ २ ॥

न न र स लग

। । । । । । S । । । । S । S

ननरसलघुगैः स्वरैरपराजिता ॥ ३ ॥

यदनवधिभुजप्रतापकृतास्पदा यदुनिचयचमूः परैरपराजिता ।
व्यजयत समरे समस्तरिपुव्रजं स जयति जगतां गतिर्गरुडध्वजः ॥

प्र०—ननरसेति । नगणनगणरगणसगणलघुगुरुभिश्च अपराजिता वृत्तं भवति । स्वरैः स्वराश्च स्वराश्चेत्येकशेषः तैः, सप्तभिः सप्तभिश्च कृत्वा यतिरित्यर्थः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यदिति । यस्य गरुडध्वजस्य अनवधौ निःसीमे अपरिमिते भुजप्रतापे बाहु-वीर्ये कृतमास्पदं स्थितिर्यया सा तथोक्ता, यस्य बाहुवीर्यमाश्रित्य स्थितेत्यर्थः, अत एव परैः शत्रुभिः, अपराजिता अनभिभूता, यदुनिचयचमूः यादवकुलसेना, समरे युद्धे, समस्तं सकलं रिपुवृन्दं, शत्रुवृन्दं, व्यजयत पराजितवती, जगतां लोकत्रयस्य, गतिः परायणः आश्रयः, स प्रसिद्धः, गरुडध्वजः श्रीकृष्णः, जयति सर्वोत्कर्षेण वर्तते ।

रु०—यदि नगण, नगण, रगण, सगण, एक लघु और एक गुरु हों तो उस छन्द का नाम 'अपराजिता' है और उसमें सात अक्षरों पर यति होती है ।

जिन श्रीकृष्ण महाराज के अपरिमित बाहुबल के सहारे शत्रुओं से पराजित न होनेवाली यादवी सेना ने युद्ध में सब शत्रुओंको जीत लिया, संसार के अवलम्बन वे कृष्ण भगवान् का जय-जयकार है ॥ ४ ॥

न न भ न ल ग

।।। ।।। ऽ।। ।।। । ऽ

ननभनलगिति प्रहरणकलिका ॥ ५ ॥

व्यथयति कुसुमप्रहरण ! कलिका प्रमदवनभवा तव धनुषि तता ।
विरहविपदि मे शरणमिह ततो मधुमथनगुणस्मरणमविरतम् ॥

प्र०—ननभनेति । ननभनलग् नश्च नश्च भश्च नश्च ल च ग् च एषां समाहारः, नगणनगणभगणनगणलघुगुरवश्चेदित्यर्थः तदा इयं प्रहरणकलिका नामोच्यते । यतिश्च पूर्ववत् ।

व्यथयतीति । कुसुमानि पुष्पाणि प्रहरणानि बाणा यस्य तत्सम्बोधने हे कुसुमप्रहरण ! पुष्पसायक ! तव धनुषि चापे, तता आरोपिता, प्रमदवनभवा अन्तःपुरोपवनसमुत्पन्ना, कलिका कोरकः व्यथयति, पीडयति, मामिति शेषः । कामबाणैरहं पीडिताऽस्मीति भावः । ततः तस्मात्कारणात्, इह अस्यां विरहविपदि विरह एव विपत् तस्याम्, अविरतं निरन्तरं, मधुमथनस्य श्रीकृष्णस्य गुणानां स्मरणं ध्यानमेव, मे मम, शरणं रक्षकम्, अस्तीति शेषः । विरहिण्याः कस्याश्चिद् व्रजाङ्गनाया उक्तिरियम् ।

रु०—यदि प्रथम दो नगण पुनः भगण पुनः नगण और अन्त में एक लघु और एक गुरु हों तो उस छन्द को 'प्रहरणकलिका' कहते हैं ।

हे पुष्पसायक ! तुम्हारे धनुष पर चढ़ी हुई, अन्तःपुर के बाग में उत्पन्न कली

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मुझे पीडित कर रही है, इसलिए इस विपत्तिकाल में श्रीकृष्ण के गुणों का स्मरण ही मेरा रक्षक है ॥ ४ ॥

म त न म गग
S S S S S I I I I I S S S S S

मात्तो नो मो गौ यदि गदिता वासन्तीयम् ॥ ५ ॥

भ्राम्यद्भृङ्गीनिर्भरमधुरालापोद्गीतैः
श्रीखण्डाद्रेरद्भुतपवनैर्मन्दान्दोला ॥
लीलालोला पल्लवविलसद्धस्तोल्लासैः
कंसारातौ नृत्यति सदृशी वासन्तीयम् ॥

प्र०—मात्त इति । यदि मात् मगणात् परं तः तगणः, तदनु नगणः, मगणः, ततो द्वौ गुरू च स्याताम्, तदा इयं वासन्ती गदिता ।

भ्राम्यदिति । कंसारातौ श्रीकृष्णे, नृत्यति सति, श्रीखण्डाद्रेः मलयपर्वतस्य, अद्भुतपवनैः विलक्षणवायुभिः, इतरपवनाद्विलक्षणत्वं च सौगन्ध्यादिना बोध्यम्, मन्दः ईषत् आन्दोलः कम्पनं यस्याः तथोक्ता शनैः शनैः कम्पितेत्यर्थः भ्राम्यन्तीनामितस्ततः धावन्तीनां भृङ्गीणां भ्रमरीणां निर्भरैः अतिशयितैः मधुरालापैः मधुरगुञ्जनैरेव उद्गीतैरुच्चैर्गानैः उपलक्षिता, लीलालोला विलासचपला, पल्लवाः किसलया एव विलसन्तः शोभामानाः हस्तोल्लासाः उल्लसिता हस्तास्तैरुपलक्षिता, इयं वासन्ती माधवी लता, सदृशी अभूत् । नृत्यता श्रीकृष्णेन समं साऽप्यनृत्यदित्यर्थः ।

रु०—यदि मगण के बाद तगण, नगण और मगण हों और उसके अनन्तर दो गुरु हों तो उसे 'वासन्ती' नामक छन्द कहते हैं ।

जिस समय श्रीकृष्ण भगवान् नाच रहे थे उस समय यह माधवी लता भी नृत्य सा कर रही थी । उस समय इधर-उधर उड़ती हुई भ्रमरियों के मधुरालाप ही इस (माधवी लता) के गान का कार्य कर रहे थे । मलयाचल की विलक्षण हवा से यह धीरे-धीरे झूमने लगी । उस समय यह विलासपूर्वक चञ्चल हो उठी । इसके पत्ते ही उठे हुए हाथ से सुशोभित हो रहे थे ॥ ५ ॥

म स म भ गग
S S S I I S S S S S I I S S

छिःसप्तच्छिद्दि लोला म्सौ म्भौ गौ चरणे चेत् ॥ ६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मुग्धे ! यौवनलक्ष्मीर्विद्युद्विभ्रमलोला
त्रैलोक्याद्भुतरूपो गोविन्दोऽतिदुरापः ।
तद् वृन्दावनकुञ्जे गुञ्जद्भृङ्गसनाथे
श्रीनाथेन समेता स्वच्छन्दं कुरु केलिम् ॥

प्र०—द्विरिति । यदि चरणे पादे, मगणसगणौ, ततः मगणभगणौ, अनन्तरं द्वौ गुरू च स्यातां, तदा लोला नाम स्यात् । अत्र द्विः द्विरावृत्तैः सप्तभिर्वर्णैः, सप्तभिः सप्तभिर्वर्णैरित्यर्थः, यतिः स्यात् ।

मुग्धे इति । हे मुग्धे ! अवसरानभिज्ञे ! यौवनलक्ष्मीः तारुण्यश्रीः यौवनजनितं सौन्दर्यादिकमित्यर्थः, विद्युतो विभ्रमवत् स्फुरणमिव लोला चञ्चला तडित्स्फुरणमिव क्षणविनाशिनीत्यर्थः, त्रैलोक्ये भुवनत्रये अद्भुतरूपः विलक्षणसौन्दर्यः लोकातिशायिसौन्दर्यवानिति भावः, गोविन्दः श्रीकृष्णः, अतिदुरापः बहुदुर्लभः । न स सर्वाभिरनायासेन लब्धुं शक्यः । त्वया तु लब्धोऽतस्त्वं भाग्यशालिनीति भावः । तत् ततो, गुञ्जद्भिर्मधुरालापं कुर्वद्भिः, भृङ्गैर्भ्रमरैः, सनाथे युक्ते, वृन्दावनकुञ्जे वृन्दावनवर्तिलतागृहे, श्रीनाथेन श्रीकृष्णेन, समेता युक्ता सती तेन सहेत्यर्थः, स्वच्छन्दं स्वेच्छानुसारं, केलिं क्रीडां कुरु ।

रू०—यदि एक पाद में क्रमशः मगण, सगण, मगण, भगण और दो गुरु वर्ण हों तथा सात-सात अक्षरों पर यति की जावे तो उसे 'लोला' नामक छन्द कहते हैं ।

अरी भोली ! यौवन-श्री विद्युद्-विलास के समान चञ्चल है, अलौकिक सुन्दर श्रीकृष्ण अत्यन्त दुर्लभ हैं, इसलिए गूँजते हुए भ्रमरों से युक्त वृन्दावन-निकुञ्जों में कृष्ण के साथ स्वच्छन्दतापूर्वक विहार कर ॥ ६ ॥

न न त त ग ग
||| ||| SS| SS| S S

स्वरभिदि यदि नौ तौ च नान्दीमुखी गौ ॥ ७ ॥

सरसखगकुलालापनान्दीमुखीयं
लहरिभुजलया चारुफेनस्मितश्रीः ।
मुरहर ! कलयासक्तिमासाद्य किं ते
प्रमुदितहृदया भानुजा नृत्यतीह ? ॥

प्र०—स्वरेति । यदि एकस्मिन् चरणे द्वौ नगणौ, द्वौ तगणौ, ततो गुरुद्वयं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

च स्यात्, सा नान्दीमुखी नाम भवति। अत्रापि स्वरैः सप्तभिर्वर्णैर्मंदो यतिर्भवति।

सरसेति। मुरहर। हे कृष्ण! सरसो मधुरो यः खगकुलस्य पक्षिवृन्दस्य आलापः कूजनं स एव नान्दीमुखं मङ्गलस्तुतिप्रारम्भो यस्याः सा, चार्वी मनोज्ञा फेना एव स्मितश्रीः ईषद्धासशोभा यस्याः सा यद्वा चार्विति फेनविशेषणम्, लहर्यं-स्तरङ्गा एव भुजलया हस्तक्षेपा यस्याः सा, इयं भानुजा यमुना, ते तव आसत्तिं सान्निध्यम्, आसाद्य प्राप्य, प्रमुदितहृदया प्रसन्नान्तःकरणा इव, नृत्यति किम्? कलय अवलोकय।

ह०—जिसके एक चरण में क्रमशः दो नगण, दो तगण और दो गुरु हों और सात-सात वर्णों पर यति हो, उसे 'नान्दीमुखी' नाम वृत्त कहते हैं।

हे कृष्ण! देखो, तुम्हारे समीपस्थ होने से प्रसन्नचित्त यमुना नाच सी रही है। पक्षिगण का मधुर कूजन ही इसके मङ्गलगान का प्रारम्भ है। सुन्दर फेन ही इसकी स्मितश्री है और लहररूपी भुजाएँ लय दे रही हैं॥

(१५) अतिशर्करी (पञ्चदशाक्षरा वृत्तिः)

। । । । । । । । । । । । । । ऽ

गुरुनिधनमनुलघुरिह शशिकला॥ १॥

मलयजतिलकसमुदितशशिकला
व्रजयुवतिलसदलिकगगनगता।
सरसिजनयनहृदयसलिलनिधिं
व्यतनुत विततरभसपरितरलम्॥

प्र०—गुर्विति। इह छन्दोग्रन्थे, गुरुः गुरुवर्णः, निधने अन्ते यस्याः सा गुरुनिधना, मानवश्चतुर्दशवर्णाः लघवो यत्र सा मनुलघुः, गुरुनिधना चासौ मनुलघुः सा गुरुनिधनमनुलघुः। कर्मधारयसमासे पूर्वपदस्य पुंवद्भावात् ह्रस्वत्वम्। ईदृशं वृत्तं शशिकला नाम कथ्यते। अत्र सप्तभिरष्टभिश्च वर्णैर्यतिरिति सम्प्रदायः।

मलयजेति। व्रजयुवतीनां गोपीनां लसत् शोभमानम् अलिकं ललाटमेव गगनमाकाशं तत्र गता स्थिता, मलयजस्य चन्दनस्य तिलकं विशेषकमेव समुदिता उद्भूता शोभमानेत्यर्थः, शशिकला चन्द्रकला कर्त्री, सरसिजनयनस्य कमलनेत्रस्य श्रीकृष्णस्य हृदयमेव सलिलनिधिः समुद्रस्तम्, गभीरत्वादक्षोभ्यत्वाच्च

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हृदयस्य सलिलनिधित्वेन रूपणम् , विततेन विस्तीर्णेन महतेत्यर्थः । रभसेन हर्षेण 'रभसो वेगहर्षयो' रित्यमरः, परितरलं सातिशयचञ्चलं, व्यतनुत अकरोत् । चन्द्रमण्डलं दृष्ट्वा यथा समुद्रो हर्षणेव समुच्छलति तथा व्रजाङ्गनाललाटस्थितं तिलकं विलोक्य श्रीकृष्णस्य हृदयं हर्षपूर्णं बभूवेति भावः । रूपकालङ्कारः ।

ह०—इस छन्दोग्रन्थ में जिसके चरण में १४ लघु वर्णों के अनन्तर एक गुरु वर्ण हो, वह 'शशिकला' नामक छन्द कहलाता है ।

व्रजाङ्गनाओं के ललाटरूपी गगनमण्डल में स्थित, चन्दन के तिलकरूपी चन्द्रकला ने श्रीकृष्ण के हृदयरूपी सागर को हर्ष से अत्यन्त चञ्चल कर दिया ॥ १ ॥

स्रगियमपि च रसनवरचितयतिः ॥ २ ॥

अयि ! सहचरि ! रुचिरतरगुणमयी
म्रदिमवसतिरनपगतपरिमला ।
स्रगिव निवस विलसदनुपमरसा
सुमुखि ! मुदितदनुजदलनहृदये ॥

प्र०—स्रगिति । इयं शशिकला अपि शशिकला नाम वृत्तमेव, रसैः षड्भिः नवभिश्चाक्षरैः रचिता यतिर्यस्यां तादृशी चेत् , तदा स्रक् इति नाम लभते ।

अयीति । अयि ! सुमुखि ! सुन्दरि ! सखि ! रुचिरतरा अतिमनोज्ञा नायकवशीकरणसमर्था, ये सौन्दर्याद्या गुणाः तन्मयी तद्रूपा सती, पक्षे मनोहरसूत्रोपेता, म्रदिम्नः कोमलत्वस्य वसतिः वासस्थानम् , सातिशयकोमलेत्यर्थः, पक्षद्वयेऽपि समानमेतम् , न अपगतो न दूरीभूतः परिमलः सौरभं यस्याः सा अभुक्तयौवना पद्मिनीत्वात् सर्वकालोन्मीलत्सौरभेति यावत् , पक्षे अपर्युषितत्वात् सौरभवतीत्यर्थः, विलसन् शोभमानः अनुपमोऽद्वितीयः रसोऽनुरागः पक्षे मधु च यस्याः सा तादृशी त्वं, मुदितस्य प्रसन्नस्य दनुजदलनस्य श्रीकृष्णस्य हृदये, स्रगिव मालेव, निवसतिष्ठ । उपमालङ्कारः ।

ह०—यदि इस 'शशिकला' नामक वृत्त में ही छः और नौ पर यति की जाय तो यह 'स्रक्' नामक वृत्त कहा जाता है ।

हे सुन्दरी सखि ! जिस प्रकार सुन्दर डोरे में गुथी हुई, कोमलता की खान, सुगन्धित और मधु बरसानेवाली माला श्रीकृष्ण भगवान् के वक्षःस्थल पर विराजती है उसी प्रकार तुम भी उनके हृदय में निवास करो । क्योंकि तुम्हारे अन्दर उनको वशीभूत करने योग्य अनेक गुण हैं, तुम अत्यन्त कोमलाङ्गी हो, तुम्हारे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अन्दर से सर्वदा परिमल निकलता रहता है और तुम्हारा अनुराग भी अनुपम है, इन गुणों के कारण तुम निस्सन्देह उनके हृदय में वास करने योग्य हो ॥ २ ॥

वसुमुनियतिरिति मणिगुणनिकरः ॥ ३ ॥

नरकरिपुरवतु निखिलसुरगति-
रमितमहिमभरसहजनिवसतिः ।
अनवधिमणिगुणनिकरपरिचितः
सरिदधिपतिरिव धृततनुविभवः ॥

प्र०—वस्विति । यदि वसुभिरष्टाभिः मुनिभिः सप्तभिश्च यतिः यस्याः एवंविधा शशिकला स्यात् , तदा मणिगुणनिकर इति नाम छन्द उच्यते ।

नरकेति । निखिलानां समस्तानां सुराणां देवानां गतिराश्रयः, अमितः अपरिमितः यो महिमभरः महत्त्वातिशयः तस्य सहजा स्वाभाविकी निवसतिरधिष्ठानम् , अनवधयो निःसीमानः असङ्ख्याता ये मणय इव दीप्यमाना गुणाः सौन्दर्यादयस्तेषां निकरेण समूहेन परिचितः विदितः तादृग्गुणविशिष्ट इत्यर्थः, पक्षे अनवधीनां प्रभूतानां मणीनां रत्नानां गुणानां वर्णानां निकरेण परिचितः समुल्लासितः, सरिदधिपतिः समुद्र इव, धृतः परिगृहीतः तनोः शरीरस्य विभव ऐश्वर्यं प्रवृद्धत्वं येन तादृशः, नरकरिपुः नरकासुरहन्ता श्रीकृष्णः, अवतु रक्षतु सर्वानिति शेषः । उपमालङ्कारः ।

रु०—यदि 'शशिकला' में ही आठ और सात पर यति की जावे तो उसका नाम 'मणिगुणनिकर' होता है ।

समस्त देवताओं के आश्रयस्वरूप, अपरमित माहात्म्य के स्वाभाविक निवासस्थान, असङ्ख्यात मणियों के समान दीप्यमान गुणों से समुल्लासित समुद्र के समान शरीर-वृद्धि धारण करनेवाले भगवान् श्रीकृष्ण (सबकी) रक्षा करें ॥ ३ ॥

न न म य य

। । । । । । ऽ ऽ ऽ । ऽ ऽ । ऽ ऽ

ननमयययुतेयं मालिनी भोगिलोकैः ॥ ४ ॥

मृगमदकृतचर्चा पीतकौशेयवासा
रुचिरशिखिशिखण्डाऽऽबद्धधम्मिल्लपाशा ।
अनृजुनिहितमंसे वंशमुत्क्वाणयन्ती
धृतमधुरिपुलीला मालिनी पातु राधा ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्र०—ननेति । भोगिलोकैः अष्टभिः सप्तभिश्च, यतौ सत्यामिति शेषः, ननमयययुता नगणाभ्यां मगणेन यगणाभ्यां च युक्ता इयं मालिनी भवति ॥ ४ ॥

मृगमदेति । मृगमदेन कस्तूरिकया कृता चर्चा अङ्गरागो यथा सा तथोक्ता, एतेन कृष्णस्य वर्णसाम्यं सम्पादितम्, पीतं पीतवर्णं कौशेयं क्षौमं वासो वस्त्रं यस्याः तथोक्ता, एतेन पीताम्बरत्वं सम्पादितम्, रुचिरैः मनोहरैः शिखिनां मयूराणां शिखण्डैः बर्हैः आबद्धः संयतः धम्मिल्लपाशः केशकलापो यया सा तथोक्ता, माला अस्त्यस्याः सा मालिनी स्रग्विणी, अंसे स्कन्धे, न ऋतु अनृजु तिर्यगित्यर्थः, निहितं स्थापितं वंशं वेणुं वाद्यविशेषम्, उत्क्वाणयन्ती वादयन्ती, अत एव धृता स्वीकृता मधुरिपोः श्रीकृष्णस्य लीला विलासो यथा तथोक्ता राधा, पातु रक्षतु ।

रू०—यदि दो नगण, एक मगण, पुनः दो यगण हों तो वह 'मालिनी' छन्द कहलाता है ।

कस्तूरिका का अङ्गराग लगाये पीला रेशमी वस्त्र धारण किये हुए, सुन्दर मयूर-पिच्छों से केश बांधे हुए माला पहिने हुए और कन्धे पर तिरछे रखे हुए वेणु को बजाती हुई इस प्रकार श्रीकृष्ण का अनुकरण करनेवाली श्रीराधा रक्षा करे ॥ ४ ॥

म　म　म　म　म

ऽऽऽ ऽऽऽ ऽऽऽ ऽऽऽ ऽऽऽ ऽ

एकन्यूनौ विद्युन्मालापादौ चेल्लीलाखेलः ॥ ५ ॥

(क) पायाद्वो गोविन्दः कालिन्दीकूलद्रोणीचक्रे
　　रासोल्लासक्रीडद्गोपीभिः सार्धं लीलाखेलः ।
मन्दाकिन्यास्तीरोपान्ते स्वैरक्रीडाभिर्लोलो
　　यद्वद् देवानामीशः स्वर्वेश्याभिः खेलन्तीभिः ॥

(ख) मा कान्ते ! पक्षस्यान्ते पर्याकाशे देशे स्वाप्सीः ।
　　कान्तं वक्त्रं वृत्तं पूर्णं चन्द्रं मत्वा रात्रौ चेत् ।
क्षुत्क्षामः प्राटंश्चेतश्चेद् राहुः क्रूरः प्राश्या-
　　त्तस्माद् ध्वान्ते हर्म्यस्यान्ते शय्यैकान्ते कर्तव्या ॥

प्र०—एकेति । तत्र एकन्यूनौ एकाक्षरहीनौ, विद्युन्मालापादौ पूर्वोक्तविद्युन्मालायाः पादौ स्यातम्, तदा लीलाखेलनामकं वृत्तं स्यात् । विद्युन्मालायाः सर्वदीर्घाक्षरयुतोऽष्टवर्णघटितः पादः पूर्वमुक्तः, तस्याः पादद्वये षोडश दीर्घाक्षराणि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भवन्ति। एकेन न्यूनौ तस्याः द्वौ पादौ पञ्चदशदीर्घाक्षरसंयुक्तौ भवतः, स एव लीलाखेलो नाम भवति।

(क) पायादिति। कालिन्द्या यमुनायाः कूले तटे यत् क्षोणीचक्रं वर्तुलीभूतभूप्रदेशस्तत्र, रासे उल्लासो हर्षातिशयो यासां ताः अत एव क्रीडन्त्यो या गोप्यस्ताभिः सार्धम्, यद्वा रासे उल्लासेन हर्षातिशयात् क्रीडन्तीभिरिति पूर्ववत् लीला खेला विलासो यस्य तादृशः, मन्दाकिन्याः देवधुन्याः तीरोपान्ते तटसमीपे, स्वैरं स्वच्छन्दं यथा तथा क्रीडा यासां ताभिः, खेलन्तीभिः, क्रीडन्तीभिः, स्वर्वेश्याभिर्देवाङ्गनाभिः, लोलः विलासचञ्चलः देवानामीशः यद्वत् सुरेन्द्र इन्द्र इव, गोविन्दः, श्रीकृष्णः, वः युष्मान्, पायाद् रक्षेत्। उपमाऽलङ्कारः।

(ख) मा कान्ते इति। हे कान्ते! प्रिये! पक्षस्य शुक्लपक्षस्यान्तेऽवसाने पूर्णिमायामिति भावः, परितः समन्ताद् आकाशं यत्र तथाभूते सर्वतोऽनावृतस्थान इत्यर्थः, एतादृशे देशे प्रदेशे, रात्रौ मा स्वाप्सीः शयनं मा कुरु। किमिति मा स्वाप्सीरित्यत आह—कान्तमित्यादि। चेद् यदि, क्षुधा क्षामः कृशः बुभुक्षित इत्यर्थ, अत एव क्रूरो निर्दयः राहुः, इतश्चेतः दिशि दिशि प्राटन् भ्रमन् भक्ष्यपरिमार्गणायेति भावः, कान्तं मनोहरं, वृत्तं वर्तुलं, वक्त्रं मुखं तवेति शेषः, पूर्णं पूर्णमण्डलं, चन्द्रं मत्वा प्रायात् प्रसेत्, तस्माद्धेतोः हर्म्यस्य प्रासादस्यान्तेऽभ्यन्तरे, ध्वान्ते अन्धकारे, एकान्ते निर्जनप्रदेशे, शय्या कर्तव्या शयनं विरचनीयम्। रिरंसोः कस्यचिन्नायकस्योक्तिरियम्।

स०—यदि 'विद्युन्माला' छन्द के दो पाद एक अक्षर से न्यून हों, तो 'लीलाखेल' नामक वृत्त होता है।

(क) यमुनातट पर गोल दायरे में रास के प्रति अत्यन्त उल्लास के कारण खेलती हुई गोपाङ्गनाओं के साथ श्रीकृष्ण तुम्हारी रक्षा करें, जो उस समय ऐसी ही शोभा धारण करते हैं, जैसी गङ्गातट पर स्वच्छन्द विहार करती हुई उर्वशीप्रभृति अप्सराओं के साथ विहरते हुए इन्द्र शोभित होते हैं।

(ख) हे प्रिये! आज पूर्णिमा-तिथि में खुले हुए स्थान पर न सोना, क्योंकि कदाचित् तुम्हारे सुन्दर गोल मुख को चन्द्रमा समझ कर बुभुक्षित क्रूर राहु न ग्रस लेवे; इसलिए प्रासाद के अन्दर अन्धकार में एकान्त प्रदेश में अपनी चारपाई बिछाना ॥ ५ ॥

न स न र र

। । । । । । ऽ । । । ऽ । ऽ ऽ । ऽ

विपिनतिलकं नसनरेफयुग्मैर्भवेत् ॥ ६ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विपिनतिलकं विकसितं वसन्तागमे
मधुकृतमदैर्मधुकरैः क्वणद्भिर्वृतम् ।
मलयमरुता रचितलास्यमालोकयन्
व्रजयुवतिभिर्विहरति स्म मुग्धो हरिः ॥

प्र०—विपिनेति । यस्य पादो नसनरेफयुग्मैः नगणसगणनगणैः ततः परं रेफद्वयेन च प्रथितो भवेत्, तद् विपिनतिलकं नाम वृत्तं भवति ।

विपिनतिलकमिति । मुग्धो मनोहरः, हरिः कृष्णः, वसन्तागमे वसन्तर्तु-प्रारम्भे, विकसितं प्रफुल्लं, मधुना पुष्परसेन कृतो जनितः मदो मत्तता हर्षातिशयो येषां तादृशैः, क्वणद्भिः गुञ्जद्भिः, मधुकरैर्भ्रमरैः, वृतं व्याप्तं मलयमरुता मलया-चलवायुना, रचितलास्यं नृत्यमानं विपिनतिलकं वनतिलककुसुमम्, आलोकयन् पश्यन्, व्रजयुवतिभिः व्रजाङ्गनाभिः सह विहरति स्म ।

रु०—जिसके एक चरण में नगण, सगण, नगण और दो रेफ हों, उसे 'विपिन-तिलक' नामक वृत्त कहते हैं ।

सुन्दर श्रीकृष्ण भगवान् वसन्त के प्रारम्भ में विकसित, पुष्परस का पान करने के कारण उन्मत्त और झङ्कार करते हुए भ्रमरों से व्याप्त, मलयाचल-वायु के स्पर्श से नाचते हुए जङ्गली तिलक पुष्पों को देख-देख, व्रजाङ्गनाओं के साथ विहार करते थे ॥ ६ ॥

ग ल र ज ग ल र ल ग

S I S I S I S I S I S I S I S

तूणकं समानिकापदद्वयं विनाऽन्तिमम् ॥ ७ ॥

सा सुवर्णकेतकं विकासि भृङ्गपूरितं
पञ्चबाणबाणजालपूर्णहेमतूणकम् ।
राधिका वितर्क्य माधवाऽद्य मासि माधवे
मोहमेति निर्भरं त्वया विना कलानिधे ! ॥

प्र०—तूणकमिति । 'ग्लौ रजौ समानिका तु' इति समानिकालक्षणं पूर्व-मुक्तम् । तत्समानिकापदद्वयम् अन्तिमाक्षरं विना स्थितं सद् यस्यैकः पादो भवेत्, तत् तूणकं नाम वृत्तं भवेत् ।

सेति । हे कलानिधे ! कलानां नृत्यादिचतुःषष्टिविद्यानां निधे ! आश्रय ! चतुःषष्टिकलाभिज्ञेत्यर्थः । हे माधव ! श्रीकृष्ण ! सा पूर्वं त्वया सह सततं विहर-न्तीति भावः, राधिकेत्यर्थः, अद्य माधवे मासि वैशाखमासे वसन्तर्ताविति यावत्,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विकासि प्रफुल्लम्, भृङ्गैर्मधुकरैः पूरितं व्याप्तम्, सुवर्णकेतकं पीतकेतकीपुष्पम् पञ्चबाणस्य कामस्य बाणजालेन शरसमूहेन पूर्णं व्याप्तं हेमतूणकं सौवर्णतूणीरं, वितर्क्य मत्वा, त्वया विना त्वद्विरहातुरा सतीत्यर्थः, निर्भरमत्यन्तं, मोहं मूर्च्छाम्, एति प्राप्नोति । उत्प्रेक्षाऽलङ्कारः ।

हि०—जिसका एक चरण अन्तिमाक्षरशून्य 'समानिका' वृत्त के दो पादके समान हो, वह 'तूणक' नामक छन्द कहा जाता है ।

समस्तकलाओं में निपुण हे श्रीकृष्ण ! वह राधिका आज वैशाख मास में, खिले हुए, भ्रमरपूर्ण, पीले केतकी-पुष्प को कामदेव के बाणों से पूर्ण सुवर्णमय तूणीर समझकर, तुम्हारे बिना पुनः मूर्च्छित हो रही है ॥ ७ ॥

म र म य य

SSS SIS SSS ISS ISS

म्रौ मो यौ चेद्भवेतां सप्ताष्टकैश्चन्द्रलेखा ॥ ८ ॥

विच्छेदे ते मुरारे ! पाण्डुप्रकाशा कृशाङ्गी
म्लानच्छायं दुकूलं न भ्राजते बिभ्रती सा ।
राधाऽम्भोदस्य गर्भे लीना यथा चन्द्रलेखा
किञ्चार्ता त्वां स्मरन्ती धत्ते ध्रुवं जीवयोगम् ॥

प्र०—म्राविति । यत्र मगणरगणौ मगणः, ततो द्वौ यगणौ भवेतां, सा चन्द्रलेखा नाम । अत्र सप्तभिः अष्टभिश्च वर्णैः यतिः कार्येत्यर्थः ।

विच्छेदे इति । हे मुरारे ! कृष्ण ! ते तव, विच्छेदे वियोगे, कृशाङ्गी दुर्बलाऽवयवा, पाण्डुः शुभ्रः प्रकाशः कान्तिर्यस्याः सा तथोक्ता, सा राधा, म्लाना मलिना छाया कान्तिर्यस्य तथोक्तं, दुकूलं क्षौमवस्त्रं, बिभ्रती परिदधाना, निजवस्त्रादिसंस्कारेऽप्युदासीनेति भावः, अम्भोदस्य मेघस्य, गर्भेऽभ्यन्तरे लीना तिरोहिता, चन्द्रलेखा इव, न भ्राजते न शोभते । किञ्च आर्ता विरहपीडिता सती त्वां स्मरन्ती चिन्तयन्ती जीवयोगं जीवस्य जीवनस्य योगं सम्बन्धं, धत्ते धारयति, इति ध्रुवं शङ्के । तव स्मरणमेव तस्याः प्राणधारणोपायः साम्प्रतं वर्तत इति भावः ।

हि०—जिसमें मगण, रगण, मगण और अन्त में दो यगण हों, उसको 'चन्द्रलेखा' कहते हैं ।

हे कृष्ण ! तुम्हारे विरह में उस राधा का शरीर अत्यन्त कृश हो गया है । उसका मुख पीला पड़ गया है । वह अपने वस्त्रादि के सम्बन्ध में इतनी उदासीन

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हो गई है कि मलिन वस्त्र ही धारण किये रहती है। जिस प्रकार मेघों में छिपी हुई चन्द्रकला शोभित नहीं होती, इसी प्रकार वह भी आजकल श्रीहीन हो रही है। विरह-पीड़ित होने पर भी तुम्हारा स्मरण करने से ही प्राणधारण कर रही है॥

म म म य य

ऽऽऽ ऽऽऽ ऽऽऽ।ऽऽ ।ऽऽ

चित्रा नाम च्छन्दश्चित्रं चेत्त्रयो मा यकारौ ॥ ९ ॥

गोपालीलीलालोला यद्वत् कलिन्दात्मजाऽन्ते
खेलन्मुक्ताहाराऽऽरण्यस्रग्लसन्मूर्धचित्रा ।
कंसारातेर्मूर्तिस्तद्वन्मे हृदि क्रीडतीयं
कोऽन्यः स्वर्गो मोक्षो वाऽस्माद्विद्यते तन्न जाने ॥

चित्रेति। चेद् यदि, त्रयो माः त्रयो मगणाः, तदनु यकारौ यगणौ स्यातां, तदा चित्रा नाम, चित्रं विचित्रं छन्दः स्यात्।

गोपालीति। गाः पालयन्तीति गोपाला आभीराः तेषां स्त्रियः गोपाल्यस्ताभिः सह लीलया क्रीडया लोला चञ्चला, खेलन् उरसि क्रीडन् क्रीडासु इतस्ततो गमनवशात् मुक्ताहारो मौक्तिकमाला यस्याः सा, आरण्यस्रजा वनमालया अरण्योद्भवपुष्पग्रथितमालया वा लसन् शोभमानः यो मूर्धा मस्तकं तेन चित्रा मनोहरा, कंसारातेः श्रीकृष्णस्य, इयं मूर्तिः प्रतिकृतिः, यद्वद् यथा, कलिन्दात्मजाऽन्ते यमुनातीरे क्रीडति, तद्वत् तथा, मे हृदि, क्रीडति। अस्मात् श्रीकृष्णलीलास्मरणसम्भूतसुखात्, अन्यः पृथक् तद्व्यतिरिक्त इत्यर्थः, स्वर्गः मोक्षो वा विद्यते, तद् न जाने। एतदतिरिक्तः स्वर्गो मोक्षो वा नास्तीत्यर्थः।

रु०—यदि तीन मगण और उनके अनन्तर दो यगण हों, तो वह विचित्र 'चित्रा' नामक छन्द होता है।

गोपालाङ्गनाओंके साथ लीला तत्पर, वक्षःस्थल पर हिलते हुए मौक्तिक हार से सुशोभित, वनमाला द्वारा बँधे हुए केशों से विराजित श्रीकृष्ण की यह मूर्ति जिस प्रकार यमुना-तट पर विहार करती है, उसी प्रकार मेरे हृदय में भी विराज रही है। मुझे मालूम नहीं, इसके अतिरिक्त स्वर्ग या मोक्ष कोई वस्तु है॥ ९॥

(१६) अष्टिः (षोडशाक्षरा वृत्तिः)

ग ल र ज ग ल र ज

ऽ।ऽ।ऽ।ऽ। ऽ। ऽ।ऽ।ऽ।

चित्रसंज्ञमीरितं समानिकापदद्वयन्तु ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विद्रुमारुणाधरौष्ठशोभिवेणुवाद्यहृष्ट-
वल्लवीजनाङ्गसङ्गजातमुग्धकण्टकाङ्ग ! ।
त्वां सदैव वासुदेव ! पुण्यलभ्यपाद ! देव !
वन्यपुष्पचित्रकेश ! संस्मरामि गोपवेश ! ॥

प्र०—चित्रेति । पूर्वं 'रजौ रजौ समानिका तु' इति समानिकालक्षणमुक्तम्, तस्याः पादद्वयेन यस्यैकः पादो भवेत्, तत् चित्रसंज्ञं नाम वृत्तम्, ईरितं कथितम् ।

विद्रुमेति । विद्रुमः प्रवाल इव अरुणो लोहितः यः अधरोष्ठः तत्र शोभत इति विद्रुमारुणाधरौष्ठशोभी स चासौ वेणुर्वंशस्तस्य वाद्येन हृष्टानां मुदितानां वल्लवीजनानां गोपाङ्गनानाम् अङ्गसङ्गेन शरीरस्पर्शेन जातः समुत्पन्नः मुग्धो मनोरमः कण्टको रोमाञ्चो यत्र तथाभूतमङ्गं यस्य तथोक्तः तत्सम्बोधने, पुण्येन सुकृतेन लभ्यौ प्राप्तव्यौ पादौ यस्य तत्सम्बोधने हे पुण्यलभ्यपाद ! वन्यपुष्पैः आरण्यकुसुमैः चित्रा मनोहराः केशा यस्य तत्सम्बोधने हे वन्यपुष्पचित्रकेश । गोपानां वेश इव वेशो यस्य तत्सम्बोधने हे गोपवेश । देव । वासुदेव । श्रीकृष्ण । अहं त्वां सदैव संस्मरामि चिन्तयामि ।

हि०—जिस छन्द में 'समानिका' नामक छन्द के दो पादों का एक पाद हो उसे 'चित्र' नामक वृत्त कहते हैं ।

प्रवाल के समान रक्तवर्ण ओष्ठ पर सुशोभित वंशी के वादन से प्रसन्न गोपाङ्गनाओं के शरीर-सम्पर्क के कारण रोमाञ्चित हे देव वासुदेव ! तुम्हारे चरण बड़े पुण्यों से प्राप्त होते हैं । हे गोपवेश भगवन् ! जङ्गली पुष्पों से तुम्हारे केश मनोरम हो रहे हैं । मैं तुम्हारा सदा स्मरण करता हूँ ॥ १ ॥

भ र न न न ग

S I I S I S I I I I I I I I S

भ्रत्रिनगैः स्वरात्स्वमृषभगजविलसितम् ॥ २ ॥

यो हरिरुच्चलान खरतरनखशिखरे-
दुर्जयदैत्यसिंहसुविकटहृदयतटम् ।
किन्त्विह चित्रमेव यदखिलमपहृतवान् ।
कंसनिदेशहृष्यदृषभगजविलसितम् ॥

गजतुरगविलसितमिति शम्भौ !

प्र०—भ्रत्रिनगैरिति । भ्रौ च त्रयो नाश्च गुरुश्च तैः भ्रत्रिनगैः । भगणः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रगणौ, त्रयो नगणा, एको गुरुश्चेत्, तदा ऋषभगजविलसितं नाम छन्दः। स्वरात् सप्तमात् परम्, खं विरामो भवति। स्वरात्परं खं शरीरच्छिद्रनवकं यतिस्थानमिति शेष इति वाऽर्थः। सप्तभिः वर्णैः पदान्ते यतिः कर्तव्येत्यर्थः। अत्र 'स्वराङ्क'मिति पाठान्तरं पुस्तकान्तरे। स्वरैः सप्तभिरङ्कैर्नवभिश्च विराम इति तदर्थः।

यो हरिरिति। यो हरिः भगवान् श्रीकृष्णः, खरतरैः अतितीक्ष्णैः नखशिखरैः नखाग्रैः, दुर्जयस्य महावीरस्येत्यर्थः, दैत्यसिंहस्य दैत्यश्रेष्ठस्य हिरण्यकशिपोरित्यर्थः, सुविकटं विशालम् अतिकठिनं वा हृदयतटं वक्षःस्थलम्, उच्चखान विदारयामास, एष श्रीकृष्णः, अखिलं समस्तं कंसनृपतेः राज्ञः कंसस्य निदेशेन आज्ञया दृप्यतोः सञ्जातगर्वयोः ऋषभगजयोः वृषहस्तिरूपधारिणोः क्रमेण अरिष्टकुवलयदानवयोः विलसितं चेष्टितं, यद् अपहृतवान् व्यर्थं चकार, इह विषये, किं चित्रं किमाश्चर्यम्? न किमपीत्यर्थः। यः खलु लीलया नखाग्रैरेव हिरण्यकशिपुं जघान, स तदपेक्षयाऽतितुच्छौ दानवौ अरिष्टकुवलयौ हतवानिति किमाश्चर्यमिति भावः। 'चित्रमेतदखिलमपहृतवतः' इति पाठान्तरम्। अर्थस्तु स एव।

र०—यदि भगण, रगण, तीन नगण और एक गुरु हों, तो उसे 'ऋषभगजविलसित' नामक छन्द कहते हैं।

जिन हरि ने अपने तीक्ष्ण नखाग्रों द्वारा दुर्जय हिरण्यकशिपु का कठोर वक्षःस्थल विदीर्ण कर दिया, यदि उन्होंने कंस की आज्ञा पाकर उन्मत्त हुए ऋषभ और गज (वृषभ तथा गज का रूप धारण किये हुए, अरिष्ट तथा कुवलय नामक दैत्य) की समस्त चेष्टायें व्यर्थ कर दीं तो इसमें कौन आश्चर्य है ॥ २ ॥

भ स म त न ग

S I I I I S S S S S S S I I I I S

भात् समतनगैरष्टच्छेदे स्यादिह चकिता ॥ ३ ॥

दुर्जयदनुजश्रेणीदुश्चेष्टाशतचकिता
यद्भुजपरिघत्राता याता साध्वसविगमम्।
दीव्यन्ति दिविषन्माला शश्वन्नन्दनविपिने
गच्छत शरणं कृष्णं तं भीता भवरिपुतः ॥

प्र०—भादिति। भगणात् परं सगणमगणतगणनगणा, एको गुरुश्च यदि स्यात्, तदा चकिता नाम वृत्तं भवति। इह अस्मिन् वृत्ते, अष्टभिर्वर्णैः छेदो विरामश्च भवतीत्यर्थः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दुर्जयेति । दुर्जया जेतुमशक्या या दनुजानां दैत्यानां श्रेणी समूहस्तस्याः दुश्चेष्टाशतैः अनेकैर्दुष्कर्मभिः चकिता भीता, दिविषदां देवानां माला श्रेणी, परिहन्यतेऽनेनेति परिघः शस्त्रविशेषः यस्य श्रीकृष्णस्य भुजो बाहुरेव परिघः शत्रुविनाशयत्वात् तेन त्राता रक्षिता सति, साध्वसस्य भयस्य विगमं विनाशं, याता प्राप्ता, नन्दनविपिने इन्द्रस्य नन्दनाख्ये वने दीव्यति स्वेच्छया विरहति, भवरिपुतः संसाररूपाच्छत्रोः भीता यूयं, तं कृष्णं, शरणम् आश्रयं, गच्छत लभध्वम् । संसाररिपोः परित्राता हरिरेवैको नान्यः, तदाश्रयेण च सर्वाणि दुःखान्यनायासेन नश्यन्तीति भावः ।

रु०—जिस छन्द में जगण, सगण, जगण, सगण, नगण और एक गुरु हो तथा आठ अक्षरों पर यति हो, उसे 'चकिता' नामक वृत्त कहते हैं ।

अजेय दानवों के अनेक उपद्रवों से भयभीत देवगण, जिनकी भुजारूपी परिघ से सुरक्षित होकर नन्दन वन में बिहार करते हैं, संसाररूपी शत्रु से भयभीत तुम लोग उन्हीं कृष्ण की शरण में जाओ ॥ ३ ॥

ज र लग ज र लग

I S I S I S I S I S I S I S I S

प्रमाणिकापदद्वयं वदन्ति पञ्चचामरम् ॥ ४ ॥

सुरद्रुमूलमण्डपे विचित्ररत्ननिर्मिते
लसद्वितानभूषिते सलीलविभ्रमालसम् ।
सुराङ्गनाभवल्लवीकरप्रपञ्चचामर-
स्फुरत्समीरवीजितं सदाऽच्युतं भजामि तम् ॥

प्र०—प्रमाणिकेति । पूर्वं 'प्रमाणिका जरौ लगौ' इति प्रमाणिकालक्षणमुक्तम्, तस्याः पादद्वयेन यस्यैकः पादो भवेत्, तत् पञ्चचामरं नाम छन्दो वदन्ति, पण्डिता इति शेषः । द्वाभ्यां द्वाभ्यां यतिः यथेष्टं वेति सम्प्रदायः ।

सुरद्रुमूलेति । विचित्रैर्विविधैः रत्नैर्मणिमौक्तिकादिभिर्निर्मिते विरचिते भूषिते च, लसता शोभमानेन वितानेन उल्लोचेन अलङ्कृते, सुरद्रोः कल्पवृक्षस्य मूलेऽधोभागे यो मण्डपस्तस्मिन्, लीलया सह वर्तमानः सलील सखेलो यो विभ्रमो विलासस्तेन अलसं श्रान्तं, सुराङ्गनाभानाम् अप्सरःसदृशीनां वल्लवीनां गोपीनां करेषु प्रपञ्चा विस्तृता ये चामराः चमरिकास्तेभ्यः स्फुरता सञ्चलता समीरेण वायुना वीजितं सेवितं, तं वेदैकवेद्यम्, अच्युतं कृष्णावतारं हरिं, सदा भजामि सेवे, तं स्मरामीत्यर्थः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रु०—जिसका एक पाद 'प्रमाणिका' नामक छन्द के दो पादों से मिलाकर बना हो, उसे 'पञ्चचामर' नामक वृत्त कहते हैं।

नानाविध रत्नों से निर्मित, चन्दोवा से सुशोभित, कल्पवृक्ष के मूलस्थित मण्डप में वर्तमान तथा विहार के कारण थके हुए अत एव अप्सरातुल्य गोपियों के करों में स्थित विशाल चामरों की वायु से सेवित कृष्णावतार हरि का सदा ध्यान करता हूँ ॥ ४ ॥

म भ न म न ग

S S S S I I I I I S S S S I I I S

म्भौ नो म्नौ गो मदनललिता वेदैः षड्ऋतुभिः ॥ ५ ॥

विभ्रष्टस्रग्गलितचिकुरा धौताधरपुटा
ग्लायत्पत्रावलिकुचतटोच्छ्वासोर्मितरला।
राधाऽत्यर्थं मदनललिताऽऽन्दोलालसवपुः
कंसाराते रतिरसमहो! चक्रेऽतिचटुलम् ॥

प्र०—म्भाविति। यत्र मगणभगणौ, नगणः, मगणनगणौ एकः गुरुश्च स्यात्, वेदैः चतुर्भिः षड्ऋतुभिः षड्भिः षड्भिश्चाक्षरैः यतिश्च स्यात्, सा मदनललिता नाम भवति।

विभ्रष्टेति। विभ्रष्टा अधःपतिता स्रक् माला यस्याः सा, गलिताः विश्लथिताः चिकुराः केशा यस्याः सा, धौतं चुम्बनवशान्निर्मृष्टरागमित्यर्थः, अधरपुटं यस्याः सा, ग्लायन्ती मलिना प्रोञ्छितेत्यर्थः, पत्रावलिः पत्ररचनं यत्र तादृशं कुचतटं यस्याः सा, उच्छ्वासा दीर्घश्वासा ऊर्मयः तरङ्गा इव तैस्तरला चञ्चला, सुरतश्रमवशाद्दीर्घश्वासं मुञ्चन्तीत्यर्थः, मदनललितेन कामविलासेन यः आन्दोलश्चाञ्चल्यं तेन अलसं मन्थरं वपुः शरीरं यस्याः सा एतादृशी सुरतखिन्ना राधा, कंसारातेः कृष्णस्य, अतिचटुलं समययापनाक्षममिति भावः, रतिरसं रत्यनुरागं चक्रे, अहो इत्यद्भुतम्। सुरतमृदितां राधां दृष्ट्वा पुना रिरंसुरभवद् गोविन्द इति भावः।

रु०—जिसमें मगण, भगण, नगण, मगण, नगण और गुरु हों तथा चार और छः छः अक्षरों पर यति हो, उसे 'मदनललिता' नामक वृत्त कहते हैं।

यद्यपि प्रथम सुरत के कारण राधा की माला गिर गई थी, उसके बाल बिखर गये थे, अधरपुट का राग चुम्बनवश साफ हो चुका था, उसके कुचतटों पर बनी हुई पत्रावली पुछ गई थी, लहर-तुल्य लम्बी-लम्बी साँसों से वह चञ्चल हो रही थी और

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उसका शरीर कामक्रीडासे अलसा रहा था, तो भी उसे देखकर गोविन्द फिर रिरंसु हो गये, यह आश्चर्य है ॥ ५ ॥

न ज भ ज र ग

। । । । ऽ । ऽ । । । ऽ । ऽ । ऽ ऽ

नजभजरैर्यदा भवति वाणिनी गयुक्तैः ॥ ६ ॥

स्फुरतु ममाननेऽद्य ननु वाणि ! नीतिरम्यं
तव चरणप्रसादपरिपाकतः कवित्वम् ।
भवजलराशिपारकरणक्षमं मुकुन्दं
सततमहं स्तवैः स्वरचितैः स्तवानि नित्यम् ॥

प्र०—यदा नगणजगणभगणजगणरगणैः, अन्ते एकेन गुरुणोपेतैः सहिता भवन्ति, तदा वाणिनी नाम सा । पादे यतिः ।

स्फुरत्विति । हे वाणि ! सरस्वति ! तव चरणयोः प्रसादस्य सेवनस्य परिपाकतः परिणामात्, नीतिरम्यं नीत्यर्थसम्बद्धतया मनोहरं, कवित्वं मम आनने मुखे स्फुरतु आविर्भवतु, येन अहं स्वरचितैः निजनिर्मितैः, स्तवैः, स्तोत्रैः, भवः संसार एव जलराशिः समुद्रः तस्य पारकरणे उत्तारणे क्षमं समर्थं, मुकुन्दं नित्यं सर्वदा, स्तवानि । यद्वा नित्यं सनातनमिति श्रीकृष्णस्य विशेषणम् ।

रु०—जिसमें क्रमशः नगण, जगण, भगण, जगण, रगण और अन्त में एक गुरु हो, उसे 'वाणिनी' नामक वृत्त कहते हैं ।

हे सरस्वति ! तुम्हारी चरणसेवा के परिणाम-स्वरूप नीतिमनोहर कवित्व मेरे मुख में प्रकट हो, जिससे मैं संसार-रूपी समुद्र से पार करने में समर्थ श्रीकृष्ण की सदा स्तुति करूँ ॥ ६ ॥

य म न स र ग

। ऽ ऽ ऽ ऽ ऽ । । । । । ऽ ऽ । ऽ ऽ

यमौ नस्रौ गश्च प्रवरललितं नाम वृत्तम् ॥ ७ ॥

भुजोत्क्षेपः शून्ये चलवलयझङ्कारयुक्तो
मुधा पादन्यासः प्रकटिततुलाकोटिनादः ।
स्मितं वक्त्रेऽकस्माद् दृशि पटुकटाक्षोर्मिलीला
हरौ जीयादीदृक् प्रवरललितं वल्लवीनाम् ॥

प्र०—यमाविति । यत्र यगणमगणौ, नगणः, सगणरगणौ, एकः गुरुश्च क्रमेण स्यात्, तत् प्रवरललितं नाम वृत्तमुच्यते ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भुजोत्क्षेप इति । शून्ये गगने, चलानां चञ्चलानां वलयानां कङ्कणानां झङ्कारेण झमितिशब्देन युक्तः, भुजयोर्बाह्वोः उत्क्षेपः प्रसारणम्, हरेः कण्ठाश्लेषार्थमिति भावः, प्रकटितः प्रकाशितः, तुलाकोटीनां नूपुराणां नादः ध्वनिर्येन तादृशः, मुधा व्यर्थं, पादन्यासः चरणक्षेपः, अकस्मात् अविचिन्तितं हेतुमन्तरेण, वक्त्रे मुखे, स्मितमीषद्धास्यं, दृशि नयने पटुः स्वाभिप्रायप्रकाशनक्षमः यः कटाक्षः तिर्यगवलोकनं तस्य ऊर्मिः परम्परा सैव लीला विलासः, हरौ कृष्णविषये, वल्लवीनां व्रजयुवतीनाम्, ईदृग् एवम्भूतं, प्रवरललितं प्रकृष्टो हावः, जीयात् सर्वोत्कर्षेण वर्तताम् ।

हि०—जिसमें यगण, मगण, नगण, सगण और रगण तथा एक गुरु क्रमशः हों वह 'प्रवरललित' नामक छन्द कहलाता है ।

आकाश में हिलते हुए वलयों के झङ्कार से युक्त बाहुओं का फैलाना, नूपुरों की ध्वनि प्रकट करनेवाला व्यर्थ चरणक्षेप, मुख में ईषद्धास्य और नेत्रों में चतुरतापूर्ण कटाक्षपरम्परा का विलास—इस प्रकार का हरि के प्रति गोपाङ्गनाओं का हाव-भाव विजय को प्राप्त हो ॥ ७ ॥

ल

। । । । । । । । । । । । । । । ।

द्विगुणितवसुलघुभिरचलधृतिरिह ॥ ८ ॥

तरणिदुहितृतटरुचिरतरवसति—
रमरमुनिमुखजनविहितनुतिरिह ।
मुररिपुरभिनवजलधररुचितनु—
रचलधृतिरवयति सुकृतिहृदि खलु ॥

प्र०—द्विगुणेति । द्विगुणितैर्द्विरावृत्तैः वसुभिः अष्टभिः षोडशभिरित्यर्थः, लघुभिः लघुवर्णैः, इह छन्दोग्रन्थे, अचलधृतिर्नाम छन्दो भवति ।

तरणीति । इह अस्मिन् संसारे, तरणेः सूर्यस्य दुहितुः कन्याया यमुनायाः तटे तीरप्रदेशे रुचिरतरा अतिमनोहरा वसतिः निवासो यस्य सः, अमरमुनिषु देवर्षिषु मुखजनैः प्रमुखैर्नारदादिभिः विहिता कृता नुतिः स्तुतिर्यस्य तथोक्तः, अभिनवो नूतनो वर्षुक इत्यर्थः, यो जलधरो मेघस्तस्य रुचिः कान्तिरिव कान्तिर्यस्याः तादृशी तनुः शरीरं यस्य तथोक्तः, जलदनील इति यावत्, अचला स्थिरा अनपायिनी धृतिः धैर्यं यस्य सः, अचलवत् पर्वत इव धृतिर्यस्येति वा, एतादृशः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मुररिपुः श्रीकृष्णः सुकृतिनां पुण्यात्मनां हृदि हृदये, उदयति प्रकाशते खलु इति निश्चये ।

हि०—सोलह लघु अक्षरों से निर्मित छन्द इस शास्त्र में 'अचलधृति' नामक कहलाता है ।

सूर्यपुत्री यमुना के तट पर जिनका मनोरम भवन है, नारदादि-प्रमुख देवर्षि जिनकी स्तुति करते हैं, नवीन मेघ के समान जिनकी शरीर-कान्ति उल्लसित होती है और जिनका धैर्य स्थिर है, वे श्रीकृष्ण भगवान् पुण्यात्माओंके हृदय में प्रकाशित होते हैं ॥ ८ ॥

न ज भ ज त ग

। । । । ऽ । ऽ । । । ऽ । ऽ ऽ । ऽ

गरुडरुतं नजौ भजतगा यदा स्युस्तदा ॥ ९ ॥

अमरमयूरमानसमुदे पयोदध्वनि-
गरुडरुतं सुरारिभुजगेन्द्रसन्त्रासने ।
धरणिभरावतारविधिडिण्डिमाडम्बरः
स जयति कंसरङ्गभुवि सिंहनादो हरेः ॥

प्र०—गरुडेति । यदा नगणजगणौ, भगणजगणतगणः अनन्तरमेको गुरुश्च स्यात् , तदा गरुडरुतं नामकं छन्दः ।

अमरमयूरेति । अमरा देवा एव मयूराः केकिनस्तेषां मानसस्य मुदे हर्षाय, पयोदानां मेघानां ध्वनिः, समाकर्ण्य देवा मेघध्वनिमाकर्ण्य मयूरा इव जहृषु-रित्यर्थः, सुराणां देवानामरयः शत्रव एव भुजगेन्द्राः सर्पाः तेषां सन्त्रासने भीषणे, गरुडरुतं पक्षिराजगरुडस्य ध्वनिः, धरणेः पृथिव्याः भरावतारविधौ भारापहारकार्ये डिण्डिमस्य वाद्यविशेषस्य आडम्बरः ध्वनिः, हरेः कृष्णस्य, कंसरङ्गभुवि कंसरणक्षेत्रे सः प्रसिद्धः सिंहनादः जयति सर्वोत्कर्षेण वर्तते ।

हि०—जिसमें नगण, जगण, भगण, जगण, तगण और एक गुरु क्रमशः हों, उसे 'गरुडरुत' नामक छन्द कहते हैं ।

देवता-रूपी मयूरों की प्रसन्नता के लिए मेघगर्जन, देवशत्रु-दैत्य-रूपी सर्पों को भयभीत करने के लिए गरुड की ध्वनि और पृथ्वी का भार हलका करने की सूचना देनेवाला डिण्डिमघोष, श्रीकृष्ण का सिंहनाद कंस की रणभूमि में विजय को प्राप्त होता है ॥ ९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अत्र वृत्तरत्नकरे तत्परिशिष्टे च इमानि छन्दांस्यधिकानि दृश्यन्ते—

भ र न र न ग

SIISISIIISISIIIS

सङ्कुथिता भरौ नरनगाश्च धीरललिता ॥ १ ॥

भ भ भ भ भ ग

SIISIISIISIISIIS

पञ्चभकारयुताऽश्वगतिर्यदि चान्त्यगुरुः ॥ २ ॥

न ज र भ भ ग

IIIISISISSIISIIS

नजरभभेण गेन च स्यान्मणिकल्पलता ॥ ३ ॥

ग

SSSSSSSSSSSSSSSS

यस्मिन् सर्वे गा राजन्ते ब्रह्माद्यं तद्रूपं नाम ॥ ४ ॥

भ र य न न ग

SIISISIISIIIIIIS

भो रयना नगौ च यस्यां वरयुवतिरियम् ॥ ५ ॥

प्र०—सङ्कुथितेति । यत्र भगणरगणौ, नगणरगणनगणा गुरुश्चैकः स्यात्, सा धीरकलिता नाम ॥ १ ॥

पञ्चेति । पञ्चभिर्भगणैर्युता अश्वगतिः स्यात्, यदि च अस्या अन्ते एको गुरुः स्यात् ॥ २ ॥

नजेति । नगणजगणरगणैर्भगणद्वयेन गुरुणा चैकेन युक्ता मणिकल्पलता नाम भवति ॥ ३ ॥

यस्मिन्निति । यस्मिन् छन्दसि सर्वे वर्णा गुरवः शोभन्ते, तच्छन्दो ब्रह्मरूपं नाम ॥ ४ ॥

भ इति । यस्यां भगणः, रगणयगणौ, नगणद्वयं गुरुश्चैकः स्यात्, सा वरयुवतिर्नाम ॥ ५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हि०—जिसमें भगण, रगण, नगण, रगण, नगण और एक गुरु हो, उसे 'धीर-ललिता' नामक छन्द कहते हैं ॥ १ ॥

जिससे पाँच भगण और अन्तमें एक एक गुरु हो, 'अश्वगति' नामक छन्द कहा जाता है ॥ २ ॥

जिस वृत्त में नगण, जगण, दो भगण तथा एक गुरु हो, उस वृत्त का नाम 'मणिकल्पलता' है ॥ ३ ॥

जिसमें सब (सोलहो) वर्ण गुरु हों, वह 'ब्रह्मरूप' नामक छन्द कहा जाता है ॥ ४ ॥

जिस छन्द में भगण, रगण, यगण, दो नगण और अन्त में एक गुरु हो, वह छन्द 'वरयुवति' नामक होता है ॥ ५ ॥

(१७) अत्यष्टिः (सप्तदशाक्षरा वृत्तिः) ।

य म न स भ ल ग

ISS SSS III IIS SII I S

रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी ॥ १ ॥

करादस्य भ्रष्टे ननु शिखरिणीदृश्यतिशिशो—
विलीनाः स्मः सत्यं नियतमवधेयं तदखिलैः ।
इति त्रस्यद्गोपाऽनुचितनिभृतालापजनितं
स्मितं बिभ्रद्देवो जगदवतु गोवर्धनधरः ॥

प्र०—रसैरिति । यगणमगणनगणसगणभगणाः, एको लघुः गुरुश्चान्ते यस्याः सा शिखरिणी इत्युच्यते । रसैः षड्भिः रुद्रैः एकादशभिः, छिन्ना यतिमती ।

करादस्येति । ननु भोः ईदृशि एवंविधे अतिमहति, शिखरिणि गोवर्धनाख्ये पर्वते, अतिशिशोः अतिबालस्य, अस्य श्रीकृष्णस्य, करात् हस्तात्, भ्रष्टे च्युते सति, पर्वताधःस्थिता वयं सर्वे सत्यमवश्यमेव, विलीनाः स्मः क्षयं यास्यामः, तत् तस्मात्, अखिलैः सर्वैरस्माभिः, नियतं ध्रुवम्, अवधेयं ध्यानं देयम्, इति, एवम्प्रकारेण, त्रस्यतां भीतानां गोपानाम् अनुचितेन अयुक्तेन बालस्यापि भगवतः पर्वतधारणसामर्थ्यसद्भावाद् निभृतेन मन्दं मन्दं कथ्यमानेन आलापेन संभाषणेन जनितं समुत्पन्नं, स्मितम् ईषद्धास्यं, बिभ्रत् दधत्, गोवर्धनधरः देवः श्रीकृष्णः, जगद् ब्रह्माण्डम्, अवतु रक्षतु ।

हि०—जिसमें यगण, मगण, नगण, सगण, भगण तथा अन्त में क्रमशः एक लघु और एक गुरु हो, उसको 'शिखरिणी' कहते हैं ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

'इतने बड़े पहाड़ के इस बालक के हाथ से छूट जाने पर हम निश्चय ही मर मिटेंगे-इसलिए सबको इस पर ध्यान देना चाहिए' इस प्रकार भयभीत गोपों का अनुचित मन्द-मन्द वार्तालाप सुन कर मुस्कराते हुए गोवर्धनधारी श्रीकृष्ण भगवान् संसार की रक्षा करें ॥ १ ॥

ज स ज स य ल ग

।ऽ। ।।ऽ ।ऽ। ।।ऽ ।ऽऽ ।ऽ

जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ॥ २ ॥

दुरन्तदनुजेश्वरप्रकरदुःस्थपृथ्वीभरं
जहार निजलीलया यदुकुलेऽवतीर्याशु यः ।
स एष जगतां गतिर्दुरितभारमस्मादृशां
हरिष्यति हरिः स्तुतिस्मरणचाटुभिस्तोषितः ॥

प्र०—जसाविति । जगणसगणौ, जगणसगणयगणलघवः एको गुरुश्च यत्र सन्ति, सा पृथ्वी नाम । वसुग्रहयतिः, वसुभिः अष्टभिः ग्रहैर्नवभिश्च यतिर्यत्र सेत्यर्थः ।

दुरन्तेति । यः हरिः, यदुवंशे, अवतीर्य जन्म गृहीत्वा, निजलीलया अनायासेनेत्यर्थः, दुरन्तानां दुर्जयानां दनुजेश्वराणां कंसादीनां प्रकरेण समूहेन दुःस्थ सोढुमशक्यः यः पृथ्वीभरः पृथिव्या भारस्तम् , आशु झटिति, जहार दूरीचक्रे, जगतां गतिर्लोकाधारः, स लोकवेदप्रसिद्धः, एषः अस्मद्धृदयस्थः हरिः स्तुत्या गुणकीर्तनेन स्मरणेन ध्यानेन चाटुभिः प्रियवचनैः तोषितः प्रसादितः सन् अस्मादृशाम् अस्मद्विधानां पापिनां, दुरितभारं पापपुञ्जं हरिष्यति धक्ष्यतीत्यर्थः ।

रु०—जिसमें जगण, सगण, जगण, सगण, यगण, लघु और अन्त में गुरु हो और आठ तथा नौ अक्षरों पर यति हो, उसे 'पृथ्वी' नामक छन्द कहते हैं ।

जिन्होंने यदुकुल में जन्म लेकर दुर्जय दानव-वृन्द का असह्य पृथ्वीभार अनायास नष्ट कर दिया, संसार के आश्रय वे हरि, स्तुति ध्यान और प्रियवचनों द्वारा प्रसन्न किये जाने पर हमारे पापों को भी विनष्ट कर देंगे ॥ २ ॥

भ र न भ न ल ग

ऽ।। ऽ।ऽ ।।। ऽ।। ।।। ।ऽ

दिङ्मुनि वंशपत्रपतितं भरनभनलगैः ॥ ३ ॥

(क) नूतनवंशपत्रपतितं रजनिजललवं
पश्य मुकुन्द ! मौक्तिकमिवोत्तममरकतगम् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एष च तं चकोरनिकरः प्रतिबति मुदितो
वान्तमवेत्य चन्द्रकिरणैरमृतकणमिव ॥
(ख) सम्प्रति लब्धजन्म शनकैः कथमपि लघुनि
क्षीणपयस्युपेयुषि भिदां जलधरपटले ।
खण्डितविग्रहं बलभिदो धनुरिह विविधाः
पूरयितुं भवन्ति विभवः शिखरमणिरुचः ॥

इति भारविः ।

प्र०—दिङ्मुनीति । भगणरगणनगणभगणनगणलघुगुरुभिः वंशपत्रपतितं नाम छन्दः । यत्र च दिग्भिः दशभिः मुनिभिः सप्तभिश्च यतिर्भवति । दिशश्च मुनयश्चैषां समाहारः दिङ्मुनि । अस्यैव 'वंशपत्रपतिता' इति नामान्तरम् ।

(क) नूतनेति । हे मुकुन्द ! कृष्ण ! नूतनं नवीनं हरितमित्यर्थः, यद् वंशपत्रं वेणुकिसलयं तत्र पतितं, रजनिजललवम् अवश्यायबिन्दुमित्यर्थः, उत्तममरकतगम् उत्कृष्टमरकतमणिनिर्मितपात्रस्थितं मौक्तिकमिव पश्य । एष च चकोरनिकरः चकोरसमूहः, चन्द्रकिरणैः शशिरश्मिभिः, वान्तं प्रस्यन्दितम्, अमृतकणं सुधाबिन्दुम्, अवेत्य ज्ञात्वेव, मुदितः सन् प्रपिबति सम्यक् पिबति ।

(ख) किरातार्जुनीयपद्यं दर्शयति—सम्प्रतीति । सम्प्रति इदानीं शरत्काले इह अस्मिन्नद्रौ, विविधाः नानावर्णाः, शिखरमणिरुचः शृङ्गस्थितरत्नकान्तयः, क्षीणपयसि जलहीने, अत एव लघुनि अगुरुणि, एवं भिदां भेदम्, उपेयुषि प्राप्तवति, भिदेति अङन्तः स्त्रीलिङ्गः, जलधरपटले मेघमण्डले, कथमपि शनकैः शनैः, लब्धजन्म उत्पन्नमित्यर्थः, खण्डितविग्रहं छिन्नस्वरूपं, बलभिदः इन्द्रस्य, धनुः पूरयितुं विभवः समर्था भवन्ति ।

रु०—जिसमें क्रमशः भगण, रगण, नगण, भगण, नगण और लघु गुरु हों, उसको 'वंशपत्रपतित' कहते हैं ।

(क) हे मुकुन्द कृष्ण ! देखो, यह बांस के नवीन पत्ते पर पड़ी हुई ओस की बूंदें कैसी शोभित हो रही हैं । यह ऐसी प्रतीत होती हैं मानों मरकतमणि-निर्मित पात्र में मोती रक्खे हों । और देखो, यह चकोर इसे चन्द्रकिरणों से अभिवृष्ट अमृतकण सा समझ कर, प्रसन्न हो पी रहा है ।

(ख) इस समय शरत्काल में पर्वत पर अनेक वर्ण की शिखरस्थित मणियों की कान्तियाँ, जल हीन अत एव हलके और छिन्न-भिन्न मेघमण्डल में कठिनता से उत्पन्न इन्द्र-धनुष को पूर्ण करने में समर्थ हैं ॥ ३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

म भ न त त गग

S S S S | | | | | S S | S S | S S

मन्दाक्रान्ताऽम्बुधिरसनगैर्मो भनौ तौ गयुग्मम् ॥ ४ ॥

प्रेमालापैः प्रियवितरणैः प्रीणितालिङ्गनाद्यै-
मन्दाक्रान्ता तदनु नियतं वश्यतामेति बाला।
एवं शिक्षावचनसुधया राधिकायाः सखीनां
प्रीतः पायात् स्मितसुवदनो देवकीनन्दनो नः ॥

प्र०—मन्देति। यत्र मगणः, भगणनगणौ, द्वौ तगणौ गुरुद्वयं च स्यात्, सा मन्दाक्रान्ता नाम। अत्र चतुर्भिः षड्भिः सप्तभिश्च यतिः स्यात्।

प्रेमालापैरिति। प्रेमालापैः प्रीतिसम्भाषणैः, प्रियवितरणैः प्रियवस्तुप्रदानैः आलिङ्गनाद्यैश्च प्रीणिता सन्तोषिता, तदनु ततः परं, मन्दं शनैः आक्रान्ता रन्तुं प्रेरिता बाला, नियतमवश्यं, वश्यतामेति वशं गच्छति, रत्युनुकूलं भवतीत्यर्थः। एवम् इत्थं राधिकायाः सखीनां शिक्षावचनसुधया उपदेशामृतेन, प्रीतः प्रसन्नः, अत एव स्मितेन सुवदनः शोभनाननः, देवकीनन्दनः कृष्णः, नः पायात्।

रु०—यदि मगण भगण, नगण, दो तगण और अन्त में दो गुरु हों, तो उसे 'मन्दाक्रान्ता' वृत्त कहते हैं। इसमें चार, छः और सात वर्णों पर यति होती है।

'प्रेमपूर्वक वार्तालाप, प्रियवस्तुओं के देने और आलिङ्गनादि से सन्तोषित अनन्तर धीरे-धीरे आक्रान्त बाला निश्चय ही वश में हो जाती है' राधिका' की सखियों के इस प्रकार के उपदेश-वचनों से प्रसन्न मुस्कुराते हुए देवकीनन्दन कृष्ण हमारी रक्षा करें ॥ ४ ॥

न स म र स लग

| | | | | S S S S S | S | | S | S

नसमरसला गः षड्वेदैर्हयैर्हरिणी मता ॥ ५ ॥

व्यथित स विधिर्नेत्रं नीत्वा ध्रुवं हरिणीगणाद्
व्रजमृगदृशां सन्दोहस्योल्लसच्चयनश्रियम्।
यदयमनिशं दूर्वाश्यामे मुरारिकलेवरे
व्यकिरदधिकं वल्गाकाङ्क्षे विलोलविलोचनम् ॥

प्र०—नसेति। यत्र नगणसगणमगणरगणसगणाः, एको लघुः ततः परम् एको गुरुश्च स्यात्, सा हरिणी नाम भवति। अत्र षड्भिश्चतुर्भिः सप्तभिश्चाक्षरैर्यतिर्वेदितव्या।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

व्यधितेति । स निर्माणपटुः, विधिर्वेधाः, हरिणीगणाद् मृगीसमूहात् , नेत्रं नयनं, नीत्वा आदायेत्यर्थः, व्रजमृगदृशां व्रजाङ्गनानां, सन्देहस्य समूहस्य, उल्लसन्तीं शोभमानां, नयनश्रियं नेत्रकान्तिं, व्यधित निर्मितवान् ; इति ध्रुवं निश्चितम् । यद् यतो हेतोः; अयं व्रजमृगदृशां सन्दोहः व्रजयुवतिगणः; दूर्वाश्यामे दूर्वावत् श्यामवर्णे, बद्धा जाता आकाङ्क्षा द्रष्टुमभिलाषो यस्मिन् तादृशे, मुरारिकलेवरे श्रीकृष्णशरीरे, विलोलं चञ्चलं सतृष्णमिति यावत् , विलोचनं नेत्रम् , अनिशं सदा, अधिकं सातिशयं यथा, तथा, व्यकिरत् चिक्षेप । यथा हरिण्यो दूर्वां सतृष्णं पश्यन्ति तथैव व्रजयुवतयः कृष्णं सस्पृहं पश्यन्तीति भावः ।

ह०—जिसमें नगण, सगण, मगण, रगण सगण, लघु और गुरु क्रमशः हों, उसे 'हरिणी' छन्द कहते हैं। इसमें छः चार और सात वर्णों पर यति होती है। निर्माणपटु ब्रह्मा ने हरिणीवृन्द से नेत्रशोभा लेकर व्रजयुवतियों की नेत्रशोभा बनाई है, इसमें किञ्चित् भी सन्देह नहीं है, तभी तो ये व्रजयुवतियाँ दूर्वाश्यामल, स्पृहणीय कृष्ण के शरीर पर सदा तृष्णापूर्वक दृष्टिपात करती रहती हैं ॥ ५ ॥

न ज भ ज ज ल ग

। । । । ऽ । ऽ । । । ऽ । । ऽ । । ऽ

यदि भवतो नजौ भजजला गुरु नर्दटकम् ॥ ६ ॥

व्रजवनितावसन्तलतिकाविलसन्मधुपं
मधुमथनं प्रणम्रजनवाञ्छितकल्पतरुम् ।
विभुमभिनौति कोऽपि सुकृती मुदितेन हृदा
रुचिरपदावलीघटितनर्दटकेन कविः ॥

प्र०—यदीति । यदि प्रथमं नगणजगणौ स्तः, ततः भगणजगणजगणलघवः स्युः, एकश्चान्ते गुरुवर्णः स्यात् , तदा नर्दटकं नाम छन्दः । सप्तभिर्दशभिश्च यतिरिति सम्प्रदायः ।

व्रजवनितेति । व्रजवनिता व्रजाङ्गना एव वसन्तलतिका वसन्तकालिकवल्लर्यः तासु विलसन्तं विहरन्तं मधुपं भृङ्गस्वरूपम् , प्रणम्रजनानां भक्तानां वाञ्छितस्य अभिलषितस्य वस्तुनः प्रदान इति शेषः । कल्पतरुं कल्पवृक्षं, भक्तजनकामनाप्रदमित्यर्थः, विभुं जगदीशं, मधुमथनं मधुहन्तारं कृष्णं, कोऽपि सुकृती पुण्यशीलः कविः, मुदितेन, प्रसन्नेन, हृदा अन्तःकरणेन, रुचिराभिर्मनोहराभिः पदावलीभिः पदनिचयैः घटितेन विरचितेन नर्दटकेन नर्दटकनामच्छन्दसा, अभिनौति स्तौति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रु०—यदि नगण, जगण, भगण, जगण, जगण और लघु तथा गुरु क्रमशः हों, तो 'नर्दटक' नामक छन्द कहाता है।

व्रजाङ्गनारूपी वसन्तलताओं पर विहार करते हुए भ्रमरस्वरूप भक्तजनों की कामना पूर्ण करनेवाले मधुहन्ता जगदीश श्रीकृष्ण की स्तुति कोई पुण्यात्मा कवि प्रसन्न मन से मनोहर-पदावलि-निर्मित नर्दटक छन्द द्वारा करता है ॥ ६ ॥

हयऋतुसागरैर्यतियुतं यदि कोकिलकम् ॥ ७ ॥

लसदरुणेक्षणं मधुरभाषणमोदकरं
मधुसमयागमे सरसकेलिभिरुल्लसितम् ।
अलिललितद्युति रविसुतावनकोकिलकं
ननु कलयामि तं सखि ! सदा हृदि नन्दसुतम् ॥

प्र०—हयेति । यदि उक्तं छन्दः, हयऋतुसागरैः सप्तभिः षड्भिः चतुर्भिश्च वर्णैः, यतियुतं यतिमत् स्यात् , तदा कोकिलकं नाम छन्दो भवति ।

लसदिति । ननु सखि हे सखि ! नन्विति सम्बोधने, लसती शोभमाने अरुणे रक्तवर्णे ईक्षणे नयने यस्य स तम् , मधुरेण हृद्येन भाषणेन आलापेन मोदकरम् आनन्दजनकम् , मधुसमयागमे वसन्तप्रारम्भे, सहसाभिर्मनोहराभिः केलिभिः क्रीडाभिः, उल्लसितम् आनन्दितम् अलेरिव भ्रमरस्येव ललिता मनोहारिणी द्युतिः कान्तिर्यस्य स तथोक्तम् , भ्रमरनीलमित्यर्थः, रविसुतावने यमुनातटवर्तिनि वने कोकिलकं कोकिलस्वरूपं कोकिलवत् पञ्चमस्वरेण कूजन्तमित्यर्थः, तं नन्दसुतं श्रीकृष्णं, सदा हृदि कलयामि चिन्तयामि ।

रु०—यदि "नर्दटक' छन्द में सात, छः और चार पर यति की जावे, तो उसे 'कोकिलक' छन्द कहते हैं।

हे सखि ! सुन्दर लाल नेत्रों वाले अपने मधुरभाषण से आनन्ददायक वसन्त ऋतु के प्रारम्भ में मनोहर क्रीडाओं से आनन्दित, भ्रमरके समान नीलवर्ण यमुना-वन के कोकिल उन श्रीकृष्ण का सदा हृदय में चिन्तन करती हूँ ॥ ७ ॥

म भ न म य ल ग

SSS SII III SSS ISS I S

वेदर्त्वश्वैर्मभनमयला गश्चेत्तदा हारिणी ॥ ८ ॥

यस्या नित्यं श्रुतिकुवलये क्रीडालिनी लोचने
रागः स्वीयोऽधरकिसलये_लाक्षारसारञ्जनम् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गौरी कान्तिः प्रकृतिरुचिरा रम्याङ्गरागच्छटा
सा कंसारेरजनि न कथं राधा मनोहारिणी ॥

प्र०—वेदेति । यदा मगणभगणनगणमगणयगणलघवः एको गुरुश्च स्यात्, तदा हारिणी नाम वृत्तं स्यात्। अत्र वेदैः चतुर्भिः, ऋतुभिः षड्भिः, अश्वैः सप्तभिश्च वर्णैर्यतिः स्यात्।

यस्या इति। यस्या राधायाः, श्रिया शोभया शालते इति श्रीशालिनी मनोरमे लोचने एव श्रुतिकुवलये कर्णोत्पलस्वरूपे, अधरकिसलये अधरपल्लवे, स्वीयः स्वाभाविकः, रागः रक्तिमा एव, लाक्षारसेन लाक्षाद्रवमयविलेपनद्रव्येण आरञ्जनम्, गौरी गौरवर्णा, प्रकृतिरुचिरा स्वभावरमणीया, कान्तिः शरीरद्युतिरेव रम्या मनोहरा, अङ्गरागच्छटा कुङ्कुमादिविलेपनजनिता द्युतिः, एवम्भूता राधा, कंसारेः कृष्णस्य, मनोहारिणी मनोमोहिनी, कथं न अजनि जाता? मनोहारिणी जातैवेति भावः।

रु०—जिसमें मगण, भगण, नगण, मगण, यगण, लघु और गुरु क्रमशः हों और चार, छः तथा सात पर यति हो, उसे 'हारिणी' छन्द कहते हैं।

जिस राधा के मनोहर नेत्र ही कर्णोत्पल हैं, अधर-पल्लव पर स्वाभाविक रक्तिमा ही लाक्षारस का लेप है, स्वभाव-मनोहर गौरवर्ण शरीरकान्ति ही अङ्गराग की कान्ति है, ऐसी राधा श्रीकृष्ण के मन क्यों न हरती? ॥ ८ ॥

म	भ	न	र	स	ल	ग
ऽ ऽ ऽ	ऽ । ।	। । ।	ऽ । ऽ	। । ऽ	।	ऽ

भाराक्रान्ता मभनरसला गुरुः श्रुतिषड्हयैः ॥ ९ ॥

भाराक्रान्ता मम तनुरियं गिरीन्द्रविधारणात्
कम्पं धत्ते श्रमजलकणं तथा परिमुञ्चति।
इत्याविष्कुर्वति जलदस्वनाकुलवल्लवी—
संश्लेषोत्थं स्मरविलसितं विलोक्य गुरुं हरिः ॥

प्र०—भारेति। यत्र मगणभगणनगणरगणसगणलघवः एको गुरुश्च स्यात्, श्रुतिषड्हयैः श्रुतिभिश्चतुर्भिः, षड्भिः, हयैः सप्तभिश्च, यतिः स्यात्, सा भाराक्रान्ता नाम भवति।

भारेति। हरिः श्रीकृष्णः, गुरुं गुरुजनं विलोक्य, गिरीन्द्रस्य गोवर्धनस्य विधारणात्, भाराक्रान्ता भारपीडिता इयं मम तनुः शरीरं कम्पं वेपथुं धत्ते, कम्पत इत्यर्थः, तथा किञ्च श्रमजलकणं स्वेदबिन्दुं, परिमुञ्चति प्रकटयति, इति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एवम्प्रकारेण, जलदध्वनेन मेघध्वनिना आकुलानां भीतानां बल्लवीनां गोपीनां संश्लेषेण आलिङ्गनेन उत्थं समुत्पन्नं, स्मरविलसितं कामविकारम्, आवृण्वन् गोपयन्, जयति।

हिं०—जिसमें मगण, भगण, नगण, रगण, सगण, लघु और एक गुरु क्रमशः हों तथा चार, छः और सात पर यति हो, उसे 'भाराक्रान्ता' नामक वृत्त कहते हैं।

श्रीकृष्ण गुरुजनों को देखकर 'पर्वत के धारण करने के बोझ से दुखा हुआ मेरा यह शरीर कांप रहा है और पसीना छोड़ रहा है' इस प्रकार, मेघध्वनि से व्याकुल गोपियों के आलिङ्गन से उत्पन्न काम-विकार को छिपाते हुए विजय को प्राप्त होते हैं ॥ ९ ॥

अत्र वृत्तरत्नाकरपरिशिष्टे इमानि छन्दांस्याधिकानि दृश्यन्ते—

न न म र स ल ग

। । । । । । S S S S । S । । S । S

रसयुगहययुङ् नौ म्रौ स्रो लगौ हि यदा हरिः ॥ १ ॥

य भ न र स ल ग

। S S S । । । । । S । S । । S । S

भवेत्कान्ता युगरसहयैर्यभौ नरसा लगौ ॥ २ ॥

स स ज भ ज ग ग

। । S । । S । S । S । । । S । S S

ससजैरतिशायिनी मता भजपरैर्गुरुभ्याम् ॥ ३ ॥*

प्र०—रसेति। यदा नगणद्वयं, मगणो, रगणः, सगणो लघुर्गुरुश्च भवेयुः, रसैः षड्भिः, युगैश्चतुर्भिः, हयैः सप्तभिश्चाक्षरैर्विरामो भवेत् तदा हरिनामकं छन्दो जायते ॥ ३ ॥

भवेदिति। यत्र यगणभगणौ नगणरगणसगणा लघुर्गुरुश्च स्युः, तत् कान्तानामकं वृत्तं भवेत्। अत्र युगैश्चतुर्भिः, रसैः, षड्भिः, हयैः सप्तभिश्चाक्षरैर्विरामः ॥

ससजैरिति। सगणसगणजगणैः भगणजगणाभ्यां गुरुभ्यां च अतिशायिनी छन्दः सम्मतं भवति ॥ १ ॥

हिं०—दो नगण, मगण, रगण, सगण, एक लघु और गुरु हों तथा छः, चार और

* 'ससजा भजगा गु दिक्स्वरैर्भवति चित्रलेखा'-इत्यन्यत्र नामान्तरम्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सात अक्षरों पर विराम हो, तो 'हरि' नामक छन्द होता है ॥ १ ॥

जिसमें यगण, मगण, नगण, रगण, सगण, एक लघु और गुरु हों तथा चार, छः, सात अक्षरों पर विराम हो, वह 'कान्ता' नामक छन्द होता है ॥ १ ॥

जहाँ दो सगण, जगण, भगण, जगण और दो गुरु हों, वहां 'अतिशायिनी' नामक छन्द माना जाता है ॥ ३ ॥

(१८) धृतिः (अष्टादशाक्षरा वृत्तिः) ।

म त न य य य

S S S S S I I I I I S S I S S I S S

स्याद् भूतर्त्वश्वैः कुसुमितलतावेल्लिता म्तौ नयौ यौ ॥ १ ॥

(क) क्रीडत्कालिन्दीललितलहरीवारिभिर्दाक्षिणात्यै-
र्वातैः खेलद्भिः कुसुमितलतावेल्लिता मन्दमन्दम् ।
भृङ्गालीगीतैः किसलयकरोल्लासितैर्लास्यलक्ष्मीं
तन्वाना चेतो रभसतरलं चक्रपाणेश्चकार ॥

(ख) ग्राम्यावज्ञानूपं पिशितलवणं शुष्कशाकं नवान्नं
गौडं पिष्टान्नं दधि सकृशरं निर्जलं मद्यमम्लम् ।
धाना वल्लूरं समशनमथो गुर्वसात्म्यं विदाहि
स्वप्नं चाराग्नौ श्वयथुगदवान् वर्जयेदङ्गनाञ्च ॥

इति वैद्यके ।

प्र०—स्यादिति । मगणतगणौ, नगणयगणौ, पुनः द्वौ यगणौ, एते यदि स्युः, अथ भूतैः पञ्चभिः, ऋतुभिः षड्भिः अश्वैः सप्तभिश्च वर्णैः यतिः स्यात् , तर्हि सा कुसुमितलतावेल्लिता नाम ।

(क) क्रीडदिति । क्रीडन्ति उच्छलन्ति यानि कालिन्द्या यमुनायाः ललितलहरीणां मनोहरतरङ्गाणां वारीणि जलानि तैः सह, खेलद्भिः क्रीडद्भिः, तत्स्पर्शवद्भिरित्यर्थः, एतेन वातानां शैत्यं प्रकटीकृतम् , दाक्षिणात्यैः दक्षिणदिग्भवैः, एतेन वातानां मन्दत्वं सौगन्ध्यञ्च सूचितम् , एतादृशैर्वातैः मन्दं मन्दं वेल्लिता कम्पिता, भृङ्गालीनां भ्रमरसमूहानां गीतैर्गानैः किसलयानि पल्लवा एव कराः तेषाम् उल्लासितैः सञ्चालनैरभिनयविशेषैः, लास्यलक्ष्मीं नृत्यश्रियं, तन्वाना कुर्वाणा, कुसुमितलता पुष्पितवल्ली, चक्रपाणेः श्रीकृष्णस्य, चेतो मनः, रभसेन हर्षेण चपलं चकार 'रभसो वेगहर्षयोः' इति मेदिनी ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(ख) ग्राम्याब्जेति । श्वयथुःशोथश्चासौ गदो रोगस्तद्वान् तेनाक्रान्तो जनः, ग्राम्यं ग्रामे भवं छागादिमांसम् अब्जं जलभवं कच्छपादिमांसम् आनूपं जलप्रायदेशभवं शूकरादिमांसम्, एतादृशं पिशितं मांसं लवणञ्चेति पिशितलवणम्, शुष्कशाकम्, नवान्नम्, गौडं गुडविकारम्, पिष्टान्नं गोधूमादिचूर्णं, सकृशरं कृशरासहितं दधि कृशरया सह दधि न भक्षयेत्, केचित्तु कृशरां दधि च न भक्षयेदित्याहुः, निर्जलं जलहीनं मद्यम्, केचित् 'विज्जलम्' इति पठित्वा पिच्छिलद्रव्यं पूतिकादिशाकमित्यर्थमाहुः, अम्लं चिञ्चादि, धानाः अङ्कुरितभृष्टयवान्, वल्लूरं शुष्कमांसम्, अथ एवं गुरु अलघु दुष्पचम्, असात्म्यम् आत्मनः प्रकृतेः प्रतिकूलं विदाहि विशेषेण दाहोत्पादकं, समशनं, भोजनं, तथा अरात्रौ दिने, स्वप्नं निद्राम्, अङ्गनां स्त्रियञ्च वर्जयेत् ।

रु०—जिसमें मगण, तगण, नगण और तीन यगण हों तथा पाँच, छः और सात पर यति हो, उस छन्द को 'कुसुमितलतावेल्लिता' छन्द कहते हैं।

(क) यमुना की मनोहर तरङ्गों के चञ्चल जलों के साथ खेलते हुए दाक्षिणात्य पवनों द्वारा धीरे धीरे कम्पित फूली हुई लताने, भृङ्गों के गीतों तथा किसलयरूप हाथों के अभिनयों द्वारा नृत्य शोभा दर्शाते हुए, श्रीकृष्णका मन हर्षसे चञ्चल कर दिया।

(ख) शोथ (फूलना) का रोगी मनुष्य, गांव में पैदा हुये (बकरा वगैरह) का मांस, जल में पैदा हुये (कछुवा वगैरह) का मांस, पानी की जमीन में पैदा हुये (शूकर वगैरह) का मांस, नमक, सूखा साग, नया चावल, गुड़ का पदार्थ, पीसा हुआ अन्न, खिचड़ी दही, बिना जल का मद्य, खटाई, अंकुरित भुने हुये यव, सूखा मांस, भारी और अपनी प्रकृति के विपरीत तथा अधिक जलन पैदा करनेवाला भोजन, दिन में सोना और स्त्री—इन विषयों को छोड़ दे ॥ १ ॥

न ज भ ज र र

। । । । ऽ । ऽ । । । ऽ । ऽ । ऽ । ऽ ऽ । ऽ

नजभजरैस्तु रेफसहितैः शिवैर्हयैर्नन्दनम् ॥ २ ॥

(क) तरणिसुतातरङ्गपवनैः सलीलमान्दोलितं
मधुरिपुपादपङ्कजरजःसुपूतपृथ्वीतलम् ।
मुरहरचित्रचेष्टितकलाकलापसंस्मारकं
क्षितितलनन्दनं व्रज सखे ! सुखाय वृन्दावनम् ॥

(ख) अहत धनेश्वरस्य युधि यः समेतमायोधनं
तमहमितो विलोक्य विबुधैः कृतोत्तमायोधनम् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विभवमदेन निह्नुतह्रियाऽतिमात्रसम्पन्नकं
व्यथयति सत्पथादधिगताऽथवेह सम्पन्नकम् ? ॥

प्र०—नजेति। रेफसहितैः अन्ते रगणेन युक्तैः, नजभजरैः नगणजगण-भगणजगणरगणैः नन्दनं नाम वृत्तं भवेत्। अत्र शिवैः एकादशभिः, हयैः, सप्तभिश्च यतिः कर्तव्या।

(क) तरणिसुतेति। हे सखे! तरणिसुतायाः सूर्यपुत्र्या यमुनायाः, तरङ्गपवनैः लहरीवायुभिः, सलीलं सविलासं यथा तथा, आन्दोलितम् उपजीवितम्, मधुरिपोः कृष्णस्य, पादपङ्कजरजसा चरणकमलपरागेण, सुपूतं सम्यक् पवित्रीकृतं पृथ्वीतलं भूमिभागो यत्र तथोक्तम्, मुरहरस्य श्रीकृष्णस्य यानि चित्राणि लोकविस्मयकराणि चेष्टितानि गोवर्धनधारणादीनि कर्माणि कलाः नृत्यादिविद्याश्च तासां कलापस्य समूहस्य संस्मारकं स्मृतिजनकं, क्षितितलनन्दनं क्षितितले पृथिव्यां नन्दनं स्वर्णकाननमिव स्थितं वृन्दावनं, सुखाय स्वान्तःसुखाय, व्रज गच्छ।

(ख) अहृतेति। यः, रावणः युधि युद्धे, समेता अवलम्बिता माया कपटाचारो येन सः मायावीत्यर्थः, धनेश्वरस्य कुवेरस्य, धनम् अहृत हृतवान्, विबुधैः देवैः सह, कृतम् उत्तमं महद् आयोधनं युद्धं येन तम्, निह्नुता अपनीता ह्रीर्लज्जा येन लज्जानिवारकेणेत्यर्थः, विभवमदेन ऐश्वर्याहङ्कारेण, अतिमात्रम् अत्यन्तं सम्पन्नकं युक्तं, तं रावणं, विलोक्य अहम् इतः आगतः। अथवा इह जगति, अधिगता लब्धा सती, सम्पद् विभवः, कं जनं, सत्पथात सन्मार्गात्, न व्यथयति न प्रच्यावयति। अपि तु लब्धमैश्वर्यं सर्वमेव दुर्जनीकरोति।

द०—जिसमें नगण, जगण, भगण, जगण, रगण और उसके अनन्तर एक रगण हो, उसे 'नन्दन' नामक वृत्त कहते हैं। इसमें ग्यारह और सात अक्षरों पर यति होती है।

(क) हे मित्र! सुख भोगने के लिए यमुना की तरङ्ग से संसर्गी वायुओं से उपजीविता, कृष्ण के चरणकमल की धूलि से पवित्रित-भूभाग-युक्त, कृष्ण के अद्भुत कार्य तथा कलाओं के स्मारक, पृथ्वी से नन्दनवन के समान स्थित वृन्दावन धाम को जाओ।

(ख) जिस मायावी रावण से युद्ध में कुबेर का धन छीन लिया, और देवताओं के साथ महायुद्ध किया, ऐश्वर्यमद से निर्लज्ज उस रावण को देखकर मैं यहाँ आया हूँ। अथवा, इस संसार में प्राप्त हुआ ऐश्वर्य किसको सन्मार्ग से नहीं गिरा देता? ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न न र र र र

ǀ ǀ ǀ ǀ ǀ ǀ ऽ ǀ ऽ ऽ ऽ ǀ ऽ ऽ ǀ ऽ ऽ ऽ ǀ ऽ

इह ननरचतुष्कसृष्टन्तु नाराचमाचक्षते ॥ ३ ॥

(क) दिनकरतनयातटीकानने चारुसञ्चारिणी
श्रवणनिकटकृष्टमेणेक्षणा कृष्ण ! राधा त्वयि ।
ननु विकिरति नेत्रनाराचमेषाऽतिहृच्छेदनं
तदिह मदनविभ्रमोद्भ्रान्तचित्तां विधत्स्व द्रुतम् ॥

(ख) रघुपतिरपि जातवेदोविशुद्धां प्रगृह्य प्रियां
प्रियसुहृदि विभीषणे सङ्गमय्य श्रियं वैरिणः ।
रविसुतसहितेन तेनानुयातः ससौमित्रिणा
भुजविजितविमानरत्नाधिरूढः प्रतस्थे पुरीम् ॥

इति रघौ ।

प्र०—इहेति । नगणद्वयेन रगणचतुष्केण च, सृष्टं विरचितं वृत्तम्, इह छन्दोग्रन्थे, नाराचं नाम, आचक्षते कथयन्ति, विद्वांस इति शेषः !

(क) दिनकरेति । हे कृष्ण ! दिनकरतनया सूर्यपुत्री यमुना तस्याः तटीकानने तीरोपवने, चारु मनोहरं यथा तथा सञ्चारिणी भ्रमन्ती, एण्या मृग्या ईक्षणे नेत्रे इव ईक्षणे यस्याः सा विशालनेत्रेत्यर्थः, एषा राधा, त्वयि तवोपरि, श्रवणनिकटं कर्णपर्यन्तं कृष्टमाकृष्टम् कर्णान्तगामि विशालमिति भावः, अतिहृच्छेदनम् अतिशयेन हृदयविहारकं नेत्रनाराचं नयनरूपभल्लविशेषम्, नाराचो बाणभेदः, विकिरति प्रक्षिपति । तत् तस्मात्, अस्मिन् समये इह कानने, तां राधां, द्रुतं शीघ्रं मदनविभ्रमेण कामविलासेन उद्भ्रान्तं चपलं लक्ष्यसन्धानासमर्थमिति यावत्, चित्तं यस्यास्तादृशी, विधत्स्व कुरु । 'उद्भ्रान्तचित्ताऽवधत्स्व द्रुतम्' इति पाठे मदनात् कामाद् विभ्रमेण भ्रान्त्या उद्भ्रान्तं चित्तं यस्य तत्सम्बोधने, अवधत्स्व सावधानो भव इत्यर्थः । रूपकमुपमा चालङ्कारौ ।

(ख) रघुपतिरपीति । रघुपतिः रामोऽपि, जातवेदसि वह्नौ विशुद्धां जातशुद्धिं प्रियां सीतां, प्रगृह्य स्वीकृत्य, प्रियसुहृदि प्रियमित्रे विभीषणे, वैरिणः शत्रो रावणस्य, श्रियं राज्यलक्ष्मीं सङ्गमय्य सङ्गतां कृत्वा, तस्मै दत्त्वेत्यर्थः, गमेर्ण्यन्ताल्ल्यप्, 'मितां ह्रस्वः' इति ह्रस्वः, रविसुतसहितेन सुग्रीवयुक्तेन, ससौमित्रिणा सलक्ष्मणेन तेन विभीषणेन, अनुयातः अनुगतः सन्, विमानं रत्नमिवेति विमानरत्नमित्युप-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मितसमासः, भुजविजितं बाहुबललब्धं यद्विमानरत्नं पुष्पकं तदारूढः सन्, पुरीं स्वनगरीमयोध्यां, प्रतस्थे गन्तुं प्रववृते । 'समवप्रविभ्यः स्थः, इत्यात्मनेपदम् ।

हि०—जिसमें दो नगण तथा चार रगण क्रमशः हों, उसे 'नाराच' नामक छन्द कहते हैं ।

(क) हे कृष्ण ! यमुनातीर-वर्ति उपवनों में घुमती हुई मृगलोचना यह राधा तुम्हारे ऊपर हृदयविदारक कान-पर्यन्त खिंचे हुए नेत्ररूपी बाण छोड़ रही है, इस लिए इस समय तुम शीघ्र ही काम-विलास से इसका चित्त स्थिर कर दो (जिससे यह तुम्हारे ऊपर बाण न चला सके ।)

(ख) रामचन्द्र श्री, अग्नि में विशुद्ध प्रिय सीता को स्वीकार कर शत्रु की राज्यलक्ष्मी प्रियमित्र विभीषण को सौंप कर सुग्रीव तथा लक्ष्मणयुक्त उस (विभीषण) के साथ अपने बाहुबल से प्राप्त विमान-श्रेष्ठ पुष्पक पर चढ़ कर अयोध्या को रवाना हुए ॥ ३ ॥

म भ न ल त त ग ग

ऽ ऽ ऽ ऽ। । । । । । ऽ ऽ । ऽ ऽ । ऽ ऽ

मन्दाक्रान्ता नपरलघुयुता कीर्तिता चित्रलेखा ॥ ४ ॥

शङ्केऽमुष्मिञ्जगति मृगदृशां साररूपं यदासी-
दाकृष्येदं व्रजयुवतिसभा वेधसा सा व्यधायि ।
नैतादृक् चेत्कथमुदधिसुतामन्तरेणाच्युतस्य
प्रीतं तस्यां नयनयुगमभूच्चित्रलेखाद्भुतायाम् ॥

प्र०—मन्दाक्रान्तेति । 'मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद् गुरू चेत्' इति मन्दाक्रान्तालक्षणं पूर्वमुक्तम् । सा नपरलघुयुता नगणात्परेण लघुना युक्ता सती, चित्रलेखा कीर्तिता कथिता । मन्दाक्रान्तायां नगणात्परं तगणो भवति, तत्र नगणतगणयोर्मध्ये लघुरेकोऽधिकश्चेच्चित्रलेखा नाम वृत्तं भवेदित्यर्थः ।

शङ्के इति । अमुष्मिन् जगति अस्मिन् संसारे, मृगदृशां हरिणेक्षणानां स्त्रीणां यत् साररूपं श्रेष्ठांशभूतं सौन्दर्यमासीत्, वेधसा ब्रह्मणा, इदं साररूपम्, आकृष्य आदाय, सा व्रजयुवतिसभा व्रजाङ्गनामण्डलं, व्यधायि, विरचिता, इत्यहं शङ्के सम्भावयामि । तदेव समर्थयति—नैतादृगिति । चेद् यदि, एतादृग् इत्थं न स्यात्, तदा कथम् उदधिसुतां समुद्रपुत्रीं लक्ष्मीम्, अन्तरेण विना तां विहायेत्यर्थः, चित्रलेखाद्भुतायां चित्रितायामिवाश्चर्यरूपायां, तस्यां व्रजयुवतिसभायाम्, अच्युतस्य श्रीकृष्णस्य, नयनयुगं नेत्रद्वन्द्वं, प्रीतं प्रीतिमद् अभूत् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हि०—यदि पूर्वोक्त 'मन्दाक्रान्ता' नामक छन्द के नगण के बाद एक लघु हो, तो 'चित्रलेखा' नामक छन्द कहते हैं।

मैं समझता हूँ-इस संसारमें मृगेक्षणाओं का जो सारभूत अत्यन्त सौन्दर्य था, उसे ही लेकर विधाता ने व्रजाङ्गनाओं की सृष्टि की है। यदि ऐसा न होता तो लक्ष्मीको छोड़कर श्रीकृष्ण का मन इन व्रजयुवतियों में क्यों आसक्त होता? ॥

म स ज स त स

ऽ ऽ ऽ । । ऽ । ऽ । । । ऽ ऽ ऽ । । । ऽ

मः सो जः सतसा दिनेशऋतुभिः शार्दूलललितम् ॥ ५ ॥

कृत्वा कंसमृगे पराक्रमविधिं शार्दूलललितं
यश्चक्रे क्षितिभारकारिषु दरं चैद्यप्रभृतिषु।
सन्तोषं परमं तु देवनिवहे त्रैलोक्यशरणं
श्रेयो नः स तनोत्वपारमहिमा लक्ष्मीप्रियतमः ॥

प्र०—म इति। यत्र क्रमशः मगणसगणजगणसगणतगणसगणाः स्युः, दिनेशऋतुभिः द्वादशभिः षड्भिश्च यतिः स्यात्, तद् शार्दूलललितं वृत्तं भवति।

कृत्वेति। यः श्रीकृष्णः, कंस एव मृगः कंसमृगः तस्मिन्, शार्दूलललितं व्याघ्रमनोहरं व्याघ्रवद् रमणीयमित्यर्थः, पराक्रमविधिं शौर्यव्यापारं कृत्वा, तं व्यापद्येत्यर्थः, क्षितिभारकारिषु पृथ्वीभारकर्तृषु, चैद्यप्रभृतिषु शिशुपालप्रमुखेषु, दरं भयम्, देवनिवहे सुरवृन्दे, परमत्यन्तं सन्तोषं, चक्रे विदधे, सः त्रैलोक्यशरणं लोकत्रयस्य रक्षिता, अपारः अपरिमितोऽतिमहान् महिमा माहात्म्यं यस्य सः लक्ष्म्याः प्रियतमः पतिः श्रीकृष्णः नोऽस्माकं, श्रेयः कल्याणं, तनोतु विस्तारयतु।

हि०—जहाँ क्रमशः मगण, सगण, जगण, सगण, तगण और सगण हों तथा बारह और छः अक्षरों पर यति हो उसे 'शार्दूलललित' नामक छन्द कहते हैं।

जिन श्रीकृष्ण ने, कंसरूपी मृगपर व्याघ्र के समान अपना पराक्रम दिखाकर शिशुपाल-आदि पृथ्वी पर भार उत्पन्न करनेवालों को भयभीत तथा देवताओं को सन्तुष्ट कर दिया, तीनों लोकों के रक्षक, अनन्त-महिमावान् वे लक्ष्मीपति हमारा कल्याण करें ॥ ५ ॥

अत्र वृत्तरत्नाकरपरिशिष्टेऽधस्तनानि च्छन्दांस्यधिकानि दृश्यन्ते—

म स ज ज भ र

ऽ ऽ ऽ । । ऽ । ऽ । । ऽ । ऽ । । ऽ । ऽ

मात्सौ जौ भरसंयुतौ करिबाणकैर्हरिणप्लुतम् ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भ भ भ भ भ स

S I I S I I S I I S I I S I I I I S

पञ्चभकारयुताश्वगतिर्यदि चान्तसरचिता ॥ २ ॥

य म न स त स

I S S S S S I I I I I S S S I I I S

सुधा तर्कैस्तर्कैर्भवति ऋतुभिर्यो मोनसतसाः ॥ ३ ॥

म न न त त म

S S S I I I I I I S S I S S I S S S

वर्णाश्वैर्मननततमकैः कीर्तिता चित्रलेखेयम् ॥ ४ ॥

भ र न न न स

S I I S I S I I I I I I I I I I I S

भाद् रनना नसौ भ्रमरपदकमिदमभिहितम् ॥ ५ ॥

म स ज स र म

S S S I I S I S I I I S S I S S S S

शार्दूलं वद मासषट्कंयति मः सो जसौ रो मश्चेत् ॥ ६ ॥

म भ न य र र

S S S S I I I I I I S S S I S S I S

अर्थाश्वाश्वैर्मभनयरयुगैर्वृत्तं मतं केसरम् ॥ ७ ॥

म भ न ज भ र

S S S S I I I I I I S I S I I S I S

म्भौ न्जौ भ्रौ चेच्चलमिदमुदितं युगैर्मुनिभिः स्वरैः ॥ ८ ॥

न न र र र र

I I I I I I S I S S I S S I S S I S

यदिह नयुगलं ततो वेदरेफैर्महामालिका ॥ ९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्र०—मादिति । यत्र मगणात्परं सगणः जगणद्वयं भगणरगणौ च भवेताम् अष्टभिः, पञ्चभिः, पञ्चभिश्च विरामः, तद् वृत्तं हरिणप्लुतं नाम ॥ १ ॥

पञ्चेति । पञ्चभिर्भकारैर्युता अन्ते च सगणेन विहिता अश्वगतिर्भवति ॥ २ ॥

सुधेति । यत्र यगणमगणौ नगणसगणतगणसगणाश्च भवेयुः, तर्कैस्तर्कैः षड्भिः षड्भिः, पुनः श्रुतिभिः षड्भिरक्षरैर्विरामः स्यात् , सा सुधा नाम ॥ ३ ॥

वर्णाश्वैरिति । यत्र मगणः, नगणद्वयं, तगणद्वयं पुनर्मगणश्च भवेत्, वर्णाश्वैः चतुर्भिः सप्तभिश्च विरामः स्यात् , सा चित्रलेखा कथिता ॥ ४ ॥

भादिति । यत्र भगणादनन्तरं रगणः, नगणत्रयं सगणश्च भवेत् , तद् वृत्तं भ्रमरपदकं नाम कथितम् ॥ ५ ॥

शार्दूलमिति । यत्र मगणः, सगणः, जगणसगणौ रगणमगणौ च भवेयुः, मासैर्द्वादशभिः, षड्भिश्चाक्षरैर्विरामः स्यात् , तच्छन्दः शार्दूलनामकं भवति ॥६॥

अर्थाश्वाश्वैरिति । यस्मिन्वृत्ते मगणभगणनगणयगणा रगणद्वयं च स्युः, अर्थैश्चतुर्भिः अश्वाश्वैः सप्तभिश्चाक्षरैर्विरामो भवेत् , तत् केसरं नाम ॥ ७ ॥

म्भाविति । यत्र वृत्ते मगणभगणौ, नगणजगणौ भगणरगणौ च स्याताम् , विरामः पुनः युगैश्चतुर्भिः, मुनिभिः स्वरैः सप्तभिः सप्तभिश्च स्यात् , तत् चलनामधेयं जायते ॥ ८ ॥

यदिहेति । नगणद्वयेन रगणचतुष्टयेन च महामालिकानाम. वृत्तं भवति ॥९॥

ह०—जिसमें मगण, सगण, दो जगण भगण और रगण हों तथा आठ, पांच और पांच पर विराम हो, उस वृत्त को 'हरिणप्लुत' कहते हैं ॥ १ ॥

पांच भगण और एक सगण से युक्त वृत्त 'अश्वगति' कहलाता है ॥ २ ॥

जिस छन्द में यगण, मगण, नगण, सगण, तगण और सगण हों तथा क्रम से छः छः अक्षरों पर विराम हो, उसे 'सुधा' कहते हैं ॥ ३ ॥

जिसमें मगण, दो नगण, दो तगण और अन्त में एक मगण हो तथा चार और सात पर विराम हो, वह वृत्त 'चित्रलेखा' नामक होता है ॥ ४ ॥

जिसमें भगण रगण, तीन नगण और सगण हों, उस वृत्त का नाम 'भ्रमरपदक' होता है ॥ ५ ॥

जब मगण, सगण, जगण, सगण, रगण और मगण हों तथा बारह और छः पर विराम हो, तब 'शार्दूल' नामक छन्द होता है ॥ ६ ॥

जिस छन्द में मगण, भगण, नगण, यगण और दो रगण हों तथा चार सात और सात पर विराम हो, वह 'केसर' नामक होता है ॥ ७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जिस वृत्त में मगण, सगण, नगण, जगण, भगण और रगण हों तथा चार सात और सात पर विराम हो, उसे 'चल' कहते हैं ॥ ८ ॥

दो नगण और चार रगण से युक्त वृत्त को 'महामालिका' कहते हैं ॥ ९ ॥

(१९) अतिधृतिः (ऊनविंशत्यक्षरा वृत्तिः) ।

य म न स र र ग

। ऽ ऽ ऽ ऽ ऽ । । । । । ऽ ऽ । ऽ ऽ । ऽ ऽ

रसर्त्वश्वैर्यमौ न्सौ ररगुरुयुतौ मेघविस्फूर्जिता स्यात् ॥ १ ॥

(क) कदम्बामोदाढ्या विपिनपवनाः केकिनः कान्तकेका
विनिद्राः कन्दल्यो दिशि दिशि मुदा दर्दुरा दृप्तनादाः ।
निशा नृत्यद्विद्युद्विलसितलसन्मेघविस्फूर्जिता चे-
त्प्रियः स्वाधीनोऽसौ दनुजदलनो राज्यमस्मात्किमन्यत् ॥

(ख) उदञ्चत्कावेरीलहरिषु परिष्वङ्गरङ्गे लुठन्तः
कुहूकण्ठीकण्ठीरवरवलवत्रासितप्रोषितेभाः ।
अमी चैत्रे मैत्रावरुणितरुणीकेलिकङ्केलिमल्ली-
चलद्वल्लीहल्लीसकसुरभयश्चण्डि ! चञ्चन्ति वाताः ॥

इति कस्यचित् ।

प्र०—रसर्त्वश्वैरिति । यस्याः पादे यगणमगणौ नगणसगणौ च स्याताम्, तौ पुनः रगणरगणगुरुभिः सहितौ भवेताम्, अर्थात् यत्र यगणमगणनगणसगण-रगणरगणगुरवो यथाक्रमं स्युः, सा मेघविस्फूर्जिता नाम । अत्र रसैः षड्भिः ऋतुभिः षड्भिः अश्वैः सप्तभिश्च यतिर्भवति ।

(क) कदम्बेति । विपिनपवनाः वनवाताः, कदम्बानां कदम्बपुष्पाणामामोदेन गन्धेन आढ्याः सम्पृक्ताः, केकिनो मयूराः, कान्ता श्रुतिमधुरा केका ध्वनिर्येषां तथोक्ताः, कन्दल्यो भूमिकदलीविशेषाः, विनिद्राः विकसिता इत्यर्थः, दिशि दिशि सर्वासु दिक्षु, दर्दुरा मण्डूकाः मुदा हर्षेण, दृप्तः उद्धतः नादो रवो येषां तथाभूताः, निशा रात्रिः, नृत्यन्तीनां स्फुरन्तीनां विद्युतां विलसितेन स्फुरणेन लसन् शोभमानो यो मेघः तस्य विस्फूर्जितं निर्घोषो यस्यां तथोक्ता, अस्तीति शेषः । पूर्ववाक्येष्वपि यथायोगमस्तिक्रियाऽध्याहर्तव्या । चेद् यदि इदानीं, प्रियः प्रेमास्पदीभूतः, असौ दनुजदलनः दैत्यहन्ता श्रीकृष्णः, स्वाधीनः स्वेच्छावशवर्ती स्यात्, तदा अस्मात् प्रियसमागमात्, अन्यद् भिन्नं, राज्यं राज्यसुखं किम् ? न किमपीत्यर्थः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(ख) उदाहरणान्तरं कस्यचिद्दर्शयति—उदञ्चदिति। हे चण्डि कोपने! चैत्रे वसन्ते, उदञ्चन्तीषु उच्छलन्तीषु कावेर्या नद्या लहरिषु तरङ्गेषु, परिष्वङ्गः आलिङ्गनं संसर्ग इति यावत्, स एव रङ्गो नृत्यभूमिस्तत्र लुठन्तः कावेरीचञ्चल-तरङ्गसंसर्गशीतला इति यावत्, कुहू-इति ध्वनिः कण्ठे यस्याः सा कुहूकण्ठी कोकिला सैव कण्ठीरवः सिंहः तस्य रवकवेन शब्दलेशेन अल्पध्वनिनेत्यर्थः, त्रासिता भीषिताः प्रोषिता विदेशं याता विरहिण इति यावत्, त एव इभा गजा यैस्ते तथोक्ताः, एतेन वातानां मन्दमुक्तम्, मैत्रावरुणेरगस्त्यस्य तरुण्याः पत्न्या लोपामुद्रायाः केल्यै क्रीडानिमित्तं यः कङ्केलिः अशोकः मल्ली मल्लिका चलद्वल्ली चञ्चला लता च तासां हल्लीसकेन मण्डलाकारनृत्येन तद्वशात्पतितैः कुसुमैरिति यावत्, सुरभयः सुगन्धाः, वाताः वायवः, वान्ति चलन्ति। एतादृशे मनोरमे समये त्वया मानो हातव्य इति भावः।

रु०—जब क्रमशः यगण, मगण, नगण, सगण, रगण, रगण और अन्त में एक गुरु हो, तब उस छन्द का नाम 'मेघविस्फूर्जिता' होता है। इसमें छः छः और सात अक्षरों पर यति होती है।

(क) वन का समीर कदम्बपुष्पों की सुगन्ध से परिपूर्ण है, मयूरगण मीठी बोली बोल रहे हैं, कन्दली के फूल खिले हैं, चारो तरफ हर्ष के साथ मेढक गर्वयुक्त स्वर में बोल रहे हैं, कौधती हुई बिजली के विलास से शोभित बादलों के गर्जन से रात्रि परिपूर्ण है। ऐसे समय में यदि प्रिय श्रीकृष्ण मेरी इच्छा के अनुकूल काम करने वाले हो जावें तो फिर इससे बढकर दूसरा राज्यसुख कौन सा है?

(ख) ऐ रूठनेवाले! चैत के महीने में यह, कावेरी नदी की उछलती हुई तरङ्गों पर क्रीडा करनेवाला, कोकिल-रूपी सिंह के अत्यल्प शब्द से भी विरहीजनरूपी हाथियों को डरा देनेवाला तथा अगस्त्य ऋषि की पत्नी लोपामुद्रा की क्रीडा के लिए (उगाये हुए) अशोकमल्लिका तथा विलसती हुई लताओं के घूम घूमकर किये गये हुए नृत्य के कारण (उनसे गिरे हुए फूलों के संसर्ग से) सुगन्धयुक्त, पवन चल रहा है ॥ १ ॥

य म न स त त ग

ISS SSS III IIS SSI SSI S

भवेत्सेवच्छाया तयुगगयुता स्याद् द्वादशान्ते यदा ॥ २ ॥

अभीष्टं जुष्टो यो वितरति लसद्दोश्चाहशाखोज्ज्वलः

स्फुरन्नानारत्नस्तबककलितस्तनुश्चित्रांशुकालङ्कृतः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न यस्याङ्घ्रेश्छायामुपगतवतां संसारतीव्रातप-
स्तनोति प्रोत्ताप स जगदवताद् कंसारिकल्पद्रुमः ॥

प्र०—अवेदिति । सा मेघविस्फूर्जिता एव, यदि द्वादशान्ते द्वादशाक्षरावसाने, तयुगगयुता तगणद्वयेन एकेन गुरुणा च सहिता स्यात्, तदा छाया नाम स्यात्। अर्थाद् यत्र क्रमेण यगणभगणनगणतगणतगणगुरवः स्युः, सा छाया नाम। यतिस्तु पूर्ववदेव।

अभीष्टमिति। लसन्तः शोभमाना दोषौ भुजा एव चारुशाखाः मनोहरशाखा-स्ताभिरुज्वलः दीप्यमानः स्फुरद्भिः कान्तिमद्भिर्नानारत्नैः स्तबकिता सञ्जातस्तबका गुच्छान्विता तनुः शरीरं यस्य स तथोक्तः चित्रं मनोहरम् अंशकं वस्त्रमाकम्बितं स्वीकृतं परिहितमिति यावत्, येन तथोक्तः, यः कंसारिकल्पद्रुमः श्रीकृष्णरूपः कल्पवृक्षः, जुष्टः सेवितः सन्, अभीष्टं वाञ्छितं वस्तु, वितरति ददाति। यस्य कंसारिकल्पवृक्षस्य अङ्घ्रेः चरणस्य मूलस्येति च गम्यते, छायामनातपमाश्रयमिति यावत्, उपगतवतां प्राप्तवतां भक्तजनानां संसार एव तीव्रातपः प्रचण्डः सूर्य-प्रकाशः, प्रोत्तापं पीडां, न तनोति न करोति, स श्रीकृष्णकल्पवृक्षः, जगत् लोकम्, अवताद् रक्षतु।

हि०—यदि 'मेघविस्फूर्जिता' नामक छन्द में ही बारह अक्षर के बाद दो तगण और एक गुरु हो, तो उसे 'छाया नामक वृत्त कहते हैं। अर्थात् इसमें 'मेघविस्फू-र्जिता' के दो रगण के स्थान पर दो तगण होते हैं।

सुन्दर भुजा-रूपी शाखाओं से सुशोभित, चमचमाते हुए अनेक रत्नों द्वारा जिसका शरीर गुलदस्ता सा बना हुआ है और जिसने मनोहर वस्त्र धारण किया है, ऐसा कृष्णरूपी कल्पवृक्ष आराधना किये जाने पर वाञ्छित फल प्रदान करता है और जिसके (मूल) चरणों की छाया प्राप्त करनेवाले भक्तोंको संसाररूपी प्रचण्ड-धूप सन्तप्त नहीं कर सकती, वह श्रीकृष्ण-कल्पवृक्ष संसार की रक्षा करे ॥ २ ॥

म स ज स त त ग

ऽ ऽ ऽ । । ऽ । ऽ । । । ऽ ऽ ऽ । ऽ ऽ । ऽ

सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम् ॥ ३ ॥

गोविन्दं प्रणमोत्तमाङ्ग ! रसने ! तं घोषयाऽहर्निशं
पाणी ! पूजय तं, मनः ! स्मर, पदे ! तस्यालयं गच्छतम्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एवञ्चेद् कुरुथाखिलं मम हितं शीर्षादयस्तद् ध्रुवं
न प्रेक्षे भवतां कृते भवमहाशार्दूलविक्रीडितम् ॥

प्र०—सूर्याश्वैरिति। यदि मगणः, सगणजगणौ सगणतगणतगणगुरवश्च स्युः, तदा शार्दूलविक्रीडितं नाम छन्दः। अत्र सूर्यैः द्वादशभिः अश्वैः सप्तभिश्च यतिर्भवति।

गोविन्दमिति। हे उत्तमाङ्ग शिरः! गोविन्दं श्रीकृष्णं, प्रणम! हे रसने जिह्वे! तं गोविन्दम्, अहर्निशं सदा घोषय उच्चारय। हे पाणी हस्तौ! युवां, तं गोविन्दं, पूजयतम् अर्चयतम् हे मनः चेतः! तं गोविन्दं स्मर चिन्तय। हे पदे चरणौ! तस्य गोविन्दस्य, आलयमाश्रय, गच्छतं! व्रजतम्। हे शीर्षादयः उत्तमाङ्गप्रभृतयः! इत्थम् अखिलं सर्वं, मम हितं कल्याणं कुरुथ चेत, तदा भवतां कृते युष्मन्निमित्तेन युष्मत्कृपयेति भावः, भवः संसाररूपो यो महाशार्दूलः भीषणो व्याघ्रः तस्य विक्रीडतं चेष्टितमाक्रमणादिव्यापारं, न प्रेक्षे न गणयामीत्यर्थः। इति ध्रुवं निश्चितमेव।

रु०—जिसमें मगण, सगण जगण सगण और दो तगण तथा अन्त में एक गुरु हो और बारह तथा सात पर यति हो, वह 'शार्दूलविक्रीडित' नामक छन्द कहलाता है।

हे सिर! गोविन्द को प्रणाम करो! हे जिह्वे! दिन-रात उसीका उच्चारण करो, हे हाथों! गोविन्द की पूजा करो। हे मन गोविन्द का स्मरण करो! हे पैरों! तुम गोविन्द के आश्रय में जाओ। हे सिर-आदि ओं! तुम इस प्रकार मेरा हित करो तो तुम्हारे कारण मैं संसार-रूपी भयंकर व्याघ्र की चेष्टाओं को कुछ न गिनूँ॥

म र भ न य न ग

ऽऽऽ ऽ।ऽ ऽ।। ।।। ।ऽऽ ।।। ऽ

म्रौ भ्नौ यो नो गुरुश्चेत्स्वरमुनिकरणैराद्य सुरसाम् ॥ ५ ॥

कामक्रीडासतृष्णो मधुसमयसमारम्भरभसात्।
कालिन्दीकूलकुञ्जे विहरणकुतुकाकृष्टहृदयः।
गोविन्दो वल्लवीनामधररससुधां प्राप्य सुरसां
शङ्के पीयूषपानप्रचय(१)कृतसुखं व्यस्मरदसौ॥

प्र०—म्राविति। यत्र मगणरगणौ, भगणनगणौ, यगणः, नगणः, अन्ते

(१) 'पीयूषपानैः प्रचुरः' इति पाठान्तरम्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एको गुरुश्च स्यात्, सा सुरसा नाम। अत्र स्वरैः सप्तभिः मुनिभिः सप्तभिः करणैः पञ्चभिश्च यतिः कर्तव्या।

कामक्रीडालसत्तृष्ण इति। मधुसमयस्य वसन्तर्तोः, समारम्भेण प्रादुर्भावेण, रसमाद् उल्लासात्, कामक्रीडायां मनोजव्यापारे सुरत इत्यर्थः, सतृष्णः लोलुपः, कालिन्दीकूलकुञ्जे यमुनातीरवने, विहरणे कामक्रीडायां, यत् कुतुकम् अभिलाषः तेन आकृष्टं हृदयं यस्य स तथोक्तः, असौ गोविन्दः श्रीकृष्णः, सुरसां हृद्यां, वल्लवीनां गोपीनाम्, अधररससुधाम् अधरपानजनितामृतं प्राप्य लब्ध्वा, गोपीनामधरपानजनितानन्दमनुभूयेत्यर्थः, पीयूषपानानाम् अमृतपानानां प्रचयेन समूहेन कृतं सुखमानन्दं, पुनः पुनरमृतपानजनितानन्दमित्यर्थः, व्यस्मरद् विस्मृतवान्, इत्यहं शङ्के मन्ये।

स०—जिसमें क्रमशः मगण, रगण, भगण, नगण, यगण और अन्त में एक गुरु हो, उसे 'सुरसा' नामक वृत्त कहते हैं। इसमें सात सात और पाँच वर्णों पर यति होती है।

श्रीकृष्ण का हृदय, वसन्त ऋतु का प्रादुर्भाव होने के उल्लास से कामक्रीडा में लोलुप होकर यमुनातटस्थ-वनों में विहार के लिए उत्सुक हो उठा, अत एव गोपियों के मधुर अधररस का पान कर वे बार-बार अमृतपान के सुख को भी भूल गये ॥४॥

म   ग ग   न   न   त   त   ग ग

S S S S S I I I I I I S S I S S I I I

मो गौ नौ तौ गौ शरहयतुरगैः फुल्लदाम प्रसिद्धम् ॥ ५ ॥

शश्वल्लोकानां प्रकटितकदनं ध्वस्तमालोक्य कंसं
हृष्यच्चेतोभिर्दिविवसतिभिर्व्योमसंस्थैर्विमुक्तम्।
मुग्धामोदेन स्थगितदशदिगाभोगमाहूतभृङ्गं
मौलौ देव्यारेन्यपतदनुपमं स्वस्तरोः फुल्लदाम ॥

म०—मो गाविति। यद् मगणगुरुद्वयनगणनगणतगणतगणैः गुरुद्वयेन च युक्तं स्यात्, तत् फुल्लदामनाम वृत्तं प्रसिद्धम्। अत्र पञ्चभिः सप्तभिः सप्तभिश्च वर्णैर्यतिः कर्तव्या।

शश्वदिति। शश्वद् निरन्तरं, लोकानां प्रजानां, प्रकटितं कृतमिति यावत्, कदनं पीडनं येन तथोक्तं, कंसं, ध्वस्तं विनष्टम्, आलोक्य दृष्ट्वा, हृष्यत्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रसन्नं चेतो मनो येषां तैः, त्रिदिवे स्वर्गे वसतिर्निवासो येषां तैः, स्वर्गवासिभिर्देवै-रित्यर्थः, व्योम्नि आकाशे संस्था स्थितिर्येषां तैः, आकाशस्थैरिति भावः, विमुक्त-मभिवृष्टम्, सुरभामोदेन स्वमनोहारिगन्धेन, स्थगितो व्याप्तो दशदिशामा-भोगो विस्तारो येन तथोक्तम्, आहूताः सौगन्ध्येन आकृष्टाः भृङ्गा भ्रमरा येन तथाभूतम्, अनुपमम् अद्वितीयं, स्वस्तरोः स्वर्गीयवृक्षस्य, फुल्लदाम विकसित-पुष्पमाला, दैत्यारेः कृष्णस्य, मौलौ मस्तके न्यपतत ।

हि०—जिसमें मगण, दो गुरु, दो नगण, दो तगण और दो गुरु क्रमशः हों, वह वृत्त 'फुल्लदाम' नाम से प्रसिद्ध है। इसमें पाँच और सात वर्णों पर यति होती है।

लोगों को निरन्तर पीडित करनेवाले कंस का विनाश देख कर प्रसन्नचित्त स्वर्गवासी आकाशस्थित देवताओं द्वारा छोड़ी हुई, अपने मनोरम गन्ध से दश-दिशाओं को व्याप्त करनेवाली तथा भ्रमरों को आकर्षक, पारिजात की विकसित पुष्पमाला श्रीकृष्ण के मस्तक पर गिरी ॥ ५ ॥

अत्र वृत्तरत्नाकरपरिशिष्टे इमानि छन्दांसि दृश्यन्तेऽधिकानि—

म त न स त त ग
SSS SSI III IIS SSI SSI S

वृत्तं विभ्वाख्यं शरमुनितुरगैर्म्तौन्सौ ततौ चेद् गुरुः ॥ १ ॥

य म न स ज ज ग
ISS SSS III IIS ISI ISI S

रसैः षड्भिर्लोकैर्यमनसजजा गुरुर्मकरन्दिका ॥ २ ॥

य भ न य ज ज ग
ISS SII III ISS ISI ISI S

इनाश्वैः स्याद् यभनयजजगाः कीर्तिता मणिमञ्जरी ॥ ३ ॥

ज स ज स त भ ग
ISI IIS ISI IIS SSI SII S

गजाब्धितुरगैर्जसौ जसतभा गश्चेत् समुद्रलता ॥ ४ ॥

वृत्तमिति । यत्र मगणतगणौ, नगणसगणौ, तगणद्वयं, गुरुश्चैको भवेद्, पञ्चभिः सप्तभिः सप्तभिश्चाक्षरैर्विरामैः स्याद् तद् वृत्तं विभुनामकं भवति ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रसैरिति। यस्मिन् वृत्त यगणभगणनगणसगणाः, जगणद्वयम् एको गुरुश्च भवेत्, षड्भिः षड्भिः सप्तभिश्चाक्षरैर्विरामः स्यात्, तद् मकरन्दिकानाम ॥ २ ॥

इनाश्वैरिति। यत्र यगणभगणनगणयगणाः, द्वौ जगणौ गुरुश्चैको भवेत्, तथा द्वादशभिः सप्तभिर्विरामः स्यात्, तस्य वृत्तस्य मणिमञ्जिरीति नाम जायते ॥ ३ ॥

गजाब्धीति। यस्मिंश्छन्दसि जगणसगणौ, जगणसगणौ, तगणभगणौ गुरुश्चैकः स्यात्, अष्टभिश्चतुर्भिः सप्तभिश्च विरतिर्भवेत्, तत् समुद्रलता नाम ॥ ४ ॥

र०—जिस छन्द में सगण, तगण, नगण, सगण, दो तगण और एक गुरु हो तथा पांच और सात सात पर विराम हो वह 'विभु' नामक होता है ॥ १ ॥

जिसमें यगण, भगण, नगण, सगण, दो जगण और एक गुरु हो तथा छः छः और सात पर विराम हो, उसे 'मकरन्दिका' कहते हैं ॥ २ ॥

जिस वृत्त में यगण, भगण, नगण, यगण, दो जगण और एक गुरु हो तथा बारह और सात पर विराम, हो, वह छन्द 'मणिमञ्जरी' नामक होता है ॥ ३ ॥

जिसमें जगण, सगण, जगण, सगण, तगण भगण और एक गुरु तथा आठ चार और सात पर विराम हो, वह वृत्त 'समुद्रलता' नामक होता है ॥ ४ ॥

(२०) कृतिः (विंशत्यक्षरा वृत्तिः)।

म र भ न य भ लग

SSS SIS SII III ISS SII IS

ज्ञेया सप्ताश्वषड्भिर्मरभनययुता भ्लौ गः सुवदना ॥ १ ॥

प्रत्याहृत्येन्द्रियाणि त्वदितरविषयान्नासाऽग्रनयना
त्वां ध्यायन्ती निकुञ्जे परतरपुरुषं हर्षोत्थपुलका।
आनन्दाश्रुप्लुताक्षी वसति सुवदना योगैकरसिका
कामार्तिं त्यक्तुकामा ननु नरकरिपो! राधा मम सखी ॥

प्र०—ज्ञेयेति। या मगणरगणभगणनगणयगणैर्युता, अथ च यत्र भगणो लघुश्च, तत् एको गुरुरपि स्यात्, सा सुवदना नाम। सप्तभिः सप्तभिः षड्भिश्चात्र यतिर्ज्ञेया।

प्रत्याहृत्येति। नन्विति सम्बोधने। हे नरकरिपो श्रीकृष्ण! सुवदना शोभनानना, मम सखी राधा, कामार्तिं कामपीडां, त्यक्तुकामा परिहर्तुमिच्छन्ती, योगे चित्तवृत्तिनिरोधे, एको मुख्यस्तत्रैवेत्यर्थः रसोऽनुरागो यस्याः सा, निकुञ्जे लतादिपिहितोदरे गृहे वसति, एकान्तस्थान एव योगानुष्ठानात्। तया गत्यन्तरा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भावाद् योगादेव तव साक्षात्कारः सङ्कल्पित इति भावः। योगप्रकारमेवाह—प्रत्याहृत्येति। त्वदितरविषयात् त्वदतिरिक्तविषयात्, इन्द्रियाणि चक्षुरादीनि, प्रत्याहृत्य निवार्य त्वय्येव स्थापयित्वेत्यर्थः, नासाऽग्रे नासिकाऽग्रभागे नयने नेत्रे यस्याः तथोक्ता सती, परतरपुरुषं परमात्मानं त्वां, ध्यायन्ती चिन्तयती, हर्षेण त्वत्साक्षात्कारजन्यानन्देन उत्थं समुद्भूतं पुलकं रोमाञ्चो यस्याः तथोक्ता, आनन्दाश्रुभिः प्रेमानन्दजनितबाष्पैः प्लुते सिक्ते अक्षिणी नेत्रे यस्याः तथोक्ता, वर्तत इति शेषः।

ह०—जिसमें मगण, रगण, भगण, नगण, यगण, भगण, लघु और अन्त में एक गुरु हो तथा सात सात और छः पर यति हो, उस छन्द को 'सुवदना' कहते हैं।

हे कृष्ण महाराज! मेरी सखी राधा, अपनी कामपीडा निवृत्त करने के लिए योग में ही निरत हो कुञ्ज में वास करती है। उसने तुम्हारे अतिरिक्त सब विषयों से अपनी इन्द्रियां हटा ली हैं। वह नासा के अग्रभाग पर नेत्र स्थापित करती है। परमपुरुष तुम्हारा ध्यान करते हुए हर्ष के कारण उसके रोमाञ्च खड़े हो जाते हैं और आनन्दाश्रुओं से उसके नेत्र भरे रहते हैं॥ १॥

स स ज भ र स ल ग

। । S । S । । S । S । । S । S । । S । S

सजजा भरौ सलगा यदा कथिता तदा खलु गीतिका ॥ २ ॥

करताल चञ्चलकङ्कणस्वनमिश्रणेन मनोरमा
रमणीयवेणुनिनादरङ्गिमसङ्गमेन सुखावहा।
बहुलानुरागनिवासरासमुद्भवा भवरागिणं
विदधौ हरिं खलु वल्लवीजनचारुचामरगीतिका॥

इति महाकाव्ये।

प्र०—सजजा इति। यस्याः पादे सगणजगणजगणाः, भगणरगणौ, सगणो लघुर्गुरुश्च स्यात्, सा गीतिका नाम।

करतालेति। करतालेन हस्ततालप्रदानेन चञ्चलं यत् कङ्कणं वलयः तस्य स्वनस्य ध्वनेर्मिश्रणेन संसर्गेण, मनोरमा हृदयहारिणी, रमणीयः श्रुतिमधुरो यो वेणुनिनादः वंशीध्वनिः तस्य यः रङ्गिमा लयविशेषः तस्य सङ्गमेन सम्पर्केण सुखावहा आनन्दप्रदा, वंशीतालसमन्विता इत्यर्थः, बहुलानुरागस्य प्रचुरप्रेम्णो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

निवासः आश्रयो यो रासः रासक्रीडा तत्र समुद्भवतीति समुद्भवा समुत्पन्ना, वल्लवीजनस्य गोपीजनस्य चारु मनोहरं चामरं यस्यां सा चारी गीतिका गानविशेषः, चामरचालनपूर्वं सङ्गीतमित्यर्थः, हरिं कृष्णं, नवरागिणं संसाराप्तं, विदधौ चकार।

इ०—जिसमें सगण, जगण, जगण, भगण, रगण, सगण, लघु और गुरु क्रमशः हों, उसे 'गीतिका' नामक छन्द कहते हैं।

ताल देने से हिलते हुए कङ्कणों की ध्वनि से मिश्रण होने के कारण मनोहर सुमधुर वेणु शब्द के लय सम्पर्क से आनन्ददायिनी, गाढानुरागनिवासभूत रास में उत्पन्न, गोपीजनों की सुन्दर-चामर-समन्वित गीतिका ने हरि को संसारप्रेमी बना दिया ॥ २ ॥

र ज र ज र ज ग ल

SIS ISI SIS ISI SIS ISI SI

वृत्तमीदृशन्तु नामतो रजौ रजौ रजौ गुरुर्लघुश्च ॥ ३ ॥

चित्रवृत्तलीलया निसर्गरम्यदेहरूपविभ्रमेण
राजमानसद्वयोविलाससम्पदा कलाकुतूहलेन ।
यः समं व्रजाङ्गनाजनैः सुराङ्गनानिभैः सुखं समेत्य
विष्णुरुल्ललास चित्तपद्मकोषषट्पदः स मेऽस्तु ॥

प्र०—वृत्तमिति। यस्यैकस्मिन् पादे रगणजगणौ, एवं पुनर्द्विवारं रगणजगणौ स्याताम्, अन्ते एको गुरुर्लघुश्च स्यात्, तद् वृत्तं नामतोऽपि वृत्तमेव। अत्र पादान्ते यतिः।

चित्रेति। यः विष्णुः, चित्रमद्भुतं यद् वृत्तं चरित्रं तस्य लीलया विलासेन 'वृत्तं पद्ये चरित्रे च' इत्यमरः, 'चित्तवृत्तिलीलया' इति पाठे सङ्कल्पमात्रेणेत्यर्थः, राजमानं दीप्यमानं यत् सद्वयः कैशोरपौगण्डाद्युत्तमावस्थाविशेषः तस्य विलाससम्पदा विलासैश्वर्येण, कलासु नृत्यादिचतुःषष्टिकामविद्यासु कुतूहलेन औत्सुक्येन, निसर्गरम्यः स्वभावसुन्दरो यो देहः शरीरं तस्य रूपविभ्रमेण सौन्दर्यविलासेन हेतुना, सुराङ्गनानिभैः अप्सरःसदृशैः, व्रजाङ्गनाजनैः गोपीजनैः, समं सह, सुखमानन्दं, समेत्य अनुभूय, उल्ललास क्रीडितवान् रासक्रीडां चकारेत्यर्थः, स विष्णुः, मे मम-चित्तं मानसमेव पद्मं कमलं तस्य कोषमध्ये षट्पदः भ्रमरस्वरूपोऽस्तु।

इ०—जिसमें क्रमशः तीन बार रगण जगण हों और अन्त में एक गुरु तथा लघु हों उस छन्द को वृत्त कहते हैं।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जो अपने अद्भुतचरित्र, स्वभावसुन्दर शरीरसौन्दर्य, कान्तिसम्पन्न यौवनावस्था के विलास और नृत्यादि ६४ कलाओं की उत्सुकता द्वारा अप्सराओं के तुल्य व्रजाङ्गनाओं के साथ सुख पाकर आनन्दित होते हैं, वे विष्णुभगवान् मेरे हृदय-रूपी कमल में भ्रमर-रूप होकर विराजमान हों ॥ ३ ॥

य म न न ग र र ग

। ऽ ऽ ऽ ऽ ऽ । । । । । । ऽ ऽ । ऽ ऽ । ऽ ऽ

रसाश्वाश्वैः शोभा नयुगगजठरा मेघविस्फूर्जिता चेत् ॥ ४ ॥

सदा पूषोन्मीलत्सरसिजयुगला मध्यनम्रा फलाभ्यां
तयोरूर्ध्वं राजत्तरलकिसलयाश्लिष्टसुस्निग्धशाखा ।
लसन्मुक्तारक्तोत्पलकुवलयवच्चन्द्रबिम्बाञ्चिताग्रा
महाशोभा मौलौ मिलदलिपटलैः कृष्ण ! सा काऽपि वल्ली ॥

प्र०—रसेति । चेद् यदि, पूर्वोक्ता 'यमनसररग'घटिता मेघविस्फूर्जिता, नयुगं नगणद्वयं गकारो गुरुश्च जठरे मध्ये यस्याः तथाभूता स्यात्, तदा तस्याः शोभा इति नाम जायते । मेघविस्फूर्जितायाः सगणस्थाने नगणस्ततः परमेको गुरुश्चेत्स्यात्, तदा शोभानाम वृत्तं भवेदित्यर्थः । अत्र रसैः षड्भिः, अश्वैरश्वैः सप्तभिः सप्तभिश्च यतिर्भवेत् ।

सदेति । हे कृष्ण ! सदा, पूष्णा सूर्येण उन्मीलद् विकसितं सरसिजयुगलं कमलद्वयं, पादपद्मद्वयमित्यर्थः, यस्याः सा, 'मूलोन्मीलत्' इति पाठे उन्मीलत् प्रफुल्लमित्यर्थः, मध्ये मध्यभागे फलाभ्यां फलरूपाभ्यां कुचाभ्यामित्यर्थः, नम्रा अवनता, तयोः फलयोः, ऊर्ध्वे, राजन्ती शोभमाने तरले चञ्चले च ये किसलये पल्लवे हस्तौ इत्यर्थः, ताभ्यामाश्लिष्टे सम्बद्धे सुस्निग्धे शाखे भुजौ यस्याः सा, लसन्त्यो विराजमाना मुक्ताः मौक्तिकानि दन्ता इत्यर्थः, रक्तोत्पलम् अधरबिम्बमित्यर्थः, कुवलये नयने इत्यर्थः, यस्मिंस्तत् लसन्मुक्तारक्तोत्पलकुवलयवद् एतादृशं यत् चन्द्रबिम्बं मुखमण्डलं तेन अञ्चितः शोभमानोऽग्रदेशो यस्याः सा, मौलौ मस्तके, मिलद्भिः सङ्गतैः अलिपटलैः भ्रमरसमूहैः, महती शोभा यस्याः सा महाशोभा, एतादृशी काऽपि अनिर्वचनीया, सा प्रसिद्धा, त्वया सततमनुभूता वा, वल्ली लता राधिकारूपा, तव समीपे विराजत इति शेषः ।

इ०—यदि 'मेघविस्फूर्जिता' नामक छन्द में बीच में दो नगण और एक गुरु हों अर्थात् 'मेघविस्फूर्जिता' के सगण स्थान में एक नगण और उसके बाद एक गुरु

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हों, तो उसे 'शोभा' नामक छन्द कहते हैं। इसमें छः और सात सात वर्णों पर यति होती है।

हे श्रीकृष्ण ! तुम्हारे (कृष्ण-रूपी वृक्ष के) समीप में कोई अनिर्वचनीय लता (राधिका) सुशोभित हो रही है। उस लता के दो कमल (पैर) सूर्यकिरण के सम्पर्क से खिलकर सुशोभित हो रहे हैं। फलों (कुचों) से उसका मध्यभाग झुका हुआ है। फलों के ऊपर सुन्दर और चञ्चल पल्लवों (हाथों) से सम्बद्ध मनोहर शाखा (भुजा) विराज रही है। उसका अग्रभाग (शिखर प्रदेश), सुन्दर मोती (दाँत) रक्तकमल (अधरोष्ठ) और कुवलय (नेत्र) समन्वित चन्द्रबिम्ब (मुखमण्डल) से सुशोभित है। मस्तक पर बैठे हुए भ्रमरसमूहों (केशों) से उसकी अपार शोभा हो रही है। इसमें कृष्ण के पास बैठी हुई श्रीराधिका का वर्णन है ॥ ४ ॥

(२१) प्रकृतिः (एकविंशत्यक्षरावृत्तिः)।

म र भ न य य य

S S S S I S S I I I I I I S S I S S I S S

म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ॥ १ ॥

व्याकोषेन्दीवराभा कनककषलसत्पीतवासाः सुहासा
बर्हैरुच्चन्द्रकान्तैर्वलयितचिकुरा चारुकर्णावतंसा।
अंसव्यासक्तवंशीध्वनिसुखितजगद् वल्लवीभिर्लसन्ती
मूर्तिर्गोपस्य विष्णोरवतु जगति नः स्रग्धरा हारिहारा ॥

प्र०—म्रभ्नैरिति। मगणरगणभगणनगणैः, यगणानां त्रयेण त्रिभिर्यगणैरित्यर्थः, उपलक्षिता, त्रिमुनियतियुता त्रिवारं मुनिभिर्यतियुता, सप्तभिः सप्तभिः सप्तभिश्च यतिमतीत्यर्थः, एवं लक्षणा इयं स्रग्धरा कीर्तिता कथिता।

व्याकोषेति। व्याकोषं विकसितं यद् इन्दीवरं नीलपद्मं तस्य आभा इव आभा यस्याः सा इन्द्रनीलकान्तिरित्यर्थः, कनककषः सुवर्णलेखा तद्वद् लसद् शोभमानं पीतं वासो यस्याः सा पीताम्बरधारिणीत्यर्थः, सुहासा मन्दस्मितानना, उद् ऊर्ध्वं चन्द्रकाणां मयूरपिच्छवर्तिनाम् , अन्ताः प्रान्तभागा यत्र तादृशैः, उच्चन्द्रैः उदितचन्द्रकैः कान्तानि रमणीयानि तैरिति वा, बर्हैः मयूरपिच्छैः वलयिताः संयताः चिकुराः कचा यस्याः सा, चारुणी मनोहरौ कर्णावतंसौ कर्णभूषणे यस्याः सा, अंसे स्कन्धे व्यासक्ता सम्बद्धा या वंशी वेणुः तस्याः ध्वनिभिः शब्दैः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मुखितम् आनन्दितं जगद् यया सा, वल्लवीभिर्गोपाङ्गनाभिः लसन्ती शोभमाना, तासां मध्यवर्तित्वात् नक्षत्रेषु चन्द्र इव राजमाना, गोपाभिः सह क्रीडन्तीति वा, स्रग्वस्य वनमालाऽश्चिता, हारो रम्यो हारो मुक्तामणिमाला यस्याः सा, गोपस्य विष्णोः श्रीकृष्णावतारस्य भगवतो मूर्तिः, नः, अस्मान्, अवतु रक्षतु ।

ह०—यदि मगण, रगण, भगण, नगण और तीन यगण हों, तथा तीन बार सात-सात अक्षरों पर यति हो, तो उसे 'स्रग्धरा' नामक वृत्त कहते हैं ।

भगवान् गोपवेश श्रीकृष्ण की मूर्ति हमारी रक्षा करे। जो नीलकमल के समान सुन्दर है, सुवर्ण लेखा के समान जिस पर पीत वस्त्र विराजित हो रहा है, जिसमें मन्द मुस्कान सुशोभित हो रही है, जिसमें चन्द्रकयुक्त मयूरपिच्छों से बाल बँधे हुए हैं, जिसमें कर्णभूषण सुशोभित हो रहे हैं, जिसने कन्धे पर लटकती हुई वंशी की ध्वनि से संसार को आनन्दित कर रक्खा है, जो गोपियों के बीच में (नक्षत्रों में चन्द्रमा के समान) सुशोभित है, जो वनमाला से विभूषित है और जिसमें मनोरम हार विराज रहा है ॥ १ ॥

न ज भ ज ज ज र

III ISI SII ISI ISI ISI SIS

नजभजजा जरौ यदि तदा गदिता सरसी कवीश्वरैः ॥ २ ॥

(क) चिकुरकलापशैवलकृतप्रमदासु लसद्रसोर्मिषु
स्फुटवदनाम्बुजासु विलसद्भुजबालमृणालवल्लिषु ।
कुचयुगचक्रवाकमिथुनानुगतासु कलाकुतूहलो
व्यरचयदच्युतो व्रजमृगीनयनासरसीषु विभ्रमम् ॥

(ख) तुरगशताकुलस्य परितः परमेकतुरङ्गजन्मनः ।
प्रमथितभूभृतः प्रतिपथं मथितस्य भृशं महीभृता ।
परिचलतो बलानुजबलस्य पुरः सततं धृतश्रियः-
श्चिरगलितश्रियो जलनिधेश्च तदाऽभवदन्तरं महत् ॥

इति माघे (६।८३)।

सिद्धकमिदमन्यत्र ।

प्र०—नजेति । यस्याः पादे यदि नगणजगणभगणजगणजगणाः जगणरगणौ च स्यातां, तदा कवीश्वरैः सरसी इति गदिता ।

(क) चिकुरेति । चिकुरकलापः केशसमूह एव शैवलं तेन कृतः प्रमदो हर्षो याभिस्तासु, रसाः प्रीतय एव रसा जलानि, लसन्त्यः शोभमाना रसोर्मयः रस-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तरङ्गाः यासु तासु, स्फुटानि विकसितानि वदनानि मुखान्येवाम्बुजानि यासु तासु, विलसन्तः शोभमानाः भुजा एव बालमृणालानां नवविसानां वल्लयो लता यासां तासु, कुचयुगान्येव चक्रवाकमिथुनानि चक्रवाकद्वन्द्वानि तैरनुगतासु समन्वितासु, व्रजमृगीनयना व्रजाङ्गना एव सरस्यः सरांसि तासु, कलाकुतूहली क्रीडोत्सुकः अच्युतः कृष्णः, विभ्रमं विलासं, व्यरचयत् चकार।

(ख) उदाहरणान्तरमुपन्यस्यति–तुरगेति। परितः सर्वतः तुरगशतैः अपरिमितारश्वैः आकुलस्य व्याप्तस्य, प्रतिपथं मार्गे मार्गे, प्रमथिताः पराजिताः क्षुण्णाश्च भूभृतो राजानः पर्वताश्च येन, न तु स्वयं केनापि मथितस्येति भाव, सततं निरन्तरं धृता श्रीः कान्तिः कमला च येन तस्य धृतश्रियः, पुरः नगराद् अग्रे वा, परिचलतः प्रतिष्ठमानस्य, बकानुजस्य श्रीकृष्णस्य बलस्य सैन्यस्य, परं केवलम्, एकस्यैव तुरङ्गस्य उच्चैःश्रवस इत्यर्थः, जन्म यस्मात तस्य, महीभृता मन्दराचलेन, भ्रशमतिमात्रं मथितस्य, चिरं चिरकालाद् गलिता विनष्टा श्रीः कान्तिः लक्ष्मीश्च यस्य, लक्ष्म्या हरिणा परिगृहीतत्वात्, तादृशस्य जलनिधेः समुद्रस्य, तदा प्रस्थानकाले, महद् अन्तरं भेदः तारतम्यं च अभवत्। मल्लिनाथेन तु इयं पञ्चकावली उक्ता। तल्लक्षणम्—'नजभजजा जरौ नरपते! कथिता भुवि पञ्चकावली' इति।

हि०—यदि नगण, जगण और भगण के बाद तीन जगण और रगण हों, तो कवीश्वरों ने उस छन्द का नाम 'सरसी' कहा है।

(क) क्रीडोत्सुक श्रीकृष्ण व्रजाङ्गना रूपी सरोवरों में विहार करते थे। जिनमें केश-समूह ही सिवाल थे, अनुराग-रूपी जल लहरें मार रहा था, मुख-रूपी कमल खिल रहे थे, भुज-रूपी नवीन मृणालदण्ड सुशोभित थे और कुचयुग ही चक्रवाक-जोड़े विराज रहे थे।

(ख) उस समय श्रीकृष्ण की सेना तथा समुद्र में महान् अन्तर प्रतीत होता था। क्योंकि सेना में अनेक अश्व मौजूद थे, मार्ग-मार्ग में उसने अनेक राजाओं एवं पर्वतों को पद-दलित कर दिया था और वह सदा शोभा-सम्पन्न थी। परन्तु समुद्र में केवल एक उच्चैःश्रवा नामक अश्व ने जन्म लिया था, मन्दराचल ने उसे पद-दलित किया था और उसकी श्री (लक्ष्मी) चिरकाल से हरी जा चुकी थी॥

(२२) आकृतिः (द्वाविंशत्यक्षरा वृत्तिः)।

म म गग न न न न गग

ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ । । । । । । । । । । । । ऽ ऽ

मौ गौ नाश्चत्वारो गो गो वसुभुवनयतिरिति भवति हंसी॥ १॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

साधं कान्तेनैकान्तेऽसौ विकचकमलमधु सुरभि पिबन्ती
कामक्रीडाकूतस्फीतप्रमदसरसतरमलघु रसन्ती ।
कालिन्दीये पद्मारण्ये पवनपतनपरितरलपरागे
कंसाराते ! पश्य स्वेच्छं सरभसगतिरिह विलसति हंसी ॥

प्र०—मौ गाविति । यस्याः पादे द्वौ मगणौ, द्वौ गुरु, चत्वारो नगणाः ततो द्वौ गुरू च स्यातां, सा हंसी नाम। अत्र वसुभिरष्टभिः भुवनैश्चतुर्दशभिश्च यतिर्भवति ।

सार्धमिति । हे कंसाराते कंसनिषूदन श्रीकृष्ण ! कान्तेन प्रियेण, सार्धं सह एकान्ते निर्जने, कालिन्दीये यमुनासमीपवर्तिनि, पवनपतनेन समीरसञ्चारेण परितरलः चञ्चलः परिच्युत इत्यर्थः, परागः केसरो यत्र तादृशे, पद्मारण्ये कमलवने, सुरभि सुगन्धि, विकचानां प्रस्फुटितानां कमलानां मधु पुष्परसं पिबन्ती, कामक्रीडाकूतेन सुरतेन सुरताभिप्रायेण स्फीतेन प्रवृद्धेन प्रमदेन हर्षेणौत्सुक्येनेत्यर्थः, सरसतरमतिमधुरम् , अलघु उच्चैः, रसन्ती कूजन्ती, सरभसगतिः सानन्दगतिः, असौ हंसी, स्वेच्छम् इच्छाऽनुकूलं, विलसति, क्रीडति, इति पश्य। श्रीकृष्णं प्रति कस्याश्चिद् गोपिकाया उक्तिरियम् ।

रु०—जिसमें क्रमशः दो मगण, दो गुरु, चार नगण और अन्त में दो गुरु हों, उसे 'हंसी' नामक छन्द कहते हैं। इसमें आठ और चौदह पर यति होती है।

हे कृष्ण ! देखो—यह हंसी, अपने प्यारे के साथ एकान्त में यमुनासमीपवर्ति कमलवन में, जहाँ वायु के कारण पराग बिखरा हुआ है, सुगन्धित मकरन्द का पान करती हुई कामक्रीडा के लिए उत्कण्ठित होने के कारण प्रवृद्ध आनन्द द्वारा मधुर और ऊँचे स्वर से शब्द करती हुई, स्वच्छन्द विचर रही है ॥ १ ॥

भ भ भ भ भ भ भ ग
S I I S I I S I I S I I S I I S I I S I I S

सप्तभकारयुतैकगुरुर्गदितेयमुदारतरा मदिरा ॥ २ ॥

माधवमासि विकस्वरकेसर पुष्पलसन्मदिरा मुदितै-
र्भृङ्गकुलैरुपगीतवने वनमालिनमालि ! कलानिलयम् ।
कुञ्जगृहोदरपल्लवकल्पिततल्पमनल्पमनोजरसं
तं भज माधविकामृदुनर्तकयामुनवातकृतोपगमा ॥

प्र०—सप्तेति । सप्तभिर्भगणैः सङ्घटिता अन्ते च एकेन गुरुणाऽक्षरेण युता, उदारतरा अत्युत्कृष्टा, मदिरा नाम कथ्यते ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

माधवेति । हे आलि ! सखि ! माधवमासि वैशाखमासे, विकस्वराणि प्रस्फुटितानि यानि केसरपुष्पाणि बकुलकुसुमानि तेषु लसन्त्या मदिरया मकरन्देन मुदितैर्हृष्टैः, भृङ्गकुलैर्भ्रमरसमूहैः, उपगीतवने गुञ्जितवने, माधविकाया माधवीलताया मृदु मन्दं यथा तथा नर्तकेन कम्पकेन यामुनवातेन यमुनाजलकणवाहिना वायुना कृत उपगमः सान्निध्यं यस्याः तथाभूता त्वं, कुञ्जगृहोदरे लतामन्दिरमध्ये पल्लवैः कल्पितं विरचितं तल्पं शय्या यस्य तथाभूतम्, अनल्पो महान् अत्यधिकः मनोजरसः कामानुरागो यस्य तम्, कलानिलयं नृत्यादिकलाकोविदं, तं वनमालिनं श्रीकृष्णं, भज ।

२०—सात भकार तथा एक गुरु से युक्त छन्द 'मदिरा' कहलाता है ।

हे सखि ! वैशाखमास में विकसित बकुलपुष्प के मकरन्द के पान से आनन्दित भृङ्गों से गुञ्जायमान उपवन में, कला-विशारद अत्यन्त-काम-प्रेमी श्रीकृष्ण का, कुञ्जगृह में पत्रनिर्मित सेज पर सेवन कर । उस समय, माधवी लता को धीरे-धीरे नचानेवाला यमुनातरङ्ग-सङ्गी पवन तेरी सेवा करेगा ॥ २ ॥

अत्र वृत्तरत्नाकरतत्परिशिष्टयोः छन्दांसीमान्यधिकानि दृश्यन्ते—

भ र न र न र न ग

S I I S I S I I I S I S I I I S I S I I I S

भ्रौ नरना रनावथ गुरुर्दिगर्कविरमं हि भद्रकमिदम् ॥ १ ॥

म स र स त ज न ग

S S S I I S S I S I I S S S I I S I I I I S

लालित्यं भुजगेन्द्रेण भाषितमेतच्चेन्मसरस्तजनगुरु ॥ २ ॥

स ज त न स र र ग

I I S I S I S S I I I I I I S S I S S I S S

सजता नसौ ररौ गः फणितुरगहयैः स्यान्महास्रग्धराऽऽख्या ॥३॥

प्र०—भ्राविति । यत्र भगणरगणौ नगणरगणनगणा रगणनगणौ गुरुश्चैकः स्युः, तथा दशभिर्द्वादशभिश्चाक्षरैर्विरामो भवेत्, तद् वृत्तं भद्रकं नाम ॥ १ ॥

लालित्यमिति । यत्र मगणसगणरगणसगणतगणजगणनगणा गुरुश्च भवेयुः, तद् वृत्तं सर्पराजेन लालित्यं नाम कथितम् ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्रजता इति। यस्मिन्वृत्ते मगणरगणभगणा नगणयगणौ रगणद्वयं गुरुश्चैकः स्यात्, अष्टभिः सप्तभिः सप्तमिश्च विरामो जायते, तद् वृत्तं महास्रग्धरानाम ॥ ३ ॥

हि०—जिसमें भगण, रगण, नगण, रगण, नगण, रगण, नगण और एक गुरु हों तथा दस और बारह पर विराम हो, उसको 'भद्रक' वृत्त कहते हैं ॥ १ ॥

जिस वृत्त में भगण, तगण, रगण, सगण, तगण, जगण, नगण और एक गुरु हो, उसको सर्पराज ने 'कालिदय' नामक कहा है ॥ २ ॥

जिस छन्द में सगण, जगण, तगण, नगण, सगण, दो रगण और एक गुरु हो तथा आठ और सात पर विराम हो, वह छन्द 'महास्रग्धरा' नामक कहा जाता है ॥ ३ ॥

(२३) विकृतिः (त्रयोविंशत्यक्षरा वृत्तिः) ।

न ज भ ज भ ज भ ल ग

।।। ।ऽ। ऽ।। ।ऽ। ऽ।। ।ऽ। ऽ।। ।ऽ

नजभजभा जभौ लघुगुरू बुधैस्तु गदितेयमद्रितनया ॥ १ ॥

(क) खरतरशौर्यपावकशिखापतङ्गनिभभग्नदृप्तदनुजो
जलधिसुताविलासवसतिः सतां गतिरशेषमान्यमहिमा ।
भुवनहितावतारचतुरश्चराचरधरोऽवतीर्ण इह हि
क्षितिवलयेऽस्ति कंस! शमनस्तवेति तमवोचदद्रितनया ॥

(ख) विलुलितपुष्परेणुकपिशं प्रशान्तकलिकापलाशकुसुमं
कुसुमनिपातचित्रवसुधं सशब्दनिपतद्द्रुमोत्कशकुनम् ।
शकुननिनादनादितककुब्विलोलविपलायमानहरिणं
हरिणविलोचनाधिवसतिं बभञ्ज पवनात्मजो रिपुवनम् ॥

इति भट्टी । ८ । ३१ ।

अश्वललितमिदमन्यत्र ।

प्र०—नजेति । नगणजगणभगणजगणभगणाः, जगणभगणौ ततः परम् एको लघुर्गुरुश्चैकः स्युः, सा बुधैः विद्वद्भिः, अद्रितनया नाम गदिता उक्ता । अत्र एकादशभिर्द्वादशभिश्च वर्णैर्यतिर्भवति ।

(क) खरतरेति । हे कंस! खरतरम् अतिप्रचण्डं यद् शौर्यं पराक्रमः तदेव पावको वह्निः तस्य शिखया ज्वालया पतङ्गनिभाः शलभतुल्याः, पतङ्गनिभं शलभतुल्यमिति क्रियाविशेषणं वा, भग्ना दग्धा इत्यर्थः, दृप्ता गर्विता दनुजा दानवा येन

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तथोक्तः, जलधिसुतायाः लक्ष्म्याः विलासस्य रत्यादिक्रीडायाः वसतिः आश्रयः, सतां सत्पुरुषाणां गतिरवलम्बनम्, अखिलैः सर्वैः सकलदेवासुरमानवादिभिरित्यर्थः, मान्यः पूज्यो महिमा महत्त्वं यस्य सः, भुवनानां लोकानां हिताय अवतारे अवतरणे देहधारण इत्यर्थः, चतुरः प्रवीणः, धरतीति धरः चराचरस्य स्थावरजङ्गमस्य सकलजगतो धरः धारयिता, पालक इत्यर्थः, श्रीकृष्णः, तव शमनो यमस्वरूपः, शास्तेत्यर्थः, इह क्षितिवलये भूमण्डले, हि निश्चयेन, अवतीर्ण इति, अद्रितनया योगमाया भगवती, तं कंसम् अवोचद् उक्तवती। 'देवकीप्रसूतां बालिकां योगमायां यदा कंसो वधार्थं शिलायां चिक्षेप तदा सा इत्थमुक्त्वा अन्तर्दधे' इति पौराणिकी कथाऽत्रानुसन्धेया।

(ख) उदाहरणान्तरं दर्शयति- विलुलितेति। पवनात्मजो हनूमान्, विलुलितानां मर्दितानां पुष्पाणां रेणुभिः परागैः कपिशं पिङ्गलवर्णम्, प्रशान्तानि विनष्टानि कलिकाः कोरकाः पत्त्राणि पुष्पाणि च यत्र तत्, कुसुमानां निपातेन पतनेन चित्रा विविधवर्णा वसुधा भूमिर्यत्र तत्, सशब्दं यथा तथा निपतद्भिर्द्रुमैः उत्काः स्थानान्तरं गन्तुमुन्मनसः शकुनाः पक्षिणो यत्र तत्, शकुनानां पक्षिणां वनं विहाय गच्छतामित्यर्थः, निनादेन ध्वनिना नादिताः सञ्जातनादाः शब्दायमानीकृता वा ककुभो दिशो यत्र तत्, विलोलाः व्याकुलाः सन्तो विपलायमाना हरिणा मृगा यत्र तत्, हरिणविलोचनायाः मृगाक्ष्याः सीतायाः अधिवसतिं निवासस्थानं, रिपुवनं रावणस्योपवनं बभञ्ज विनाशितवान्।

रु०—यदि नगण, जगण, भगण, जगण, भगण, जगण, भगण, लघु और गुरु हों तो उसको 'अद्रितनया' नामक छन्द कहते हैं।

(क) अद्रितनया योगमाया ने कंस से कहा—हे कंस! इस संसार में तुम्हारा काल अवतीर्ण हो चुका है, जिसने अपने प्रचण्डपराक्रम-रूपी अग्निज्वाला से पतङ्ग के समान अभिमानी दानवों को भस्म कर दिया, जो लक्ष्मी के विलासों का आश्रय और सत्पुरुषों का अवलम्बन है, जिसके गौरव का सब आदर करते हैं, जो लोककल्याण के लिये अवतार ग्रहण करने में प्रवीण और स्थावर-जङ्गम समस्त लोक का धारण करनेवाला है।

(ख) पवन-पुत्र हनूमान ने सीता का निवासस्थान शत्रुवन (अशोकवाटिका) नष्ट कर दिया। उस समय वह (वन) मसले हुए पुष्पों के परागों से पीला हो रहा था, कलियाँ, पत्ते और फूल टूटे-फूटे पड़े थे, फूलों के गिरने से उसकी भूमि रङ्गबिरङ्गी हो रही थी, खड़खड़ाहट के साथ गिरते हुए वृक्षों से पक्षी उड़-उड़ कर इधर-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उधर जा रहे थे, पक्षियों के शब्द के कारण दिशाएँ गूँज सी रही थीं और व्याकुल मृग इधर-उधर भाग रहे थे ॥ १ ॥

म म ग ग ल ग

SSS SSS SS IIIIIIIIIIIIIS II S

मत्ताक्रीडं वसुविष्वाशायति मयुगगयुगमनुलघुगुरुभिः ॥ २ ॥

मुग्धोन्मीलन्मत्ताक्रीडं मधुसमयसुलभमधुररसाद्
गाने याने किञ्चित्स्पन्दत्पदमरुणनयनयुगलसरसिजम् ।
रासोल्लासक्रीडत्कन्दर्पव्रजयुवतिवलयविहितभुजरसं
सान्द्रानन्दं वृन्दारण्ये स्मरत हरिमनघचरणपरिचयम् ॥

प्र०—मत्तेति । मगणद्वयेन गुरुद्वयेन, मनुलघुभिः चतुर्दशभिर्लघुवर्णैः एकेन गुरुणा च यस्य पादः निबद्धो भवेत्, तद् मत्ताक्रीडं नाम वृत्तं स्यात् । अत्र वसुभिरष्टभिः इषुभिः पञ्चभिः आशाभिर्दशभिश्चाक्षरैर्यतिः कर्तव्या ।

मुग्धेति । भक्तान् प्रत्युक्तिरियम् । हे साधवः ! यूयं वृन्दारण्ये वृन्दावने, मुग्धं सुन्दरं यथा स्यात्तथा उन्मीलन्ती प्रादुर्भवन्ती मत्तस्य क्षीबस्येव आक्रीडा विलासो यस्य तम्, मधुसमये वसन्तकाले सुलभं प्राप्यं मधुरं मधुरास्वादं यद् मधु मकरन्दः तस्य रसाद् आस्वादनाद् हेतोः, गाने सङ्गीते, याने गमने च, किञ्चित् स्पन्दत् स्खलत् पदं (गाने) सुप्तिङन्तरूपं (याने) चरणं च यस्य तम्, अरुणं रक्तवर्णं नयनयुगलसरसिजं नेत्रकमलद्वयं यस्य तम्, रासे रासक्रीडासमये उल्लासेन आनन्देन रासोल्लासेन रतिप्रमोदेन वा क्रीडन्तीनां कन्दर्पाणां काममत्तानां व्रजयुवतीनां व्रजाङ्गनानां वलयेषु मण्डलेषु विहितः कृतः भुजरसो भुजालिङ्गनं येन तम्, सान्द्रो गाढः आनन्दो यस्य तम्, नास्ति अघं पाप यस्मात्तथाभूतः चरणपरिचयः पादसेवा यस्य तम्, हरिं कृष्णं, स्मरत ध्यायत ।

रू०—जिसमें दो मगण, दो गुरु, चौदह लघु और एक गुरु हो, उसे मत्ताक्रीडा वृत्त कहते हैं । इसमें आठ, पांच और दश पर यति होती है ।

हे साधुपुरुषों ! वृन्दावन में तुम उन श्रीकृष्ण का ध्यान करो । जिनकी मत्त के समान सुन्दर क्रीडा सुशोभित होती है, वसन्तकाल में सुलभ सुमधुर पुष्परस के पान से गाने और चलने में जिनके पद (वाक्य और चरण) कुछ लड़खड़ा रहे हैं जिनके दोनों नेत्रकमल रक्तवर्ण हो रहे हैं, जो रतिक्रीडा से आनन्दित कामोन्मत्त व्रजयुवतियों के मण्डलों में भुजालिङ्गन कर रहे हैं, जो स्वयं भी अति आनन्दित हो रहे हैं और जिनके चरण की सेवा से पाप दूर भाग जाते हैं ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(२४) संस्कृतिः (चतुर्विंशत्यक्षरावृत्तिः)।

भ त न स भ भ न य

S I I S S I I I I I I S S I I S I I I I I I S S

भूतमुनीनैर्यतिरिह भतनाः स्भौ भयनाश्च यदि भवति तन्वी ॥१॥

माधव ! मुग्धैर्मधुकरविरुतैः कोकिलकूजितमलयसमीरैः

कम्पमुपेता मलयजसलिलैः प्लावनतोऽप्यविगततनुदाहा।

पद्मपलाशैर्विरचितशयना देहजसंज्वरभरपरिदूनै-

र्निश्वसती सा मुहुरतिपरुषं ध्यानलये तव निवसति तन्वी ॥

प्र०—भूतेति। यदि भगणतगणनगणाः, सगणभगणौ, भगणनगणयगणाश्च स्युः तदा तन्वीनाम छन्दो भवति। इह अस्मिन् छन्दसि, भूतैः पञ्चभिः मुनिभिः सप्तभिः इनैः सूर्यैर्द्वादशभिश्च यतिर्बोध्या।

माधवेति। हे माधव ! कृष्ण ! मुग्धैः श्रुतिरमणीयैः, मधुकराणां भ्रमराणां विरुतैर्गुञ्जनैः कोकिलानां पिकानां कूजितैः ध्वनिभिः मलयसमीरैः दक्षिणानिलैश्च, कम्पमुपेता वेपथुमती, मलयजसलिलैः चन्दनरसैः, प्लावनतोऽपि सेचनादपि, अविगतः अशान्तः तनोः शरीरस्य दाहः सन्तापो यस्याः तथाभूता, देहजः शारीरिको यः संज्वरभरः सन्तापतिशयः तेन परिदूनैः परिम्लानैः शुष्कैरित्यर्थः, पद्मपलाशैः कमलपत्रैः, विरचितं क्लृप्तं शयनं शय्याः यस्याः तथाभूता, तन्वी क्षीणा, सा राधा, अतिपरुषम् अतिरूक्षं, मुहुः पुनः पुनः, निश्वसती दीर्घोष्णश्वासान् परिगृह्णती, तव ध्यानलये चिन्तनरूपे, योगे, निवसति। सा कृशाङ्गी त्वामेव सततं चिन्तयतीत्यर्थः।

हि०—यदि क्रमशः भगण, तगण, नगण, सगण, भगण, भगण, नगण और यगण, हों तो उस छन्द का नाम 'तन्वी' होता है। इसमें पाँच, सात और बारह पर यति होती है।

हे कृष्ण ! श्रुतिमनोहर भ्रमरों के गुञ्जन, कोकिलों की ध्वनि और मलयपवन से काँपती हुई राधा बार-बार लम्बे श्वास लेकर तुम्हारे ध्यानरूपी योग में लगी हुई है। तुम्हारे वियोग से उसकी शरीरज्वाला चन्दनरस से सराबोर कर देने पर भी शान्त नहीं होती। जिन पद्मपत्रों पर उसकी शय्या बनाई जाती है, वे उसके शरीर ताप से क्षणभर में झुलस जाते हैं॥ १॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(२५) अतिकृतिः (पञ्चविंशत्यक्षरा वृत्तिः)।

भ भ स भ ल ग

S।। S S S ।।S S।। ।।।।।।।।।।।। S

क्रौञ्चपदा स्याद् भो मसभाश्चेदिषुशरवसुमुनियतिरिनलघुगैः ॥ १ ॥

क्रौञ्चपदाली चित्रिततीरा मदकलखगकुलकलरुचिरा
फुल्लसरोजश्रेणिविलासा मधुमुदितमधुपरवरभसकरी।
फेनविलासप्रोज्ज्वलहासा ललितलहरिभरपुलकिततनुः
पश्य हरेऽसौ कस्य न चेतो हरति तरलगतिरहिमकिरणजा ॥

प्र०—क्रौञ्चेति। यदि भगणौ मगणसगणभगणाश्च स्युः, एभिः सूर्यैर्द्वादशभिर्लघुभिः तत एकेन गुरुणा च योगः स्यात, तर्हि तच्छन्दः क्रौञ्चपदानाम स्यात्। अस्मिंश्छन्दसि इषुभिः पञ्चभिः शरैः पञ्चभिः वसुभिरष्टभिः मुनिभिः सप्तभिश्च यतिर्भवति।

क्रौञ्चपदेति। क्रौञ्चानां पक्षिविशेषाणां पदालीभिः पदपङ्क्तिभिः चित्रितं चिह्नितं तीरं यस्याः सा, यद्वा, क्रौञ्चपदानाम् आलिभिः राजिभिरिति व्याख्येयम्, मदकलानां मदोन्मत्तानां खगानां पक्षिणां कुलस्य समूहस्य कलकलेन कोलाहलरवेण रुचिरा मनोज्ञा, फुल्लानां विकसितानां सरोजानां कमलानां श्रेण्या विलासः शोभा यस्याः तथोक्ता, मधुना पुष्परसेन तत्पानेनेत्यर्थः, मुदितानां हृष्टानां मधुपानां भ्रमराणां रवेण गुञ्जितेन रभसकरी हर्षोत्पादिनी, फेनानां डिण्डीराणां विलासः स्फुरणमेव प्रोज्ज्वलः उद्दीप्तो हासो यस्याः सा, ललितेन मनोरमेण लहरिभरेण तरङ्गसन्तानेन पुलकिता रोमाञ्चिता सुशोभना तनुर्यस्याः सा, रिङ्गतरङ्गभङ्गाकुलेत्यर्थः, तरलगतिः चञ्चलगतिः, असौ अहिमकिरणजा सूर्यपुत्री यमुना, कस्य चेतः चित्तं, न हरति नाकर्षति। हे हरे! कृष्ण! अत्र 'पश्य मृगो धावती'तिवद् वाक्यार्थस्य कर्मता।

रू०—यदि क्रमशः भगण, मगण, सगण, भगण, बारह लघु और अन्त में एक गुरु हो तो उसको 'क्रौञ्चपदा' नामक छन्द कहते हैं। इसमें 'पाँच, पाँच, आठ और सात पर यति होती है।

हे कृष्ण! देखो, यह यमुना किसका मन अपनी ओर आकृष्ट नहीं करती? तीर क्रौञ्चपक्षियों के पदचिह्नों से चित्रित हो रहे हैं। यह मद-मत्त पक्षिवृन्द के कोलाहल से शोभायमान है। यहाँ विकसित कमल अपनी छटा दिखा रहे हैं। यह

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मकरन्दपान से आनन्दित भ्रमरों के रव से आनन्ददायिनी हो रही है। उठते हुए फेनों द्वारा मानों यह हँस रही है। मनोहर तरङ्गों द्वारा इसका शरीर मानों पुलकित हो रहा है और इसकी चाल बड़ी चञ्चल है ॥ १ ॥

(२६) उत्कृतिः (षड्विंशत्यक्षरा वृत्तिः)।

म म त न न न र स लग

S S S S S S S S I I I I I I I I I I S I S I I S I S

वस्वीशाश्वैश्छेदोपेतं ममतनयुगनरसलगैर्भुजङ्गविजृम्भितम् ॥ १ ॥

हेलोदञ्चन्न्यञ्चत्पादप्रकटविकटनटनभरो रणत्करतालकः

श्चारुप्रेङ्खच्चूडाबर्हः श्रुतितरलनवकिसलयस्तरङ्गितहारधृक्।

त्रस्यन्नागस्त्रीभिर्भक्त्या मुकुलितकरकमलयुगं कृतस्तुतिरच्युतः

पायाच्छिन्दन् कालिन्दीहृदकृतनिजवसतिबृहद्भुजङ्गविजृम्भितम् ॥

प्र०—वस्वीशाश्वैरिति। ममतनयुगनरसलगैः मगणमगणतगणनगणनगणनगणरगणसगणलघुगुरुभिरित्यर्थः, एतै रचितमिति यावत्, यत्, तत् छन्दः भुजङ्गविजृम्भितं नाम। वसुभिरष्टभिः ईशैरेकादशभिः अश्वैः सप्तभिश्च छेदेन यत्या उपेतं युक्तमित्यर्थः।

हेलेति। हेलया लीलया उदञ्चन्तौ उद्गच्छन्तौ न्यञ्चन्तौ अधः पतन्तौ पादौ चरणौ यस्मिन् स तथोक्तः प्रकटः प्रस्फुटः विकटः उद्धतो विलक्षणो वा नटनभरः नाट्यविलासो यस्य सः, रणत् सशब्दं करतालकं यस्य सः, चारु रमणीयं यथा स्यात्तथा प्रेङ्खन् चञ्चलः चूडाबर्हो मौलिस्थितमयूरपिच्छकं यस्य सः, श्रुत्योः कर्णयोः तरलं चञ्चलं नवकिसलयं नूतनपल्लवम् अवतंसीकृतमित्यर्थः, यस्य सः, नर्तनवशात् तरङ्गितः गतागते कुर्वन् यो हारस्तं धरतीति तरङ्गितहारधृक्, त्रस्यन्तीभिः भीताभिः नागस्त्रीभिः कालियसर्पपत्नीभिः, भक्त्या प्रह्वीभावेन, मुकुलितं करकमलयोर्युगं यस्मिन् तत् कृताञ्जलिपुटमित्यर्थः, कृता स्तुतिर्यस्य सः, अच्युतः श्रीकृष्णः, कालिन्दीहृदे कृता निजवसतिः, स्वकीयनिवासो येन तादृशो यो बृहद्भुजङ्गो महासर्पः कालियनागः तस्य विजृम्भितं चेष्टितं, छिन्दन् विनाशयन् सन्, नः अस्मान्, पायाद् रक्षेत्।

हि०—जिसमें क्रमशः दो मगण, एक तगण, तीन नगण, एक रगण, एक सगण, एक लघु तथा एक गुरु हों, उस छन्द को 'भुजङ्गविजृम्भित' कहते हैं। इसमें आठ ग्यारह और सात पर यति होती है।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीकृष्ण भगवान् हमारी रक्षा करें। जो अनायास ही पैर उठाते और नीचे रखते हुए स्पष्ट और विलक्षण नृत्य करते हैं और जो करताल लगा रहे हैं, जिनका मयूर-पिच्छ सुन्दरता के साथ हिल रहा है, जिन्होंने कानों में नवीन पत्ते (भूषण-रूप से) धारण किये हैं, जिनका हार (नर्तन के कारण) हिल रहा है, भय-भीत सर्प स्त्रियाँ भक्तिपूर्वक हाथ जोड जिनकी स्तुति कर रही हैं और जिन्होंने यमुना-ह्रद-निवासी महासर्प कालिय नाग की सब चेष्टायें व्यर्थ कर दीं ॥ १ ॥

अत्र वृत्तरत्नाकरेऽदश्छन्दोऽधिकं दृश्यते—

म न न न न न न स गग

ऽऽऽ ।।। ।।। ।।। ।।। ।।। ।।। ।।ऽ ऽऽ

मो नाः षट् सगगिति यदि नवरसरसशरयतियुतमपवाहाख्यम् ॥१॥

प्र०—यदि मगणः, षट्सङ्ख्याका नगणाः, सगणो गुरुद्वयं च भवेत्, नवभिः षड्भिः षड्भिः पञ्चभिर्विरामश्च स्यात्, तर्हि अपवाहनामकं वृत्तं भवति ॥ १ ॥

रू०—यदि मगण, छः नगण, सगण और दो गुरु हों तथा नौ छः छः और पांच अक्षरों पर यति हो, तो 'अपवाह' नामक छन्द होता है ॥ १ ॥

अथ दण्डकाः

न न र र र र र र र

।।। ।।। ऽ।ऽ ऽ।ऽ ऽ।ऽ ऽ।ऽ ऽ।ऽ ऽ।ऽ ऽ।ऽ

यदिह नयुगलं ततः सप्त रेफास्तदा चण्डवृष्टिप्रपातो भवेद्दण्डकः ॥१॥

प्रलयघनघटामहारम्भमेघावलीचण्डवृष्टिप्रपाताकुलं गोकुलं
सपदि समवलोक्य सव्येन हस्तेन गोवर्धनं नाम शैलं दधल्लीलया।
कमलनयन! रक्ष रक्षेति जल्पत्प्रसन्मुग्धगोपाङ्गनाऽऽलिङ्गनानन्दितो
गलदभिनवधातुधाराविचित्राङ्गरागो मुरारातिरस्तु प्रमोदाय नः ॥

प्र०—यदिहेति। यद् यदा, इह दण्डकजातौ, नयुगलं नगणद्वयं ततः सप्त रेफाः सप्त रगणाः स्युः तदा चण्डवृष्टिप्रपातो नाम दण्डको भवति।

प्रलयेति। गोकुलं, प्रलये प्रलयकाले घनघटानां मेघवृन्दानामिव महान् आरम्भो यस्याः तादृश्या मेघावल्याः चण्डवृष्टिप्रपातेन तुमुलवर्षणधारया आकुलं भीतं समवलोक्य दृष्ट्वा, सपदि सद्यः लीलया अनायासेन, सव्येन वामेन हस्तेन, गोवर्धनं नाम शैलं पर्वतं, दधत् धारयन्, गलन्तीभिरुपरि पतन्तीभिः अभिनवाभि-र्नूतनाभिर्धातूनां मनःशिलाऽऽदीनां धाराभिर्विचित्रो नानावर्णः अङ्गानां रागो यस्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सः, विचित्रोऽङ्गरागो विलेपद्रव्यं वा यस्य सः, 'हे कमलनयन ! पद्मपत्राक्ष ! 'रक्ष रक्षे'ति जल्पन्तीनां वदन्तीनां, त्रसन्तीनां भयभीतानां, मुग्धानां सुन्दरीणां गोपाङ्गनानां गोपवधूनाम् , आलिङ्गनेन आनन्दितो हर्षितः, मुरारातिः श्रीकृष्णः, नोऽस्माकं, प्रमोदाय हर्षाय अस्तु वर्तताम् ।

हि०—यदि दो नगण के अनन्तर सात रगण हों, तो उसे 'चण्डवृष्टिप्रपात' नामक दण्डक कहते हैं।

गोकुल को, प्रलयकालीन मेघ-वृन्द के समान आडम्बरवाली मेघश्रेणियों की तीव्र वर्षा से व्याकुल देखकर, अनायास ही बायें हाथ से गोवर्धन नामक पर्वत धारण करते हुए, मैनसिल आदि धातुओं की गिरती हुई नवीन धाराओं द्वारा जिनका विचित्र अङ्गराग बना हुआ है और 'हे कमलनेत्र ! रक्षा करो, रक्षा करो' ऐसा कहती हुई भय-भीत गोपाङ्गनाओं के आलिङ्गन से आनन्दित श्रीकृष्ण हमारे लिए आनन्द-दायक हों ॥ १ ॥

प्रतिचरणविवृद्धरेफाः स्युरर्णोऽर्णव-
व्यालजीमूतलीलाकरोद्दामशङ्खादयः ॥ २ ॥

जय जय जगदीश ! विष्णो ! हरे राम ! दामोदर ! श्रीनिवासाच्युतानन्त ! नारायण ! त्रिदशगणगुरो ! मुरारे ! मुकुन्दासुरारे ! हृषीकेश ! पीताम्बर ! श्रीपते ! माधव ! गरुडगमन ! कृष्ण ! वैकुण्ठ ! गोविन्द ! विश्वम्भरोपेन्द्र ! चक्रायुधाधोक्षज ! श्रीनिधे ! बलिदमन ! नृसिंह ! शौरे ! भवाम्भोधिघोरार्णसि त्वं निमज्जन्तमभ्युद्धरोपेत्य माम् ॥

एवमर्णवादीनामप्युदाहरणानि बोध्यानि ।

प्र०—प्रतिचरणेति । चरणे चरणे इति प्रतिचरणं प्रतिपादमित्यर्थः, विवृद्धो रेफो रगणो यत्र ते दण्डकाः अर्णोऽर्णवादयः स्युः । सर्वेषु दण्डकेषु आदौ नगणद्वयमावश्यकम् , ततः परं सप्तसु रेफेषु चण्डवृष्टिप्रपातो नाम दण्डकः । एकरेफ विवृद्धौ अर्थात् नगणद्वयानन्तरमष्टसु रेफेषु अर्णोनामा दण्डकोऽयम् । एवं नगणद्वयानन्तरं नवसु रेफेषु अर्णवः, दशसु व्यालः, एकादशसु जीमूतः, द्वादशसु लीलाकारः, त्रयोदशसु उद्दामः, चतुर्दशसु शङ्खः दण्डको भवति । आदिपदेन आरामसङ्ग्रामादयो दण्डका ज्ञेयाः ।

जयेति । हे जगदीश ! विष्णो ! त्वं, जय जय सर्वोत्कर्षेण वर्तस्व, हे शौरे ! त्वमुपेत्य समीपमागत्य, भवः संसार एव अम्भोधिः समुद्रः तस्य घोरे भीषणेऽर्णसि जले, निमज्जन्तम् ब्रुडन्तं माम् , अभ्युद्धर ततो निष्कासय । संसारार्णवान्मामुद्धारयेत्यर्थः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रु०—सब दण्डकों के आरम्भ में दो नगणों का होना आवश्यक है, उन दो नगणों के अनन्तर सात से अधिक एक एक रगण बढ़ाते जाय तो अर्ण, अर्णव, व्याल, जीमूत, लीलाकर, उद्दाम, शङ्ख—आदि अनेक दण्डक बन जाते हैं। अर्थात् आदि में दो नगण और आठ रगण हों तो 'अर्ण', नौ रगण हों तो 'अर्णव', दश रगण हों तो 'व्याल', ग्यारह रगण हों तो 'जीमूत', बारह हों तो 'लीलाकर', तेरह हों तो 'उद्दाम' और चौदह हों तो 'शङ्ख' नामक दण्डक होता है। आदि पद से 'आराम' 'संग्राम'—आदि दण्डक जानना।

हे जगदीश, विष्णो! तुम्हारी विजय हो, हे शौरे! तुम पास आकर संसाररूपी समुद्र के घोर जल में डूबते हुए मेरा उद्धार करो ॥ २ ॥

न न य य य य य य य

। । । । । । ।ऽऽ ।ऽऽ ।ऽऽ ।ऽऽ ।ऽऽ ।ऽऽ ।ऽऽ

प्रचितकसमभिधो धीरधीभिः स्मृतो दण्डको नद्वयादुत्तरैः सप्तभिर्यैः ॥

मुरहर! यदुकुलाम्भोधिचन्द्र! प्रभो! देवकीगर्भरत्न! त्रिलोकैकनाथ!
प्रचितकपटसुरारिव्रजोद्दामदन्तावलस्तोमविद्रावणे केसरीन्द्र!
चरणनखरसुधांशुच्छटोन्मेषनिःशेषितध्यायिचेतोनिविष्टान्धकार!
प्रणतजनपरितापोग्रदावानलोच्छेदमेघ! प्रसीद प्रसीद प्रसीद ॥

प्र०—प्रचितकेति। नगणद्वयात् परिवर्तिभिः सप्तभिः यगणैः रचितः, धीरधीभिः छन्दोविद्भिः, प्रचितकसमभिधस्तन्नामा दण्डकः, स्मृतः कथितः।

मुरहरेति। हे मुरहर! मुराख्यदैत्यहन्तः! यदुकुलं यदुवंश एव अम्भोधिः सागरः तस्य चन्द्र, आनन्ददायकत्वात् तत्सम्बोधने हे यदुकुलाम्भोधिचन्द्र! हे प्रभो! हे देवकीगर्भरत्न! हे त्रिलोकैकनाथ! लोकत्रयस्वामिन्! प्रचितः प्रवृद्धः कपटः छलं यस्य तथाभूतो यः सुरारिव्रजो दानवसमूहः स एव उद्दामो निरर्गलः दन्तावलस्तोमः हस्तिसमूहः तस्य विद्रावणे विनाशे, केसरीन्द्र! सिंहश्रेष्ठ! चरणनखररूपा ये सुधांशवश्चन्द्राः तेषां छटोन्मेषेण ज्योत्स्नाप्रकाशेन निःशेषितः समाप्तिं नीतः ध्यायिनां ध्यानवतां भक्तानां चेतोनिविष्टः चित्तस्थितोऽन्धकारोऽज्ञानं येन सः तत्सम्बोधनम्, प्रणतजनानां भक्तानां यः परितापः खेदः स एव उग्रः प्रचण्डः दावानलो वनाग्निः तस्य उच्छेदे निवारणे मेघस्वरूप! प्रसीद, प्रसीद, प्रसीद, अस्मान् प्रतीति शेषः।

रु०—यदि दो नगण के अनन्तर सात यगण हों तो विद्वान् लोग उसे 'प्रचितक' नामक दण्डक कहते हैं।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हे दैत्यहन्तः! यदुकुल-रूपी समुद्र के चन्द्र! प्रभो! देवकी के गर्भ के रत्न-स्वरूप! तीनों लोगों के अधिपति! महा कपटी-दानवेन्द्र-रूपी उद्दण्ड हस्तियों के लिए केसरीन्द्र! अपने चरणनख-रूपी अमृत-किरणों के प्रकाश से भक्तों के हृदयान्धकार का विनाश करने वाले तथा भक्तजनों के सन्ताप-रूपी प्रचण्ड दावानल का निर्वाण करने में मेघस्वरूप भगवन्! प्रसन्न होइये, प्रसन्न होइये, प्रसन्न होइये ॥ ३ ॥

स स स स स स स स स

।।ऽ ।।ऽ ।।ऽ ।।ऽ ।।ऽ ।।ऽ ।।ऽ ।।ऽ ।।ऽ

सगणः सकलः खलु यत्र भवेत्तमिह प्रवदन्ति बुधाः कुसुमस्तवकम् ॥४॥

विरराज यदीयकरः कनकद्युतिबन्धुरवामदृशः कुचकुड्मलगो
भ्रमरप्रकरेण यथाऽऽवृतमूर्तिरशोकलताविलसत्कुसुमस्तवकः।
स नवीनतमालदलप्रतिमच्छवि बिभ्रदतीव विलोचनहारि वपु-
श्चपलारुचिरांशुकवल्लिधरो हरिरस्तु मदीयहृदम्बुजमध्यगतः ॥

प्र०—सगण इति। यत्र यस्मिन् छन्दसि पादे वा, सकलः समस्तः, सगण एव भवेत्, अर्थाद् यस्य सप्तविंशत्यक्षरघटितपादस्य दण्डकस्य सर्वोऽपि पादः सगणेनैव घटितः स्यात्, बुधाः विद्वांसः, तं कुसुमस्तवकं नाम दण्डकं प्रवदन्ति।

विरराजेति। यदीयकरः यदीयहस्तः, कनकद्युतिवत् स्वर्णकान्तिवद् बन्धुरा मनोहारिणी या वामदृक् ललना तस्याः, कुचकुड्मले स्तनकोरके गच्छति तिष्ठतीति कुचकुड्मलगः कुड्मलाकारकुचोपरि स्थित इत्यर्थः, भ्रमरप्रकरेण मिलिन्दवृन्देन, आवृता आच्छादिता मूर्तिः स्वरूपं यस्य तथाभूतः, अशोकलतायाः विलसन् शोभमानः कुसुमस्तवकः पुष्पगुच्छः, यथा इव, विरराज, शुशुभे, नवीनमचिरोद्गतं यत् तमालदलं तमालपत्रं तत्प्रतिमा तत्तुल्या छविः कान्तिर्यस्य तादृशम्, अतीव अत्यन्तम्, विलोचनहारि नेत्राकर्षकं, वपुः शरीरं, बिभ्रद् धारयन्, चपलावद् विद्युदिव रुचिरा मनोज्ञा या अंशुकवल्लिः उत्तरीयवसनलता तां धरतीति तथाभूतः, स हरिः, मदीयं हृदयमेव अम्बुजं कमलं तस्य मध्यगतः तत्र सन्निहितः, अस्तु वर्तताम् ॥

रु०—जिस 'दण्डक' का सम्पूर्ण पाद सगणों से ही निर्मित हो, उसे 'कुसुमस्तवक' नामक दण्डक कहते हैं।

जिस कृष्ण भगवान् का हाथ स्वर्णसमान गौरवर्ण व्रजाङ्गना के कुचकुड्मल पर स्थित हुआ, भ्रमरवृन्द से आच्छादित, शोभायमान अशोकलता के पुष्पगुच्छ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सदृश, सुशोभित होता है, नवीन तमालपत्र के समान कान्तियुक्त, नेत्रानन्दकारक शरीर धारण करनेवाले वे हरि, विद्युत् समान मनोहर उत्तरीय वस्त्र धारण किये हुए, मेरे हृदयरूपी कमल में स्थित हों ॥ ४ ॥

र र र र र
SIS SIS SIS SIS SIS
यत्र रेफः परं स्वेच्छया गुम्फितः स स्मृतो
र र र र
SIS SIS SIS SIS
दण्डको मत्तमातङ्गलीलाकरः ॥ ५ ॥

हेमगौरं वसानोंऽशुकं शक्रनीलासिते वर्ष्मणि स्पष्टदिव्यानुलेपाङ्किते
तारहारांशुवक्षोनभश्चित्रमालाऽञ्चितो भव्यभूषोज्ज्वलाङ्गः समं सीरिणा ।
अञ्जनाभाम्बरेणेन्दुकुन्दाभदेहेन लीलापरीहासहासोर्मिकौतूहलैः
कंसरङ्गाद्रिगः पातु नश्चक्रपाणिर्गतिक्रीडया मत्तमातङ्गलीलाकरः ॥

प्र०—यत्रेति । यत्र दण्डके प्रतिपादं स्वेच्छया परं केवलं, रेफो रगणः, गुम्फितो निबद्धः स्यात् , स मत्तमातङ्गलीलाकरो नाम दण्डको भवेत् ।

हेमेति । शक्रनीलासिते इन्द्रनीलमणिवत् श्यामवर्णे, स्पष्टः, सुप्रकटः दिव्योऽलौकिकः योऽनुलेपोऽङ्गरागस्तेनाङ्किते, चिह्निते, वर्ष्मणि देहे, हेमगौरं काञ्चनाभम् , अंशुकं वसनं पीताम्बरमित्यर्थः वसानो धारयन् , तारोऽत्युच्चो यो हारस्तस्यांशवो यत्र तादृशं वक्ष एव नभ आकाशं तस्मिन् चित्रमालया विविधवर्णमालया अञ्चितोऽलङ्कृतः, भव्या रमणीया या भूषाऽलङ्कारस्तया उज्ज्वलं रम्यमङ्गं यस्य सः, अञ्जनाभं कज्जलाभं नीलमित्यर्थः, अम्बरं वस्त्रं यस्य तेन नीलाम्बरेणेत्यर्थः, इन्दुश्चन्द्रः कुन्दं माघ्यं पुष्पं तदाभः तत्समवर्णो देहः शरीरं यस्य तेन, सीरिणा बलरामेण, समं सह, लीलाविलासः परिहासो नर्मवचनं हासो हास्यं तेषामूर्मिभिः परम्पराभिः कौतूहलैश्चोपलक्षितः, कंसस्य रङ्गो युद्धभूमिरेव अद्रिः पर्वतः तत्र गच्छतीति तथोक्तः गतिक्रीडया गमनविलासेन हेतुना, मत्तस्य मदोन्मत्तस्य मातङ्गस्य करिणो लीलां विलासं करोतीति तथोक्तः, चक्रपाणिः सुदर्शनहस्तो विष्णुः, नोऽस्मान् पातु रक्षतु ।

स०—जिसमें रगण इच्छानुकूल रक्खेगये हों, उसे 'मत्तमातङ्गलीलाकर' नामक दण्डक होते हैं ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इन्द्रनील के समान श्यामवर्ण, अलौकिक अङ्गराग से विभूषित शरीर पर हेम गौर वस्त्र धारण किये हुए, लम्बे हार की किरणों से सुशोभित वक्षःस्थल-रूपी आकाश में विविधवर्ण की मालाओं द्वारा विभूषित, सुन्दर भूषणों से अलङ्कृत और अपनी सुन्दर चाल द्वारा मत्त हाथी की लीला करनेवाले चक्रपाणि विष्णु, कंस की रणभूमि-रूपी पर्वत पर स्थित, नीलाम्बरधारी तथा चन्द्रमा और कुन्द पुष्प के समान कान्तियुत देहधारी बलराम के साथ हास-परिहास करते हुए हमारी रक्षा करें ॥ ५ ॥

I S I S I S I S I S I S I S I S I S I S I S I S I S I S

लघुर्गुरुर्निजेच्छया यदा निवेश्यते तदैष दण्डको भवत्यनङ्गशेखरः ॥६॥

उदेत्यसौ सुधाकरः पुरो विलोकयाद्य राधिके ! विजृम्भमाणगौरदीधिती-
रतिस्वहस्तनिर्मितः कलाकुतूहलेन चारुचम्पकैरनङ्गशेखरः किमु ? ।
इति प्रमोदकारिणीं प्रियाप्रसादलक्षणां गिरं समुद्गिरन्मुरारिरद्भुतां
प्रदोषकालसङ्गमोल्लसन्मना मनोजकेलिकौतुको करोतु नः कृतार्थताम् ॥

प्र०—लघुरिति । यदा निजेच्छया प्रथमं लघुस्ततो गुरुर्वर्णः क्रमेण निवेश्यते स्थाप्यते, तदा एषः अनङ्गशेखरो नाम दण्डको भवेत् ।

उदेत्यसाविति । हे राधिके ! अद्य इदानीं, पुरः सम्मुखे पूर्वस्यां दिशि वा, विजृम्भमाणाः समुल्लसन्त्यो गौरवर्णा दीधितयः किरणा यस्य तथोक्तः, असौ सुधाकरः चन्द्रः, उदेति, इति विलोकय पश्य । असौ पुरो दृश्यमानश्चन्द्रः, कलाकुतूहलेन निर्माणशिल्पकौतुकेन हेतुना, चारुचम्पकैः मनोहरचम्पकपुष्पैः करणभूतैः, रत्या कामपत्न्या स्वहस्तेन निर्मितः रचितः, अनङ्गस्य कामदेवस्य शेखरः शिरोभूषणं किमु ? इति प्रमोदकारिणीं हर्षप्रदां, प्रियाया राधिकायाः प्रसादः प्रसन्नता तल्लक्षणाम्, अद्भुतां विचित्रां, गिरं वाचं, समुद्गिरन् कथयन्, मनोजस्य कामस्य या केलिः क्रीडा तत्र कौतुकी उत्सुकः, रन्तुं समुत्सुक इत्यर्थः, प्रदोषकाले रजनीप्रारम्भे यः सङ्गमः सुरतं तस्मिन् उल्लसद् आसक्तं मनो यस्य तथाभूतः, मुरारिः श्रीकृष्णः, वो युष्माकं, कृतार्थतां कृतकृत्यतां करोतु ।

सं०—जिस 'दण्डक' में अपनी इच्छा से लघु गुरु वर्ण निविष्ट किये जावें, उसे 'अनङ्गशेखर' नामक दण्डक कहते हैं ।

'हे राधे ! सामने देखो, यह चन्द्रमा उदित हो रहा है । इसकी शुभ्र किरणें चारों ओर फैल रही हैं । क्या यह अपनी निर्माण-चातुरी दिखाने के लिए रति ने

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अपने हाथ से सुन्दर चम्पक पुष्पों से काम का शिरो-भूषण बनाया है ?' इस प्रकार प्रिया को प्रसन्न करनेवाली अद्भुत वाणी कहते हुए श्रीकृष्ण उन्हें कृतार्थ करें जिनका मन प्रदोषकाल में सङ्गम के लिए उत्कण्ठित हो रहा है और जो काम क्रीडा के लिये उत्सुक हैं ॥ ६ ॥

S I S I S I S I S I S I S I S I S I S I S I S I S I S I S I S I

यत्र दृश्यते गुरोः परो लघुः क्रमात्स उच्यते बुधैरशोकपुष्पमञ्जरीति ॥७॥

मूर्ध्नि चारुचम्पकस्रजा सलीलवेष्टनं लसल्लवङ्गचारुचन्द्रिका कचेषु
कर्णयोरशोकपुष्पमञ्जरीवतंसको गले च कान्तकेसरोपक्लृप्तदाम ।
फुल्लनागकेसरादिपुष्परेणुरूषणं तनौ विचित्रमित्युपात्तवेश एष
केशवः पुनातु नः सुपुष्पभूषितः सुमूर्तिमानिवागतो मधुर्विहर्तुमत्र ॥

प्र०—यत्रेति । यत्र यस्मिन् दण्डके, क्रमाद् गुरोः परो लघुर्वर्णो दृश्यते, स बुधैः छन्दोविद्भिः, अशोकपुष्पमञ्जरी नाम दण्डकः कथ्यते ।

मूर्ध्नीति । मूर्ध्नि शिरसि चारुः मनोहरा या चम्पकस्रक् चम्पकपुष्पदाम तया सलीलं सविलासं वेष्टनं बन्धनम्, कचेषु केशेषु, लसन्ति शोभमानानि लवङ्गानि लवङ्गकुसुमानि चारुचन्द्रिका मनोहरमल्लिकाकुसुमं च, कर्णयोः अशोकपुष्पमञ्जरीवतंसकः अशोकपुष्पमञ्जरीकृतभूषणं, गले कण्ठे, कान्तं मनोहरं केसरोपक्लृप्तं बकुलपुष्पविरचितं दाम माल्यं, तनौ शरीरे, फुल्लानां विकसितानां नागकेसरादिपुष्पाणां रेणुभिः परागैः रूषणं रञ्जनम्, इति एवम्प्रकारेण, विचित्रमद्भुतं यथा स्यात्तथा उपात्तो गृहीतो धृत इति यावत्, वेशो येन तथाभूतः, सुपुष्पैः शोभनकुसुमैर्भूषितोऽलङ्कृतः, अत्र कानने, विहर्तुमागतः मूर्तिमान् शरीरी, वसन्त इव प्रतीयमानः केशवः, नोऽस्मान्, पातु रक्षतु ।

रु०—जिस 'दण्डक' में क्रमशः गुरुवर्ण के पश्चात् लघु वर्ण दिखाई पड़ें, उसे 'अनङ्गशेखर' नामक दण्डक कहते हैं ।

मस्तक पर सुन्दर चम्पकमाला का वेष्टन, केशों में सुन्दर लवङ्ग और मल्लिका के पुष्प, कानों में अशोकमञ्जरी का भूषण, गले में सुन्दर बकुल पुष्पों की माला और शरीर में खिले हुए नागकेसर-आदि-पुष्प-पराग से लेपन, इस प्रकार विचित्र वेश धारण किये हुए, अत एव इस कानन में विहार करनेके लिए आये हुए, सुन्दर पुष्पों से विभूषित देह-धारी वसन्त-सरीखे श्रीकृष्ण हमारी रक्षा करें ॥ ७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अत्रैते दण्डकाः पुस्तकान्तरेष्वधिका दृश्यन्ते—

य य य य य

ISS ISS ISS ISS ISS

यकारैः कवीच्छाऽनुरोधान्निबद्धैः प्रसिद्धो

य य य य य

ISS ISS ISS ISS ISS

विशुद्धोऽपरो दण्डकः सिंहविक्रान्तनामा ॥ १ ॥

र ज र ज र ज

SIS ISI SIS ISI SIS ISI

स्वेच्छया रजौ क्रमेण सन्निवेशयत्युदारधीः क-

र ज र ज र

SIS ISI SIS ISI SIS

विः स दण्डकः स्मृतो जगत्यशोकमञ्जरी ॥ २ ॥

र र र र र र र

SIS SIS SIS SIS SIS SIS SIS

यत्र रेफान् कविः स्वेच्छया पाठसौकर्यसापेक्षया रोपय-

र र र र र र

SIS SIS SIS SIS SIS SIS

त्येष धीरैः स्मृतो दण्डको मत्तमात्तङ्गलीलाकरः ॥ ३ ॥

इति छन्दोमञ्जर्यां समवृत्ताख्यो द्वितीयः स्तबकः ।

प्र०—यकारैरिति । कवेरिच्छाऽनुसारं स्थापितैर्यगणैः सिंहविक्रान्तनामकोऽन्यो विख्यातः शुद्धो दण्डको भवति ॥ १ ॥

स्वेच्छयेति । उदारबुद्धिः कविर्यदि यदृच्छया यथाक्रमं रगणजगणौ वृत्ते स्थापयति, तर्हि सः अशोकमञ्जरीनामदण्डकः कथितः ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यत्रेति । यस्मिन् वृत्ते कविः पठनस्य सुकरतामपेक्ष्य स्वेच्छाऽनुसारं रगणान् कल्पयति, स विद्वद्भिः मत्तमातङ्गलीलाकरनामको दण्डकः कथितः ॥ ३ ॥

इति छन्दोमञ्जरीटीकायां प्रभाऽऽख्यायां द्वितीयः स्तबकः ।

रु०—जिस वृत्त में कवि अपनी इच्छा से यगण रक्खे, वह प्रसिद्ध और विशुद्ध दूसरा 'सिंहविक्रान्त' नामक दण्डक कहलाता है ॥ १ ॥

जिस छन्द में कवि क्रम से रगण और जगणों का अपनी इच्छा से प्रयोग करे, उसको 'अशोकमञ्जरी' नामक दण्डक कहते हैं ॥ २ ॥

जिसमें कवि पढ़ने की सुलभता देखकर अपनी इच्छा से रगणों का प्रयोग करे, उसे पण्डितों ने 'मत्तमातङ्गलीलाकर' नामक दण्डक कहा है ॥ ३ ॥

छन्दोमञ्जरी की रुचिरा नामक भाषाटीका का द्वितीय स्तबक समाप्त ।

तृतीयः स्तबकः

अर्धसमवृत्तम् ।

स स स लग भ भ भ गग

IIS IIS IIS IS SII SII SII SS

विषमे यदि सौ सलगा दले, भौ युजि भाद् गुरुकावुपचित्रम् ॥१॥

द्विरावृत्त्या पूरणीयः श्लोकः ।

मुरवैरिवपुस्तनुतां मुदं, हेमनिभांशुकचन्दनलिप्तम् ।
गगनं चपलामिलितं यथा, शारदनीरधरैरुपचित्रम् ॥

प्र०—विषमे यदीति । यदि विषमे प्रथमे तृतीये च, दले पादे, सौ सगणद्वयं सलगाः सगणो लघुर्गुरुश्च स्यात, युजि द्वितीये तुरीये च पादे, भाद्भगणानन्तरं, भौ भगणद्वयं, गुरुकौ द्वौ गुरू च स्याताम्, तदा उपचित्राभिधं वृत्तं भवति ।

मुरवैरिवपुरिति । हेमनिभं स्वर्णसदृशं पीताभमंशुकं यत्र चन्दनैर्लिप्तं च यत, पश्चात् कर्मधारयः, मुरवैरिवपुः श्रीकृष्णस्य शरीरं, चपलतासौदामिन्या मिलितं सहितं, शारदनीरधरैः शरत्कालिकवारिधरैः, उपचित्रं चित्रितं, गगनं, व्योममण्डलं, यथा इव, मुदम् आनन्दं तनुतां कुरुताम् । चन्दनचर्चितं पीताम्बरं श्रीकृष्णवपुः शारदजलधरवरं विद्युद्युक्तं नीलाकाशमिव मनो मोदयतीत्यर्थः । पूर्णोपमाऽलङ्कृतिः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रु०—यदि प्रथम तथा तृतीय पाद में तीन सगण हों और अन्त में एक लघु तथा गुरु हों, द्वितीय तथा चतुर्थ पाद में तीन भगण और अन्त के दोनों वर्ण गुरु हों, तो 'उपचित्र' नामक छन्द होता है।

स्वर्ण के समान पीत वस्त्र से सुशोभित तथा चन्दन-युक्त श्रीकृष्णचन्द्र का शरीर; बिजली से युक्त शरत्समय के बादलों से चित्र-विचित्र आकाश के समान आनन्द का विस्तार करे। यहाँ पर पूर्णोपमालङ्कार है ॥ १ ॥

लल भ भ गग भ भ भ गग

। । ऽ । । ऽ । । ऽ ऽ ऽ । । ऽ । । ऽ । । ऽ ऽ

विषमे प्रथमाक्षरहीनं, दोधकमेव हि वेगवती स्यात् ॥ २ ॥

स्मरवेगवती व्रजरामा, केशववंशरवैरतिमुग्धा।
रभसान्न गुरून् गणयन्ती, केलिनिकुञ्जगृहाय जगाम ॥

प्र०—विषम इति। एकादशाक्षरवृत्तवर्णनावसरे 'दोधकमिच्छति भत्रितयाद् गौ' इति दोधकवृत्तलक्षणमकारि। तदेव दोधकं यदि विषमे प्रथमे तृतीये च पादे प्रथमाक्षरहीनं पूर्ववर्णरहितं स्यात्, तदा वेगवतीत्याख्यं वृत्तं स्यात्।

स्मरेति। स्मरस्य कामस्य यो वेगस्तद्वती कामार्ता, काचिद् व्रजरामा व्रजवासिनी कामिनी, केशवस्य मुरलीधरस्य वंशरवैः मुरलीनिनदैः, अतिमुग्धा अत्यन्तं व्यामुह्यन्ती, गुरून् श्वशुरादीन्, न गणयन्ती उपेक्षमाणा, दूरीकृतशालीनताद्यङ्गनाकुलोचितगुणा धृतधाष्टर्या इत्यर्थः, केलिनिकुञ्जगृहाय क्रीडार्थकलतादिपिहितोदरभवनाय, रभसाद् वेगात्, जगाम गता।

रु०—'दोधक' वृत्त का लक्षण पूर्व किया जा चुका है, वही वृत्त प्रथम तृतीयपाद में प्रथमवर्ण से हीन होने पर 'वेगवती' नामक बन जाता है।

कोई कामार्त व्रजवासिनी, कृष्ण की मधुर मुरली-ध्वनि से मुग्ध होकर श्वशुरादिकों की उपेक्षा कर (लज्जा पर धूल डाल कर) क्रीडा-कुञ्ज को बड़े वेग से चली गई ॥ २ ॥

लल भ भ र न भ भ र

। । ऽ । । ऽ । । ऽ । ऽ । । । ऽ । । ऽ । । ऽ । ऽ

अयुजि प्रथमेन विवर्जितं द्रुतविलम्बितकं हरिणप्लुता ॥ ३ ॥

स्फुटफेनचया हरिणप्लुता, बलिमनोज्ञतटा तरणेः सुता।
कलहंसकुलारवशालिनी, विहरतो हरति स्म हरेर्मनः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्र०—अयुजिप्रथमेनेति । द्वादशवर्णवृत्तलक्षणोपन्यासावसरे द्रुतविलम्बितलक्षणं 'द्रुतविलम्बितमाह नभौ भरौ' इत्युक्तम्। तदेव द्रुतविलम्बितम् अयुजि प्रथमे तृतीये च पादे, यदि प्रथमाक्षरेण विवर्जितं रहितं स्यात्, तदा हरिणप्लुताख्यं वृत्तं भवेत्।

स्फुटफेनचयेति। स्फुटः फेनचयः फेनविसरो यस्याः सा, हरिणानां मृगाणां प्लुतम् उत्प्लुत्य गमनं यत्र सा, बलिभिः अर्घ्यसाधनाक्षतपुष्पचन्दनादिभिर्मनोज्ञं मनोहरं तटं कूलं यस्याः सा, कला रुचिरा ये हंसास्तेषां कुलानाम् आरवैर्ध्वनिभिः शालिनी शोभिनी, तरणेः सूर्यस्य, सुता कन्या यमुना, विहरतः कूले विहारं कुर्वतः, हरेः श्रीकृष्णस्य मनः हरति स्म जहार।

रु०—यदि प्रथम तथा तृतीय पाद में 'द्रुतविलम्बित' छन्द प्रथम वर्ण से हीन हो, तो उसी को 'हरिणप्लुता' कहते हैं।

स्फुट-फेन-समूह से युक्त तट पर उछलने-कूदने वाले मृगों से सुशोभित, बलि के पुष्पादिकों से रम्य-तट-वाली, सुन्दर हंसकुलों की मधुरध्वनि से मनोहारिणी यमुना श्रीकृष्णचन्द्र के मनको अपनी ओर आकर्षित कर रही थी। हंसों की मधुरध्वनि और मृगकुल की कूद-फाँद बड़ी ही रमणीय ज्ञात होती थी॥३॥

न न र लग न ज ज र

ꟾꟾꟾ ꟾꟾꟾ SꟾS ꟾS ꟾꟾꟾ ꟾSꟾ ꟾSꟾ SꟾS

अयुजि ननरला गुरुः समे, तदपरवक्त्रमिदं नजौ जरौ ॥ ४ ॥

स्फुटसुमधुरवेणुगीतिभिस्तमपरवक्त्रमवेत्य माधवम्।
मृगयुवतिगणैः समं स्थिताः, व्रजवनिता धृतचित्तविभ्रमाः॥

प्र०—अयुजीति। यस्य वृत्तस्य अयुजि विषमे प्रथमे तृतीये च पादे, ननरलाः नगणद्वयी रगणो लघुः, गुरुश्च स्यात्, समे द्वितीये चतुर्थे च पादे, नजौ नगणजगणौ, जरौ जगणरगणौ च भवेताम्, तदिदं वृत्तम् अपरवक्त्राभिधेयं स्यात्।

स्फुटसुमधुरेति। स्फुटा अभिव्यक्ताः सुमधुरा मधुरिमधुरां वहन्त्यश्च या वेणुगीतयः वंशीध्वनयस्ताभिः, नास्ति परं यस्मात्तदपरम् असामान्यं वक्त्रं मुखं यस्य तं, माधवं श्रीकृष्णम्, अवेत्य ज्ञात्वा, असामान्यवंशीवादकोऽयं वंशीधर इत्यवगत्य, धृतः चित्तविभ्रम आश्चर्यं याभिस्ताः, व्रजवनिता व्रजाङ्गनाः, मृगयुवतिगणैः समं हरिणीसमूहैः सार्धं स्थिताः, व्रजवनिताश्चेतोहारिणं मुरलीध्वनिं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

निशम्य तन्मयतामवाप्ताः 'पशुभिः सार्धं स्थितिर्न गरीयसी'त्यविजानत्यो मृगी-कदम्बकैः समं स्थिताः। मृग्योऽपि भयादिकमपहाय स्वप्राणानगणयन्त्यस्तत्रैव स्थिता इति।

रु०—यदि विषम अर्थात् प्रथम तथा तृतीय पाद में दो नगण, एक रगण, एक लघु तथा एक गुरु हो और दूसरे तथा चौथे पाद में नगण, जगण तथा जगण, रगण हों तो 'अपरवक्त्र' नामक छन्द होता है।

मधुर वंशी की ध्वनि से श्रीकृष्ण को विशिष्ट वेणुवादक जानकर आश्चर्यान्वित हुई व्रजवनितायें मृगी-समूह के साथ ठहर गईं। दोनों ही अत्यन्त मुग्ध हो गईं॥ ४॥

न न र य न ज ज र ग

। । । । । । ऽ । ऽ । ऽ । ऽ ऽ । । । । । ऽ । । ऽ । ऽ । ऽ ऽ

अयुजि नयुगरेफतो यकारो, युजि च नजौ जरगाश्च पुष्पिताग्रा॥५॥

वैतालीयं पुष्पिताग्राञ्चेच्छन्त्यपरवक्त्रकम्

करकिसलयशोभया विभान्ती, कुचफलभारविनम्रदेहयष्टिः।
स्मितरुचिरविलासपुष्पिताग्रा, व्रजयुवतिव्रततिर्हरेर्मुदेऽभूत्॥

प्र०—अयुजीति। अयुजि प्रथमे तृतीये च पादे, नयुगरेफतः नगणद्वयर-गणानन्तरं, यकारो यगणः, युजि द्वितीये चतुर्थे च पादे, नजौ नगणजगणौ, जर-गाश्च जगणः रगणः गुरुश्च स्युः, तदा पुष्पिताग्रानामकं वृत्तं भवेत्।

वैतालीयं पुष्पिताग्राऽभिधञ्च लक्ष्यमाणवृत्तं वृत्तान्तरत्वेनाननुमन्यमानाः केचन अपरवक्त्रमेव तयोः संज्ञेति, इच्छन्ति कामयन्ते।

करकिसलयेति। करा एव किसलयानि पल्लवानि तेषां शोभया कान्त्या, विभान्ती विराजमाना, कुचावेव फले तयोः भारेण विनम्रा नमनशीला गात्रयष्टि-र्यस्याः सा, स्मितस्य यो रुचिरो रमणीयो विलासः स एव पुष्पं तत् सञ्जातमस्य, 'तारकादिभ्य इतच्' इति इतच्, स्मितरुचिरविलासपुष्पितं तदेवाग्रं वदनं यस्याः सा, व्रजयुवतिर्व्रजाङ्गनैव व्रततिर्लता, 'वल्ली तु व्रततिर्लता' इत्यमरः, हरेः श्रीकृष्णस्य मुदेऽभूत् आनन्दाय सञ्जाता। अत्र रूपकालङ्कृतिः।

रु०—प्रथम तथा तृतीय पाद में दो नगण तथा एक रगण के अनन्तर यगण होने पर तथा द्वितीय और चतुर्थ पाद में नगण, जगण, जगण, रगण, तथा एक गुरु होने से 'पुष्पिताग्रा' नामक छन्द होता है।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हस्त—रूपी पल्लवों की कान्ति से शोभायमान तथा कुच—रूपी फलों के भार से विनम्रगात्रा, मन्दमुसकान—रूपी पुष्पों से पुष्पित—अग्र—वाली कोई व्रजाङ्गना श्रीकृष्ण के चित्त को हर्षदायिका हुई। यहां पर स्त्री में लता का आरोप करने से रूपक अलङ्कार है ॥ ५ ॥

'वैतालीय' तथा 'पुष्पिताग्रा' नामक छन्द को कोई विद्वान् 'अपरवक्त्र' से भिन्न नहीं मानते।

स स ज ग स भ र लग

। । ऽ । । ऽ । ऽ । ऽ । । ऽ ऽ । । ऽ । ऽ । ऽ

अयुजोर्यदि सौ जगौ युजोः, सभरा ल्गौ यदि सुन्दरी तदा ॥ ६ ॥

यदवोचत वीक्ष्य मानिनी, परितः स्नेहमयेन चक्षुषा।
अपि वागधिपस्य दुर्वचं, वचनं तद्विदधीत विस्मयम् ॥

प्र०—अयुजोरिति। यदि अयुजोः प्रथमतृतीयपादयोः, सौ सगणद्वयं, जगणो गुरुश्च, युजोः द्वितीयचतुर्थयोः, सभराः सगणभगणरगणाः, ल्गौ लघुः गुरुश्चैकः स्यात्, तर्हि सुन्दरीनामकं वृत्तं स्यात्।

यदवोचतेति। मानिनी स्वकुलाभिमानवती द्रौपदी, स्नेहमयेन प्रेमप्रचुरेण, चक्षुषा लोचनेन, परितः वीक्ष्य सर्वतः अवलोक्य, यदवोचत यदुदाजहार, हिताहितं पर्यालोच्य यज्जगाद, वागधिपस्य बृहस्पतेरपि दुर्वचं वक्तुमशक्यं तद्वचनं विस्मयमाश्चर्यं विदधीत कुर्वीत, का कथाऽन्येषाम् ?

रु०—यदि प्रथम तथा तृतीय पाद में दो सगण एक जगण और एक गुरु हों, तथा द्वितीय और चतुर्थ पाद में, सगण, भगण रगण तथा एक लघु और एक गुरु हों, तो 'सुन्दरी' नामक छन्द होता है।

क्षत्रिय-कुलोचित-अभिमानशालिनी द्रौपदी ने स्नेहमय अपने ज्ञान-चक्षुओं द्वारा देख कर हित तथा अहित की सारी विवेचना करके जो कुछ कहा है, वह एक बार बृहस्पति को भी आश्चर्य-चकित कर सकता है, दूसरों की तो कथा ही क्या ? ॥ ६ ॥

एतानि छन्दांस्यधिकानि दृश्यन्ते वृत्तरत्नाकरे तत्परिशिष्टे च—

भ भ भ गग न ज ज य

ऽ । । ऽ । । ऽ । । ऽ ऽ । । । । ऽ । । ऽ । । ऽ ऽ

भत्रयमोजगतं गुरुणी चेद्, युजि च नजौ ज्यय़ुतौ द्रुतमध्या ॥ १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त ज र ग म स ज गग

SSI ISISIS S S S S IIS ISI SS

ओजे तपरौ जरौ गुरुश्चेत्, म्सौ ज्गौ ग भद्रविराड् भवेदनोजे ॥२॥

स ज स ग भ र न गग

IIS ISIIIS S SII SIS III SS

असमे सजौ सगुरुयुक्तौ, केतुमती समे भरनगाद् गः ॥ ३ ॥

त त ज गग ज त ज गग

SSI SSI ISI SS ISISSI ISISS

आख्यानकी तौ जगुरू ग ओजे, जतावनोजे जगुरू गुरुश्चेत् ॥ ४ ॥

ज त ज गग त त ज गग

ISISSIISISS SSI SSI ISISS

जतौ जगौ गो विषमे समे चेत्, तौ ज्गौ ग एषा विपरीतपूर्वा ॥ ५ ॥

र ज र य ज र ज र ग

SIS ISI SIS ISS ISI SIS ISISISS

स्यादयुग्मके रजौ रयौ समे चेत्, जरौ जरौ गुरुर्यवातपरामतीयम् ॥६॥

र स ल ग स ज ज ग

SISIIS IS IIS ISI ISIS

सौ लगौ विषमे यदि, सजजा गुरुर्ललिता समे ॥ ७ ॥

त ज र ज गगग

SSIISISISISI SSS

ओजे तपरौ जरौ जगौ गुरू समे जौ यौ,

र ज र य

SIS ISISISISS

कीर्तिता बुधैरियं तु षट्पदाख्या ॥ ८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

र ज र ज त र ज र ग

SISISI SIS ISI SSI SIS ISI SISS

रो जरौ जसंयुतौ पदेऽसमेऽथ, युग्मे तरौ जरौ गुरुर्मृगीयवानी ॥९॥

न न भ भ न न र र

III III SIISII IIIIII SIS SIS

अयुजि ननभभाः समकेऽपि तु, नयुगरयुगलं तदा कौमुदी ॥१०॥

न ज ज र स ज य र लग

IIIISI ISI SIS IIS ISI ISS SIS IS

यदि विषमे भवतो नजौ जरौ, सजयाः समे तु रलौ गो मञ्जुसौरभम् ॥११॥

स स ज गग स भ र य

IIS IIS ISISS IIS SII SIS ISS

विषमे ससजा यदा गुरू चेत्, सभरा येन तु कालभारिणीयम् ॥१२॥

इति छन्दोमञ्जर्याम् अर्धसमवृत्ताख्यस्तृतीयः स्तवकः ।

प्र०—भत्रयमिति । ओजगतं विषमपादगतं, चेद् यदि, भत्रयं त्रयो भगणाः गुरुद्वयञ्च स्यात्, युजि समे पादे, ज्ययुतौ जगणयगणयुतौ, नजौ नगणजगणौ च स्यातां, तदा द्रुतमध्यामिधं वृत्तं स्यात् ॥ १ ॥

ओजे इति । यदि विषमे पादे तगणानन्तरं जगणः, रगणः गुरुश्च स्यात्, समे पादे मगणसगणजगणानन्तरं गुरुद्वयं स्यात्, तदा भद्रविराडाख्यं वृत्तं भवेत् ॥ २ ॥

असमे इति । यदि असमे पादे सगणगुरुयुक्तौ, सजौ सगणजगणौ स्यातां, समे च पादे भगणरगणनगणानन्तरं गुरुद्वयं स्यात्, तर्हि केतुमतीनामकं वृत्तं ज्ञेयम् ॥ ३ ॥

आख्यानकीति । यदि विषमे पादे तगणद्वयं जगणः गुरुद्वयञ्च स्यात्, समे च जगणतगणौ जगणो गुरुद्वयञ्च भवेत्, तर्हि आख्यानकीनामधेयं वृत्तं ज्ञेयम् ॥ ४ ॥

जताविति । विषमे जगणतगणजगणाः गुरुद्वयञ्च, समे तगणद्वयं, जगणः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गुरुद्वयञ्च यदि स्यात्, तर्हि विपरीतपूर्वा आख्यानकी इति वृत्तं, विपरीताख्यानकीति यावद्, भवेत् ॥ ५ ॥

स्यादिति। अयुग्मके प्रथमे तृतीये च पादे, रगणजगणौ, रगणयगणौ च स्याताम्, समे पादे च जगणरगणौ पुनश्च जगणरगणौ गुरुश्चैकः स्यात्, तर्हि इयं यवाद् यवशब्दात् परा मती, यवमतीत्यर्थः, भवेत् ॥ ६ ॥

सौविति। यदि विषमे पादे रगणसगणौ, लघुर्गुरुश्च स्यात्, समे पादे सगणजगणजगणा गुरुश्चैकः स्यात्, तर्हि ललितानामकं छन्दो भवति ॥ ७ ॥

ओज इति। यदि विषमे पादे तगणजगणौ, रगणजगणौ गुरुत्रयञ्च स्यात्, समे पादे रगणजगणौ रगणयगणौ च स्याताम्, तर्हि छन्दःशास्त्रकोविदैरिदं षट्पदाख्यं वृत्तं कीर्तितम् ॥ ८ ॥

र इति। विषमे पादे रगणो, जगणरगणौ, जगणः पुनरेकः स्यात्, समे पादे तगणरगणौ, जगणरगणौ गुरुश्चैकः स्यात्, तर्हि मृगीयवानीनामकं छन्दो भवेत् ॥ ९ ॥

अयुजीति। विषमे पादे नगणद्वयं भगणद्वयं चेत्स्यात्, समे च नगणद्वयं रगणद्वयं भवेत्, तदा कौमुदीनामकं वृत्तं स्यात् ॥ १० ॥

यदीति। यदि विषमे पादे नगणजगणौ जगणरगणौ च भवेतां, समे च सगणजगणयगणा, रगणो लघुर्गुरुश्चैकः स्यात्, तदा मञ्जुसौरभनामकं छन्दः स्यात् ॥ ११ ॥

विषम इति। विषमे पादे सगणयुगं, जगणः गुरुद्वयञ्च स्यात्, समे च सगणभगणरगणा यगणश्च स्यात्, तर्हि कालभारिणीनामकं वृत्तं जायेत ॥ १२ ॥

इति छन्दोमञ्जरीटीकायां प्रभाऽऽख्यायां तृतीयः स्तबकः।

हि०—यदि विषम पाद में तीन भगण, दो गुरु और सम पाद में नगण, जगण, जगण तथा यगण हों, तो 'द्रुतमध्या' नामक छन्द होता है ॥ १ ॥

यदि विषम में तगण, जगण, रगण तथा एक गुरु हों और सम पाद में मगण, सगण, जगण, तथा दो गुरु हों, तो 'भद्रविराट्' छन्द होता है ॥ २ ॥

यदि विषम पाद में सगण, जगण, सगण और एक गुरु हों, तथा सम पाद में भगण, रगण, नगण के बाद दो गुरु हों, तो 'केतुमती' नामक छन्द होता है ॥३॥

यदि विषम पाद में दो तगण, जगण तथा दो गुरु हों और सम पाद में जगण, तगण, जगण, तथा दो गुरु हों, तो 'आख्यानकी' नामक छन्द होता है ॥ ४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यदि विषम पाद में जगण, तगण, जगण और दो गुरु हों तथा सम पाद में दो तगण, जगण और दो गुरु हों, तो 'विपरीताख्यानकी' नामक छन्द होता है ॥५॥

यदि विषम पाद में रगण, जगण, रगण, यगण हों और सम पाद में जगण, रगण, जगण, रगण तथा एक गुरु हों, तो 'यवमती' नामक छन्द होता है ॥ ६ ॥

यदि विषम पाद में रगण, सगण, एक लघु और एक गुरु हों तथा सम पाद में सगण, जगण, जगण और एक गुरु हों, तो 'ललिता' नामक छन्द होता है ॥ ७ ॥

यदि विषम पाद में तगण, जगण, रगण तथा जगण और तीन गुरु हों तथा सम पाद में रगण, जगण, रगण, और यगण हों, तो विद्वान् 'षट्पदा' नामक छन्द कहते हैं॥

यदि विषम पाद में रगण, जगण, रगण और जगण हों तथा समपाद में, नगण, रगण, जगण, रगण और एक गुरु हों तो 'मृगीयवानी' नामक छन्द होता है ॥९॥

यदि विषम पाद में दो नगण तथा दो भगण हों और सम पाद में दो नगण तथा दो रगण हों तो 'कौमुदी' नामक छन्द होता है ॥ १० ॥

यदि विषम पाद में नगण, जगण तथा जगण, रगण हों और सम पाद में सगण, जगण, यगण, रगण तथा एक लघु और एक गुरु हों, तो 'मञ्जुसौरभ' नामक छन्द होता है ॥ ११ ॥

यदि विषम पाद में दो सगण, एक जगण तथा दो गुरु हों और सम पाद में सगण, भगण, रगण तथा यगण हों, तो 'कालभारिणी' नामक छन्द होता है ॥१२॥

छन्दोमञ्जरीकी रुचिरा नामक भाषा का तृतीय स्तबक समाप्त ।

चतुर्थः स्तबकः

अथ विषमवृत्तम् ।

स ज स ल न स ज ग

ISS ISI IIS I III IIS ISI S

प्रथमे सजौ यदि सलौ च, नसजगुरुकाण्यनन्तरम् ।

भ न भ ग स ज स ज ग

SII III SII S IIS ISI IIS ISI S

यद्यथ भनभगाः स्युरथो, सजसा जगौ च भवतीयमुद्गता ॥ १ ॥

विललास गोपरमणीषु, तरणितनया प्रभोद्गता ।

कृष्णनयनचकोरयुगे, दधती सुधांशुकिरणोर्मिविभ्रमम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्र०—प्रथम इति । यदि प्रथमे पादे सगणजगौ, सगणो लघुश्च भवेयुः, द्वितीये चरणे नगणसगणजगणा गुरुश्च भवेयुः, तृतीये पादे भगणनगणभगणा गुरुश्च स्युः, चतुर्थपादे च सगणजगणसगणजगणा गुरुश्च भवेयुः, तदा उद्गताऽभिधं वृत्तं जायते ।

विललासेति । प्रभया कान्त्या उद्गता प्राप्तोत्कर्षा, तरणितनया कालिन्दी, गोपरमणीषु गोपिकासु सतीष्वपि, ता अधरीकृत्य, कृष्णनयनचकोरयुगे कृष्णनयनरूपिणि चक्रवाकयुगले, सुधांशोरमृतसूतेः, किरणोर्मिविभ्रमं, रश्मितरङ्गभ्रमं, दधती कुर्वती, विललास शुशुभे । यथा चकोरः सर्वमनादृत्य सुधाकरकरनिकरे स्वीयां सतृष्णां नयनवृत्तिं निबध्नाति, तथा श्रीकृष्णोऽपि गोपीर्विहाय शमनस्वसारं यमुनामेव भूयो भूयो लुलोके ।

रु०—यदि प्रथम पाद में सगण, जगण, सगण तथा एक लघु हों, दूसरे चरण में नगण, सगण, जगण तथा गुरु हों, तृतीय पाद में भगण, नगण, भगण और एक गुरु हों तथा चतुर्थ पाद में सगण, जगण, सगण, जगण तथा एक गुरु हों, तो 'उद्गता' नामक छन्द होता है ।

गोप-रमणियों के रहते हुए भी अत्यन्त-शोभा-सम्पन्ना यमुना, कृष्ण के नयन-रूपी चकोर-युग के लिये चन्द्रमा की किरणों के समान तरङ्गों की शोभा को धारण करती हुई शोभित हुई । कृष्ण ने बड़े चाव से गोपियों को छोड़कर यमुना की नैसर्गिक शोभा को देखा ॥ १ ॥

प्रथमे सजौ यदि सलौ च, नसजगुरुकाण्यनन्तरम् ।

भ न ज ल ग

ऽ।। ।।। ।ऽ। ।ऽ

यद्यथ भनजलगाः स्युरथो, सजसा जगौ च भवतीयमुद्गता ॥ २ ॥

अथ वासवस्य वचनेन, रुचिरवदनस्त्रिलोचनम् ।
क्लान्तिरहितमभिराधयितुं, विधिवत्तपांसि विदधे धनञ्जयः ॥

इति भारवावुद्गताभेदः ।

प्र०—प्रथम इति । यदि प्रथमे सगणजगणसगणाः लघुश्च, द्वितीये नगणसगणजगणाः गुरुश्च, तृतीये भगणनगणजगणाः लघुर्गुरुश्च तथा चतुर्थे सगणजगणसगणजगणाः गुरुश्च भवेयुः, तर्हि उद्गताऽभिधेयं वृत्तं जायते ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथेति । अथ इन्द्रप्रयाणानन्तरं, वासवस्य सुराधिपस्य, वचनेन कथनेन, रुचिरवदनो हर्षितमुखः, धनञ्जयः अर्जुनः, क्लान्तिरहितं शिवस्वरूपं, त्रिलोचनं शिवम् , अभिराधयितुं प्रसादयितुं, विधिवद् विधिपूर्वकं, तपांसि विदधे चकार । क्लान्तिरहितमिति क्रियाविशेषणं वा, क्लान्तिरहितं यथा स्यात्तथा अगणितक्लेशमित्यर्थः ।

रु०—प्रथम पाद में सगण, जगण, सगण तथा एक लघु, द्वितीय में नगण, सगण, जगण तथा गुरु, तृतीय में भगण, नगण, जगण तथा एक लघु और एक गुरु चतुर्थ में सगण, जगण, सगण, जगण तथा एक गुरु हों, तो 'उद्गता' नामक छन्द होता है ।

इन्द्र के चले जाने के बाद इन्द्र की बातों से हर्षित अर्जुन ने शिवकारक शिव की उपासना करने के लिए (उनसे अपना मुँह-मागा वर पाने के लिए) विधिपूर्वक तप करना प्रारम्भ कर दिया। क्लान्तिरहित यह क्रियाविशेषण भी बनाया जा सकता है। इस अवस्था में क्लान्तिरहित का अर्थ—कष्टों का कुछ भी ध्यान न करते हुए—ऐसा होगा ॥ २ ॥

त्रयमुद्गतासदृशमेव, पदमिह तृतीयमन्यथा ।

र न भ ग

SIS III SII S

जायते रनभगैर्ग्रथितं, कथयन्ति सौरभकमेतदीदृशम् ॥ ३ ॥

परिभूतफुल्लशतपत्र-वनविसृतगन्धविभ्रमा ।
कस्य हृद्य हरतीह हरे !' मुखपद्मसौरभकला तवाद्भुता ॥

प्र०—त्रयमिति । पदत्रयमुद्गतासदृशं, तृतीयञ्च पदं रगणनगणभगणैस्तथा गुरुणा युक्तं स्यात्, तदा सौरभकनामकं छन्दः स्यात् ।

परिभूतेति । हे हरे ! परिभूतस्तिरस्कृतः फुल्लशतपत्रवनस्य विकसितकमलपटलस्य विसृतगन्धविभ्रमः विसृत्वरसौरभप्रसारो यया सा, तव भवतः, मुखपद्मसौरभकला वदनकमलसौगन्ध्यकला, अद्भुता विचित्रा, कस्य हृद् हृदयं, न हरति ? अपि तु सर्वेषामेव हृदयानि समावर्जयति ।

रु०—तीन चरण 'उद्गता' नामक छन्द के समान हों तथा तृतीय पाद में रगण, नगण, भगण तथा गुरु हों, तो 'सौरभक' नामक छन्द कहा जाता है ।

हे श्रीकृष्ण ! खिले हुए कमल-समूहों की सुगन्धि को नीचा दिखाने वाली आपकी मुखकमल-सुगन्धि किसके हृदय को आकर्षित नहीं करती है ? ॥ ३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नयुगं सकारयुगलञ्च, भवति चरणे तृतीयके ।

न न स स

। । । । । । । । S । । S

तदुदितमुरुमतिभिर्ललितं, यदि शेषमस्य सकलं यथोद्गता ॥ ४ ॥

व्रजसुन्दरीसमुदयेन, मुदितमनसा स्म पीयते ।
हिमकरगलितमिवामृतकं, ललितं मुरारिमुखचन्द्रविद्रुतम् ॥

प्र०—नयुगमिति । यदि तृतीये पादे नगणद्वयं सगणद्वयञ्च भवतः शेषञ्च सर्वमुद्गतावद् भवति, तदा ललितनामकं वृत्तं जायते ।

व्रजसुन्दरीति । व्रजसुन्दरीसमुदयेन व्रजाङ्गनासमुदायेन, मुदितमनसा हर्षितचेतसा, मुरारिमुखचन्द्राद् श्रीकृष्णाननेन्दोः विद्रुतं गलितं, ललितं सुन्दरम्, अमृतकं हिमकरात् चन्द्राद् गलितमिव स्रुतमिव, पीयते स्म आस्वाद्यते स्म ।

हि०—तृतीय पाद में दो नगण, तथा दो सगण हों और शेष 'उद्गता' के समान हों, तो 'ललित' नामक छन्द होता है।

गोपियों के बड़े आनन्द के साथ श्रीकृष्ण के मुखचन्द्र से टपके हुए सुन्दर अमृत को चन्द्रमा से टपका हुआ मानकर पिया ॥ ४ ॥

भवत्यर्धसमं वक्त्रं विषमञ्च कदाचन ।
तयोर्द्वयोरुपान्तेऽत्र छन्दस्तद्धुनोच्यते ॥ ५ ॥

प्र०—भवतीति । वक्त्रम् एतन्नामकं वृत्तं, कदाचन जातुचित्, आर्धसमं विषमञ्च भवति । इदानीं तयोरुभयोरपि, उपान्ते अन्तिमवर्णात् पूर्वस्मिन् वर्णे, छन्दः छन्दोनियम इति यावत्, उच्यते कथ्यते । उपान्तवर्ण एव नियमविशेषो नान्यत्र ।

हि०—'वक्त्र' नामक वृत्त ही कभी अर्धसम और विषम हो जाता है, इसलिए अब उन दोनों में अन्तिम वर्ण से पूर्व वर्ण में छन्द का नियम कहते हैं। यहाँ अन्तिम वर्ण के पूर्व वर्ण में ही नियम-विशेष है, अन्यत्र नहीं ॥ ५ ॥

य म ग य

। S S S S S S । S S

वक्त्रं युग्भ्यां मगौ स्यातां, मब्धेर्योऽनुष्टुभि ख्यातम् ॥

वक्त्राम्भोजं सदा स्मेरं, चक्षुर्नीलोत्पलं फुल्लम् ।
बल्लवीनां मुरारातेश्चेतोभृङ्गं जहारोच्चैः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्र०—वक्त्रमिति। अनुष्टुभि एतन्नामधेयेऽष्टवर्णात्मके वृत्ते, अब्धेः चतुर्थवर्णात्परः यगणः स्यात्, तथा युग्भ्यां द्वितीयचतुर्थपादयोरिति यावत्, मगणो गुरुश्च स्याताम्, तदा वक्त्रनामकं छन्दः ख्यातं प्रसिद्धम्।

वक्त्राम्भोजमिति। वल्लवीनां व्रजाङ्गनानां, सदा स्मेरम् ईषद्धास्यच्छटाशोभमानं वक्त्राम्भोजं वदनकमलं, फुल्लं विकसितं चक्षुर्नीलोत्पलं नेत्ररूपं कृष्णकमलं, मुरारातेः श्रीकृष्णस्य, चेतोभृङ्गं मानसरूपं भ्रमरम्, उच्चैः अत्यधिकं जहार।

हि०—'अनुष्टुप्' नामक अष्टवर्णात्मक छन्दमें चतुर्थ वर्णके अनन्तर यगण होनेसे तथा द्वितीय और चतुर्थ पादमें मगण तथा एक गुरु होनेसे 'वक्त्र' नामक छन्द होता है।

मुसकाती हुई काली-काली-आंखों-वाली गोपियों ने श्रीकृष्ण के मनको बहुत आकर्षित किया।

य ज
।ऽऽ ।ऽ।

युजोश्चतुर्थतो जेन, पथ्यावक्त्रं प्रकीर्तितम्॥ ६॥

रासकेलिसतृष्णस्य, कृष्णस्य मधुवासरे।
आसीद् गोपमृगाक्षीणां, पथ्या वक्त्रमधुस्रुतिः॥

प्र०—युजोरिति। युजोः द्वितीयचतुर्थपादयो, चतुर्थतः चतुर्थवर्णादनन्तरं जेन जगणेन पथ्यावक्त्रं नाम छन्दो भवति। द्वितीयचतुर्थपादयोः पञ्चमसप्तमौ वर्णौ लघू षष्ठश्च गुरुः स्यादित्यर्थः। प्रथमतृतीययोस्तु यगण एव।

रासकेलीति। रासस्य या केलि क्रीडा तस्यां सतृष्णस्य इच्छुकस्य कृष्णस्य, मधुवासरे वसन्तदिवसेषु, गोपमृगाक्षीणां गोपीनां, वक्त्राद् वदनाद् या मधुस्रुतिः सुधानिःसृतिः मधुमधुरवाग्धारानिर्गमः सैव, पथ्या अनुकूला आसीद्।

हि०—सम पाद के चतुर्थ वर्ण के अनन्तर जगण होने के 'पथ्यावक्त्र' नामक छन्द होता है। अर्थात् पञ्चम, सप्तम वर्ण लघु और षष्ठ वर्ण गुरु होता है। प्रथम तृतीय पाद में तो यगण ही रहता है।

रास-क्रीडा के इच्छुक श्रीकृष्ण के लिए वसन्त के दिनों में गोपियों के मुख से निकली हुई अमृत की धारा ही अनुकूल थी॥ ६॥

ल लगल
। ।ऽ।

पञ्चमं लघु सर्वत्र, सप्तमं द्विचतुर्थयोः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न लगल

। ।ऽ।

गुरु षष्ठं च जानीयात् (१) शेषेष्वनियमो मतः ॥ ७ ॥
प्रयोगे प्रायिकं प्राहुः केऽप्येतद्वृत्तलक्षणम् ।
लोकेऽनुष्टुबिति ख्यातं तस्याष्टाक्षरता मता ॥ ८ ॥
इति छन्दोमञ्जर्यां विषमवृत्ताख्यश्चतुर्थः स्तबकः ।

प्र०—पञ्चममिति । अत्रेति शेषः । अत्र वक्त्रनामके वृत्ते, सर्वत्र सर्वचरणेषु, पञ्चममक्षरं लघु, द्वितीयचतुर्थयोः पादयोः सप्तमं लघु षष्ठं च गुरु जानीयात् । शेषेष्वक्षरेषु कोऽपि नियमो नास्ति । केचन मनीषिण एतल्लक्षणकमपि वृत्तं न स्वीकुर्वते, तेषामेतस्य वृत्तस्याष्टाक्षररूपत्वं मतम् । लोके च तस्य नाम अनुष्टुप् इति ॥

इति छन्दोमञ्जरीटीकायां प्रभाऽऽख्यायां चतुर्थः स्तबकः ।

रु०—इस 'वक्त्र' नामक छन्द में सब चरणों में पञ्चम वर्ण लघु, तथा द्वितीय चतुर्थ पाद में सप्तम वर्ण लघु और षष्ठ गुरु होता है । शेष वर्णोंमें कोई नियम नहीं है । कुछ विद्वान् इस लक्षण को भी प्रायिक ही मानते हैं । उनका मत है कि केवल अष्टाक्षरता होनी चाहिये । लोक में वह छन्द 'अनुष्टुप्' नाम से प्रसिद्ध है ॥७-८॥
छन्दोमञ्जरी की रुचिरा नामक भाषाटीका का चतुर्थ स्तबक समाप्त ।

पञ्चमः स्तबकः

अथ मात्रावृत्तम् ।

ज

१ २ ३ ४ ५ ६ ७ ग

ऽऽ ऽऽ ऽ।। ।ऽ ऽऽ ऽ।। ।ऽ। ।।ऽ ऽ

लक्ष्मै तत् सप्त गणा गोपेता भवति नेह विषमे जः ।

(१) 'पादाना'-मिति पाठान्तरम् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

षष्ठो जश्च नलघु वा प्रथमेऽर्धे नियतमार्यायाः ॥ १ ॥
षष्ठे द्वितीयलात् परके न्ले मुखलाच्च सयतिपदनियमः ।

चरमेऽर्धे पञ्चमके तस्मादिह भवति षष्ठो लः ॥ २ ॥

कृष्णः शिशुः सुतो मे बल्लवकुलटाभिराहृतो न गृहे ।
क्षणमपि वसत्यसावित्ति जगाद गोष्ठ्यां यशोदाऽऽर्या ॥ १ ॥
वृन्दावने सलीलं वल्लुद्रुमकाण्डनिहिततनुयष्टिः ।
स्मेरमुखार्पितवेणुः कृष्णो यदि मनसि कः स्वर्गः ? ॥ २ ॥

प्र०—अथार्यामादौ लक्षयति – लक्ष्मैतदित्यादिना । अन्ते गुरुणा उपेताः संयुक्ताः, सप्त गणा आर्यायाः प्रथमेऽर्धे भवन्ति । इह च विषमे प्रथमतृतीयपञ्चमसप्तमेषु गणेषु, 'जो गुरुमध्यगतः' इति लक्षणो जगणो न भवति । षष्ठो गणः जः जगणः स्यात् , यदि वा नलघु नगणो लघुश्च स्यात् । इत्येतत्सर्वम् आर्यायाः प्रथमेऽर्धे नियतम् ।

'ज्ञेयाः सर्वादिमध्यान्तगुरवोऽत्र चतुष्कलाः ।
गणाश्चतुर्लघूपेताः पद्यार्यादिषु संस्थिताः ॥'

इत्यादिना ये चतुर्मात्रात्मका गणाः प्रोक्तास्त एवात्र गणशब्देन गृह्यन्ते । एवञ्च 'एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते' इति नियमेन चतुष्कलात्मकस्य गणस्य त्रयः प्रकाराः सम्भवन्ति--गुरुद्वयं लघुचतुष्टयं लघुद्वयसहित एको गुरुश्चेति । कृष्णः (ऽ ऽ) १, शिशुःसु (। ऽ ।) २ तोमे (ऽ ऽ) ३, बल्लव (ऽ । ।) ४, कुलटा (। । ऽ) ५, भिराहृ (। ऽ ।) ६, तोनगृ (ऽ । ।), ७, हे (ऽ) इति चान्ते गुरुणा युक्तो भवति । एवमेव सप्तानामपि गणानां गणना कार्या । केचन च साहित्यविद 'गोपेता' इति मात्राद्वयोपलक्षणमित्यभिदधते । तेन चान्ते लघुद्वयप्रयोगेऽपि तेषां मते न काचिदस्ति क्षतिः । परं ये हि 'गोपेता' इत शब्दस्य मात्राद्वयोपलक्षणत्वे कमपि मानमनुपलभमानास्तच्छब्दं स्वरूपपरकमेव व्याचक्षते, तेषां मते चान्ते गुरुवर्णस्य नैयत्यम् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इदानीं लक्षणस्वरूपनिरूपणानन्तरं यतिनियतं चिकीर्षति—षष्ठ इत्यादिना। षष्ठे गणे न्ले नगणलघुसहिते चतुर्लघुरूपे सति, द्वितोयलाद् द्वितीयलघोः पूर्वमेव, यतिनियमः। परके सप्तमे गणे चतुर्लघुरूपे सति, मुखलात् प्रथमलघोः पूर्वं, यतिनियमः। अनेन च विस्पष्टमेतत्, यत्—चतुर्लघुरूपे षष्ठे गणे सति तस्मिन्नेव गणे प्रथमलघौ यतिः, सप्तमे च चतुर्लघुरूपे षष्ठगणान्त एव यतिरिति। चरमेऽर्धे अवशिष्टार्धे षष्ठो गणः लः केवलो लघुवर्णरूपो भवति। पञ्चमके च गणे चतुर्लघुरूपे सति, तस्मादेव प्रथमलघुवर्णादेव यतिर्भवति। आर्यायामेको गणश्चतुष्कल इति प्रतिपादितपूर्वम्। परमत्र षष्ठगणस्य केवलं लघुवर्णस्वरूपत्वान्मात्रात्रयस्य ह्रासो न केषां मतिविषयः? तत्र चरमेऽर्धे सप्तविंशतिमात्रा, प्रथमेऽर्धे च त्रिशन्मात्राः। एवञ्च—सप्तपञ्चाशन्मात्रामात्रानियतार्या भागद्वयात्मिका, तत्रैव च यतिर्युक्ता। केचन चास्या भागचतुष्टयत्वं व्याख्यान्ति, तत्र च युक्तायुक्तविवेचना विद्वन्मनोऽधीना। आर्यायाश्च बहवो भेदास्ते चास्मिन्नेव ग्रन्थेऽन्यत्र लिख्यन्ते। ये चाप्यत्र नोट्टङ्कितास्तेऽपि स्वाध्यायशीलैर्ग्रन्थान्तरतः स्वयमेव द्रष्टव्याः।

कृष्ण इति। आर्या श्रेष्ठगुणाढ्या, यशोदा नन्दजाया, गोष्ठ्यां रमणीसमाजे, इति वक्ष्यमाणं, जगाद व्याजहार—शिशुरबोधः, मे सुतः, बल्लवकुलटाभिः पुंश्चलीभिर्गोपीभिः, आहूतोऽन्यत्र क्वापि नीतः, अतः क्षणमपि कदाचिदपि, गृहे, न वसति न तिष्ठति। अत्र च चतुष्कलात्मकगणविच्छेदः प्रदर्शित एव। एषा च जगणषष्ठार्या।

वृन्दावने इति। वृन्दावने, वल्गुद्रुमकाण्डनिहिततनुयष्टिः मनोज्ञमहीरुहस्कन्धाधिरोपितगात्रयष्टिः, स्मेरमुखे अर्पितः कृत इति यावत्, वेणुर्येन असौ कृष्णो यदि मनसि चित्ते स्यात्, तदा स्वर्गः कः स्वर्गेण किं प्रयोजनम्? एषा च नलघुषष्ठार्याः।

२०—विषमगण, अर्थात् प्रथम तृतीय पञ्चम तथा सप्तम गणों में जगण-रहित, अन्त में गुरुयुक्त, सात-गण-वाला 'आर्या' नामक छन्द होता है। इसमें छठा गण या तो जगण हो अथवा नगण और एक लघु हो। आर्या छन्द में यही नियम है। यहां पर गण शब्द से पूर्वकथित वर्णत्रयात्मक नगण-आदि का ग्रहण नहीं होता, अपि तु चतुष्कलात्मक गणों का ग्रहण होता है।

षष्ठ गण में चारों लघुवर्ण होने पर दूसरे लघु से पूर्व यति होती है और सातवें गण में चारों लघु वर्ण होने पर प्रथम लघु से पूर्व यति होती है। शेषार्ध में षष्ठ गण

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

केवल लघुवर्णात्मक होता है तथा पांचवें गण के चतुर्लघुवर्णात्मक होने पर, प्रथम लघु से पूर्व यति होती है।

श्रेष्ठ यशोदा ने सम्पूर्ण स्त्रियों के बीच में कहा कि मेरे अबोध बच्चे को कोई दुष्ट गोपियाँ कहीं बहका कर ले गयीं हैं, इसलिए अब वह घर में क्षणमात्र के लिए भी नहीं ठहरता।

वृन्दावन में सुन्दर पेड़ के तले बैठ कर हँसते हुए मुरली बजानेवाले मुरलीधर का ध्यान यदि मन में है, तो स्वर्ग की क्या परवाह? वह तो एक तुच्छ सी वस्तु है ॥ १–२ ॥

पथ्या विपुला चपला मुखचपला जघनचपला।
गीत्युपगीत्युद्गीतय आर्यागीतिश्च नवधाऽऽर्या ॥ ३ ॥

३
I I I I S I I I I S

प्रथमगणत्रयविरतिर्दलयोरुभयोः प्रकीर्तिता पथ्या।

जय जय नाथ! मुरारे! केशव! कंसान्तकाच्युतानन्त।
कुरु करुणामिति भणितिः पथ्या भवरोगदुःस्थानाम् ॥

प्र०—पथ्येति। पथ्याविपुलाऽऽदिभेदेन नवविधा आर्या मता। तत्र चोभयोरर्धयोरन्तरे यदि चतुष्कलात्मकगणत्रयानन्तरं, विरतिर्यतिः स्यात्, तदा पथ्या नाम भवति।

जय जयेति। हे नाथ! मुरारे! केशव! कंसान्तक! अच्युत! अनन्त! जय जय सर्वोत्कर्षेण वर्तस्व, करुणां दयां, कुरु विधेहि—इत्युक्तिः भवरोगदुःस्थानां संसारक्लेशदुर्दशाग्रस्तानां मानवानां कृते, पथ्या हितकारिणी।

र०—पथ्या-विपुला—आदि भेदों से 'आर्या' नौ प्रकार की होती है। पूर्वार्ध तथा उत्तरार्ध दोनों पादों में तीन गणों के बाद यति होने पर 'पथ्या' होती है।

'हे नाथ! मुरारे! केशव! कंसनाशक! अच्युत! अनन्त! आपकी जय हो जय हो! आप हम लोगों पर कृपा कीजिये।' इस प्रकार की उक्ति संसार—पीडित मनुष्यों के लिए अत्यन्त हित—कारक है ॥ ३ ॥

३
S S I I S I I S

संलङ्घ्य गणत्रयमादिमं शकलयोर्द्वयोर्भवति पादः ॥ ४ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

३

ऽ ऽऽऽ।। ऽ

यस्यास्तां पिङ्गलनागा विपुलमिति समाख्याति ।
पुंसां कलिकालव्यालहतानां नास्त्युपहतिरल्पाऽपि ।
वीर्यविपुला मुखे चेत् स्याद् गोविन्दाख्यमन्त्रकला ॥

प्र०—संलङ्घ्येति । यस्या आर्यायाः, द्वयोः शकलयोरुभयोरपि अर्धयोः, आदिमं प्रारम्भवं गणत्रयं, संलङ्घ्य विहाय, पादो भवति, तां पिङ्गलनागो विपुलामिति विपुलाऽऽख्यया, समाख्याति कथयति ।

पुंसामिति । कलिकाल एव व्यालः सर्पस्तेन हतानां दष्टानां, पुंसां मनुष्याणाम्, अल्पाऽपि उपहतिर्हानिः नास्ति, यदि वीर्यविपुला महावीर्या, गोविन्दाख्यो 'गोविन्द' इति यो मन्त्रस्तस्य कला, वदने मुखे स्यात् । गोविन्दनामोच्चारणपरायणो भवेद् यः कश्चिन्मनुजः, स कलिकालेऽपि न दुरवस्थामाप्नुयादिति भावः ।

रु०—जिस 'आर्या' के दोनों अर्धों में आदि के तीन गणों को छोड़ कर पाद हो, उसको पिङ्गलनागाचार्य 'विपुला' कहते हैं ।

कलियुग-रूपी सर्प से डसे हुए मनुष्य यदि गोविन्द नामक महामन्त्रका जप करते रहें, तो उनकी थोड़ी सी भी हानि नहीं हो सकती ॥ ४ ॥

ज ज
२ ४

। ऽ । । ऽ ।

दलयोर्द्वितीयतुर्यौ गणौ जकारौ तु यत्र चपला सा ॥ ५ ॥
चपला न चेत् कदाचिन्नृणां भवेद् भक्तिभावना कृष्णे ।
धर्मार्थकाममोक्षास्तदा करस्था न सन्देहः ॥

प्र०—दलयोरिति । यस्या आर्यायाः, दलयोः द्वयोरप्यर्धयोः, द्वितीयतुर्यौ द्वितीयचतुर्थौ गणौ, जकारौ जगणौ स्यातां, साऽऽर्या चपलानाम्नी भवति ।

चपलेति । चेद् यदि कदाचित्, नृणां मनुष्याणां, कृष्णे भक्तिभावना, चपला चञ्चला न स्यात्, तर्हि धर्मार्थकाममोक्षाः समस्तोऽपि चतुर्वर्गः, करस्थाः हस्तगता भवेयुः, अत्र सन्देहः संशयो नास्ति ।

रु०—जिस 'आर्या' के दोनों अर्धों के दूसरे तथा चौथे गण जगण हों, वह आर्या 'चपला' नामक होती है ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यदि मनुष्य श्रीकृष्ण के अन्दर अपनी भक्ति-भावना को चञ्चल न रहने दे तो इसमें सन्देह नहीं कि वे अनायास ही चतुर्वर्ग की प्राप्ति कर सकते हैं ॥ ५ ॥

ज ज
२ ४
।ऽ। ।ऽ।

आद्यं दलं समस्तं भजेत लक्ष्म चपलागतं यस्याः ।

६
।

शेषः पूर्वजलक्ष्मा मुखचपला सोदिता मुनिना ॥ ६ ॥

नन्दसुत ! वञ्चकस्त्वं दृढं न ते प्रेम गच्छ तत्रैव ।
यत्र भवति ते रागः क्वापि जगादेति मुखचपला ॥

प्र०—आद्यमिति । यस्या आर्यायाः, आद्यं दलं प्रथमोऽर्धः, चपलागतं लक्ष्म भजेत् चपलासदृशं स्यात्, शेषः द्वितीयोऽर्धः, पूर्वजलक्ष्मा पूर्वोक्तार्यानिभः स्यात्, तदा सा मुनिना पिङ्गलेन, मुखचपला उदिता कथिता ।

नन्दसुतेति । हे नन्दसुत ! कृष्ण ! त्वं वञ्चकः प्रतारकोऽसि, ते प्रेम दृढं स्थिरं, न नास्ति, यत्र क्वापि कुत्रापि, ते रागोऽनुरागः, भवति विद्यते, तत्रैव गच्छ, इति काऽपि मुखचपला गोपी जगाद ।

स०—जिस 'आर्या का प्रथम अर्धभाग 'चपला' के समान हो और दूसरा सामान्य 'आर्या' के समान हो, उसे 'मुखचपला' कहते हैं ।

'हे कृष्ण ! तुम बड़े ठग हो । तुम्हारा प्रेम दृढ़ नहीं है । जिससे तुम्हारा सच्चा प्रेम है उसी के पास जाओ ।' इस प्रकार किसी मुँहफट गोपी ने कहा ॥ ६ ॥

ज
६
।ऽ।

प्राक् प्रतिपादितमर्धे प्रथमे प्रथमेतरे च चपलायाः ।

ज ज
२ ४
।ऽ। ।ऽ।

लक्ष्माश्रयेत सोक्ता विशुद्धधीभिर्जघनचपला ॥ ७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कृष्णः शृङ्गारपटुर्यौवनमदरागचपलललिताङ्गः ।
आसीद् व्रजाङ्गनानां मनोहरो जघनचपलानाम् ॥

प्र०—प्रागिति । या प्रथमेऽर्धे प्राक्प्रतिपादितं पूर्वोक्ताम्, आर्याया लक्ष्म लक्षणं, प्रथमेतरे द्वितीये च, चपलाया लक्षणम्, आश्रयेत अवलम्बेत, सा विशुद्धधीभिर्विद्वद्भिः, जघनचपलेति कथिता ।

कृष्ण इति । यौवनस्य तारुण्यस्य मदरागाभ्यां चपलं चञ्चलं ललितं मनोहरञ्च अङ्गं शरीरं यस्य सः, शृङ्गारपटुः शृङ्गं मन्मथोद्भेदम् आसमन्ताद् राति ददाति करोतीति शृङ्गारस्तस्मिन् पटुः सम्भोगचतुरः कृष्णः, जघनचपलानां नर्तनशीलानां, व्रजाङ्गनानां गोपीनां मनोहरः चित्ताकर्षकः मनःप्रिय आसीत् ।

रु०—जो प्रथम अर्ध में 'आर्या' के सदृश तथा दूसरे में 'चपला' के समान हो, उसे 'जघनचपला' कहते हैं ।

यौवन के मद और राग से चञ्चल तथा सुन्दर-शरीर-वाले, सम्भोग-निपुण कृष्ण नाचनेवाली व्रजवासिनियों को अत्यन्त मनोहर ज्ञात होते थे ॥ ७ ॥

ज
१ २ ३ ४ ५ ६ ७ ग
ऽ ऽ । । ऽ । । ऽ ऽ ऽ । । ऽ । ऽ । ऽ ऽ ऽ

आर्याप्रथमार्धसमं यस्या अपरार्धमाह तां गीतिम् ।

केशववंशीगीतिर्लोकमनोहरिणहारिणी जयति ।
गोपीमानग्रन्थेर्विमोचनी दिव्यगायनाश्चर्या ॥

प्र०—आर्येति । यस्या अपरार्धमुत्तरार्धम्, आर्यायाः प्रथमार्धेन पूर्वार्धेन, समं सदृशं स्यात्, तां गीतिमाह कथयति, पिङ्गलनाग इति शेषः ।

केशवेति । केशवस्य कृष्णस्य वंशी तस्या गीतिर्ध्वनिः, लोकानां मन एव मुग्धत्वसाम्याद् हरिणस्तस्य हारिणी हरणशीला, गोपीनां मानग्रन्थेश्च, विमोचनी शिथिलयित्री, दिव्यगायनानां गन्धर्वादीनामपि समुत्पादितम् आश्चर्यं यया सा, जयति सर्वोत्कर्षेण वर्तते ।

रु०—जिसका दूसरा अर्धभाग 'आर्या' के प्रथम अर्ध के सदृश हो, उसे 'गीति' कहते हैं ।

संसार के मन को लुभानेवाली, गन्धर्वों को आश्चर्यकारिणी तथा गोपियों के मान को मिटानेवाली कृष्ण की मुरली-ध्वनि अत्यन्त श्रेष्ठ है ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

६

।

आर्यापरार्धतुल्ये दलद्वये प्राहुरुपगीतिम् ॥ ८ ॥
नवगोपसुन्दरीणां रासोल्लासे मुरारातिम् ।
अस्मारयदुपगीतिः स्वर्गकुरङ्गीदृशां गीतेः ॥

प्र०—आर्येति । दलद्वये, आर्याया अपरार्धतुल्ये उत्तरार्धसदृशे सति, उपगीतिं प्राहुः ।

नवगोपेति । रासस्य उल्लासे रासक्रीडायां, नवा या गोपसुन्दर्यस्तासाम्, उपगीतिर्गानं, मुरारातिं कृष्णं स्वर्गकुरङ्गीदृशां स्वर्गाङ्गनानां, गीतेः अस्मारयत् । व्रजाङ्गनागानध्वनिः स्वर्गाङ्गनागानसन्निभ इति भावः । 'अधीगर्थदयेषां कर्मणि, इति गीतेरित्यत्र कर्मणि षष्ठी ।

ह०—'आर्या' के उत्तरार्ध के समान दोनों अर्धों के होने पर, 'उपगीति' छन्द होता है ।

रासलीला के समय में गोपियों की गीत-ध्वनि को सुनकर श्रीकृष्ण को स्वर्ग की सुन्दरियों के गाने की याद आगयी ॥ ८ ॥

६

।

आर्याशकलद्वितये विपरीते पुनरिहोद्गीतिः ।
नारायणस्य सन्ततमुद्गीतिः संस्मृतिर्भक्त्या ।
अर्चायामासक्तिर्दुस्तरसंसारसागरे तरणिः ॥

प्र०—आर्येति । आर्यायाः शकलद्वितये, अर्द्धद्वये, विपरीते सति अर्थात् पूर्वार्धस्य स्थाने उत्तरार्धस्य स्थाने च पूर्वार्धे सति, उद्गीतिर्भवति ।

नारायणस्येति । नारायणस्य सन्ततं निरन्तरम्, उद्गीतिर्गानम्, भक्त्या संस्मृतिः स्मरणम्, अर्चायां पूजायाम्, आसक्तिश्च, दुस्तरः अपारः संसार एव सागरस्तस्मिन्, तरणिः नौका भवति । नारायणस्य कीर्तनेन भक्त्या स्मृत्या पूजया च नूनं तरीतुमर्होऽयं दुस्तरः संसारसागरो भवतीत्यर्थः ।

ह०—'आर्या' के दोनों अर्धों के विपरीत होने पर अर्थात् पूर्वार्ध के स्थान पर

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उत्तरार्ध और उत्तरार्ध के स्थान पर पूर्वार्ध होने से, 'उद्गीति' नामक छन्द होता है।

सर्वदा नारायण का कीर्तन, भक्ति, स्तुति तथा पूजा अपार-संसार-सागर को पार करने के लिए नौका के समान है।

७ ग ग

ऽऽऽ।।ऽऽ ।।।।ऽऽ ।ऽ।ऽऽ ऽ ऽ

आर्याप्राग्दलमन्तेऽधिकगुरु तादृक् परार्धमार्यागीतिः ॥ ९ ॥

(क) हर्षाश्रुस्तिमितदृशः प्रमोदरोमाञ्चकञ्चुकाञ्चितदेहाः।
आर्या गीतिं भक्त्या गायन्ति श्रीपतेश्चरितसम्बद्धाम् ॥

(ख) चारुसमीरणरमणे हरिणकलङ्ककिरणावलीसविलासा।
आबद्धराममोहा वेलामूले विभावरी परिहीणा ॥

इति भट्टौ।

प्र०—आर्येति। आर्यायाः प्राग्दलं पूर्वार्द्धं, यदि अन्ते अधिको गुरुर्यस्य एतादृशं स्यात् तादृगेव च परार्धमुत्तरार्धं स्यात्, तदा आर्यागीतिर्भवति।

(क) हर्षेति। हर्षाश्रुभिः स्तिमिता आर्द्रा दृक् दृष्टिः येषां ते, प्रमोदरोमाञ्चैरेव कञ्चुकैः समाच्छादनवस्त्रविशेषैः अञ्चित आच्छादितो देहो येषां ते, आर्याः श्रेष्ठगुणशालिनः, भक्त्या श्रीपतेः विष्णोः, चरितसम्बद्धां चरित्रविषयां, गीतिं गानं गायन्ति।

(ख) चारुसमीरणेति। चारुसमीरणेन मान्द्यसौगन्ध्यशैत्यगुणविशिष्टेन सुन्दरेण पवनेन रमणे मनोहरे, वेलामूले सागरतीरान्तिके, हरिणकलङ्कस्य चन्द्रमसः किरणावलीभिः रश्मिसमूहैः सविलासा विलाससहिता, आबद्धः कृतः रामस्य मोहः वैचित्त्यं यया सा, विभावरी निशा, परिहीणा व्यतीता।

रु०—'आर्या' का पूर्वार्ध यदि अन्त में एक गुरु वर्ण से युक्त हो और उत्तरार्ध भी इसी प्रकार हो, तो उसको 'आर्यागीति' कहते हैं।

(क) हर्षाश्रुओं से युक्त और रोंगटे जिनके खड़े हुए हैं, ऐसे आर्य लोग कृष्ण के चरित से सम्बन्ध रखनेवाली गीति को भक्तिपूर्वक गाते हैं।

(ख) सुन्दर-पवन-वाले समुद्र के किनारे चन्द्रमा की हिलती हुई किरणों से युक्त, राम के मोह को उत्पन्न करनेवाली रात्रि बीत गई ॥ ९ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ वैतालीयम् ।

६ र ल ग ७ र ल ग

S I I S S I S I S S I I S S S I S I S

षड् विषमेऽष्टौ समे कला, स्ताश्च समे स्युर्नो निरन्तराः ।

६ र ल ग ८ र ल ग

I I S I I S I S I S S S S S S I S I S

न समात्र पराश्रिता कला, वैतालीयेऽन्ते रलौ गुरुः ॥ १ ॥

घुसृणेन मदेन चर्चितं, तव यन्निन्दति राधिके ! कुचम् ।

मुदमातनुतेऽत्र पाकिमं, वैतालीयमिदं फलं हरेः ॥

प्र०—षडिति । वैतालीये छन्दसि, विषमे पादे प्रथमतृतीयपादयोरित्यर्थः, षट् कलाः मात्राः, समे द्वितीयचतुर्थपादयोरिति यावत्, अष्टौ कलाः स्युः, तासामन्ते रगणो लघुर्गुरुश्च प्रयोज्यः । समे पादे प्रयुक्ताश्चाष्टौ कलाः, निरन्तराः सर्वाः, लघ्व्यो गुर्व्यश्च न भवेयुः । अत्र च सर्वास्वपि कलासु समा कला, पराश्रिता तत्पूर्वया तदुत्तरया च सम्बद्धा, न करणीया । एवञ्च विषमपादयोश्चतुर्दश मात्राः समपादयोश्च षोडश मात्रा भवन्ति ।

घुसृणेनेति । हे राधिके ! घुसृणेन कुङ्कुमेन, मदेन कस्तूरिकया च चर्चितं लिप्तं तव कुचं (कर्म), यत् तालीयं तालवृक्षसम्बन्धि, इदं फलं निन्दति, अत्र अस्मिन् काले, पाकिमं पक्वं तदेव फलं, श्रीकृष्णस्य मुदमातनुते हर्षं करोति । वै पादपूरणे ।

र०—'वैतालीय' छन्द में विषम अर्थात् प्रथम तथा तृतीय पाद में छः मात्राएँ और सम अर्थात् दूसरे तथा चौथे में आठ मात्राएँ होती हैं, उनके उपरान्त रगण तथा लघु और गुरु होते हैं । सम पाद में प्रयुक्त आठों मात्राओं में लगातार ह्रस्व अथवा दीर्घ मात्रा नहीं होनी चाहिये । सम्पूर्ण सम मात्राएँ पहली और बाद की विषम मात्रा से मिली हुई नहीं चाहिए ।

हे राधे ! कुङ्कुम तथा कस्तूरी के लेप से युक्त तुम्हारे स्तनों की समानता करनेवाले इस ताल के फल को इस समय पका हुआ देखकर श्रीकृष्ण को अत्यन्त आनन्द होता है ॥ १ ॥

S S

तत्रैवान्तेऽधिके गुरौ स्या, दौपच्छन्दसिकं कवीन्द्रहृद्यम् ॥ २ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आतन्वानं सुरारिकान्तास्वौपच्छन्दसिकं हृदो विनोदम् ।
कंसं यो निर्जघान देवो वन्दे तं जगतां स्थितिं दधानम् ॥

प्र०—तत्रैवेति । तत्रैव वैतालीये छन्दसि, अन्ते एकस्मिन् गुरौ वर्णेऽधिके सति, कवीन्द्राणां हृद्यं मनोहरम्, औपच्छन्दसिकं नाम छन्दः स्यात् ।

आतन्वानमिति । यो देवः दिव्यगुणः, सुरारीणां राक्षसानां कान्तासु कामिनीषु, औपच्छन्दसिकम् अभिलाषानुरूपं, हृदश्चित्तस्य, विनोदमातन्वानं कुर्वाणं कंसं, निर्जघान गतासुं चकार, तं जगतां सर्वलोकलोकान्तराणां, स्थितिं सत्तां, दधानं धारयन्तं कृष्णं वन्दे नमामि ।

रु०—'वैतालीय' छन्द में एक गुरु वर्ण अधिक होने से कवियों के मन को हरने वाला 'औपच्छन्दसिक' नामक छन्द होता है ।

जिन श्रीकृष्ण ने दानवों की स्त्रियों के साथ इच्छानुकूल काम-क्रीडा करनेवाले कंस को नाम-शेष कर दिया, लोक लोकान्तर के धारण करने वाले उन कृष्ण को नमस्कार करता हूँ ॥ २ ॥

अथ पज्झटिका ।

१६ — ९ — ९

। । । । । । । । ऽ । । ऽ ऽ ऽ

प्रतिपदयमकितषोडशमात्रा, नवमगुरुत्वविभूषितगात्रा ।

९ ९

ऽ ऽ

पज्झटिका पुनरत्र (१) विवेकः, क्वापि न मध्यगुरुर्गण एकः ॥१॥

तरलवतंसाश्लिष्टस्कन्धः, श्लथतरपज्झटिकाकटिबन्धः ।
मौलिचपलशिखिचन्द्रकवृन्दः कालियशिरसि ननर्त मुकुन्दः ॥

प्र०—प्रतिपदेति । प्रतिपदं प्रतिचरणं यमकिता युग्मविच्छिन्नाः षोडश मात्रा यत्र सा, नवममात्राया गुरुत्वेन विभूषितं गात्रं यस्याः तादृशी, पज्झटिका भवति । अस्मिन् पज्झटिकानाम्नि वृत्ते क्वापि एकोऽपि, मध्यगुरुर्गणः अर्थात् जगणो न स्यात्, इति विवेकः सिद्धान्तः ।

(१) 'पज्झटिकाया एष विवेकः' इति पाठान्तरम् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तरलवतंसेति। तरलेन चञ्चलेन वतंसेन कर्णपूरेण आश्लिष्टः स्पृष्टः स्कन्धो यस्य सः, चलतरा अत्यन्तचञ्चला याः पञ्चटिकाः क्षुद्रघण्टिकास्ताभिः कटिबन्धः कटेर्बन्धनं यस्य सः, मौलौ मस्तके चपलं शिखिनां मयूराणां चन्द्रकवृन्दं यस्य तादृशः, मुकुन्दः कृष्णः, कालियशिरसि कालियनाम्नो नागस्योपरि, ननर्त नृत्यं चकार।

रु०—जिस छन्द में प्रतिपाद में युग्म-विच्छिन्न षोडश मात्रायें हों तथा नवम मात्रा गुरु हो और एक भी जगण न हो, उसे 'पज्झटिका' कहते हैं।

चञ्चल कर्णपूर तथा मुखरित रशना और कम्पित-मुकुट को धारण करनेवाले कृष्ण ने कालिय नामक नाग के शिर पर नृत्य किया अर्थात् अनायास ही उसको यमपुरी भेज दिया॥ १॥

९
‿
।

नवमगुरुत्वं व्यभिचरति च॥ २॥

रणधरणीजितरजनिविहारी।

प्र०—नवमेति। नवममात्राया गुरुत्वस्य क्वापि व्यभिचारोऽपि दृश्यते। अयमभिप्रायो यत् पज्झटिकायां नवमवर्णस्य गुरुतया शोभाया उत्कृष्टतैव भवति। तस्य लक्षणघटकता च न स्वीकरणीया।

तदेव प्रदर्शयति—रणेति। रणधरण्यां सङ्ग्रामाङ्गणे जितो रजनिविहारी निशाचरो येन सः।

रु०—इस 'पज्झटिका' छन्द में नवम वर्ण की गुरुता का कहीं पर व्यभिचार भी देख पड़ता है। अभिप्राय यह है कि नवम वर्ण के गुरु होने से छन्द की कुछ सुन्दरता बढ़ जाती है। नवम वर्ण का गुरु होना लक्षण में नहीं मानना चाहिए।

रणक्षेत्र में जीता है राक्षस जिसने, वह॥ २॥

१३ ११

ऽऽ।ऽ।।ऽ।। ऽऽ।।।ऽ।

मात्रात्रयोदशकं यदि, पूर्वं लघुकविरामि।
पश्चादेकादशकन्तु(१), दोहडिका द्विगुणेन॥ ३॥

(१) 'पठ पुनरेकादशम्' इति पाठान्तरम्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

राई दोहडि पठण सुणि हसिओ कण्ण गोआल।
विन्दावणघणकुञ्जघर चलिओ कमण रसाल (१) ॥

इति छन्दोमञ्जर्यां मात्रावृत्ताख्यः पञ्चमः स्तबकः।

प्र०—दोहडिकां लक्षयति-मात्रेति। पूर्वं प्रथमं चरणं, त्रयोदशमात्रामयं लघुकविरामि विरामे लघुवर्णयुक्तम्, द्वितीयचरणे च एकादश मात्राः विरामे च लघुवर्णः स्याद् यदि तदा दोहडिकानाम वृत्तं स्यात्। द्विरावृत्त्या पूर्यते। अर्थात् तृतीयचतुर्थचरणे प्रथमद्वितीय चरणसदृशे भवतः।

राईति। कमलरसालः रसिकः कामुकश्च गोपालो राधिकानां गीतिं निशम्य हसितवान् वृन्दावनघनकुञ्जभवनं च गतवानित्यर्थः। गोपीनां गीतेर्दोहडिकेति संज्ञा।

इति छन्दोमञ्जरीटीकायां प्रभाऽऽख्यायां पञ्चमः स्तबकः।

र०—यदि प्रथम चरण में तेरह मात्राएँ और द्वितीय चरण में ग्यारह मात्राएँ हों तथा इन सब मात्राओं के अन्त में लघु हो, तो 'दोहडिका' नामक छन्द होता है। द्विरावृत्ति से इस छन्द की पूर्ति होती है, अर्थात् तृतीय चतुर्थ चरण, प्रथम द्वितीय चरण के समान होते हैं।

रसिक और कामुक कृष्ण राधिका की गीति को सुनकर हँसे और वृन्दावन के घने कुञ्जवन में गये। गोपियों की गीति का नाम 'दोहडिका' है ॥ २ ॥

छन्दोमञ्जरी की रुचिरा नामक भाषाटीका का पञ्चम स्तबक समाप्त।

षष्ठः स्तबकः

पद्यं गद्यमिति प्राहुर्वाङ्मयं द्विविधं बुधाः।
प्रागुक्तलक्षणं पद्यं गद्यं सम्प्रति गद्यते ॥ १ ॥
अपादः पदसन्तानो गद्यं तत्तु त्रिधा मतम्।
चूर्णको(२)त्कलिकाप्रायवृत्तगन्धिप्रभेदतः ॥ २ ॥
अकठोराक्षरं स्वल्पसमासं चूर्णकं विदुः।
तत्तु वैदर्भरीतिस्थं गद्यं हृद्यतरं भवेत् ॥ ३ ॥

---

(१) राधिकादोहडिकापठनं श्रुत्वा हसितः कृष्णो गोपालः।
वृन्दावनघनकुञ्जगृहं चलितः कमलरसालः ॥

(२) 'वृत्तके'ति पाठान्तरम्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भवेदुत्कलिकाप्रायं समासाढ्यं दृढाक्षरम् ।
वृत्तैकदेशसम्बन्धाद् वृत्तगन्धि पुनः स्मृतम् ॥ ४ ॥

प्र०—पद्यमित्यादि । बुधाः काव्यतत्त्वविदो विद्वांसः, वाङ्मयं वाक्यात्मकं काव्यं पद्यं गद्यमिति च द्विविधं द्विप्रकारकं, प्राहुर्वदन्ति । तत्र पद्यं 'पद्यं चतुष्पदी'त्यादिना प्रागुक्तलक्षणम् । सम्प्रति गद्यं गद्यते विशदीक्रियते ।

अपाद इत्यादि । मात्राक्षरनियमानुसारं विनिबद्धो भागः पादः, तद्रहितः पदसमूहः सुबन्ततिङन्तशब्दानां समूहो गद्यं, तत्तु त्रिधा त्रिप्रकारकमित्यर्थः । चूर्णकम्, उत्कलिकाप्रायं वृत्तगन्धि चेत्येतानि तेषां नामानि ।

अकठोराक्षरमित्यादि । तत्र अकठोराक्षरं सुकुमारवर्णं स्वल्पसमासं दीर्घसमाससङ्घटनारहितं, चूर्णकं विदुः समाम्नातवन्तः । तच्च चूर्णकं वैदर्भरीतिस्थं वैदर्भीरीतिसङ्घटितं, हृद्यतरं बहुमनोमोदकरं भवेत् ।

'माधुर्यव्यञ्जकैर्वर्णैं रचना ललितात्मिका ।
अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते ॥'

इति साहित्यदर्पणे वैदर्भीरीतिलक्षणम् ।

भवेदित्यादि । समासाढ्यं दीर्घकठोरसमाससङ्कुलं, दृढाक्षरं कठोरवर्णघटितं गद्यम् उत्कलिकाप्रायं भवेत् । ओजसि चास्य विशेषेण प्रयोगः । वृत्तस्य एकदेशसम्बन्धाच्च वृत्तगन्धीति तृतीयः प्रभेदः ।

रु०—काव्यतत्त्व के विद्वान् वाक्यात्मक काव्य के पद्य और गद्य ऐसे दो भेद कहते हैं । उनमें पद्य का लक्षण (स्वरूप) पिछले अध्यायों में कहा गया है, इस समय गद्य का निरूपण किया जा रहा है ।

मात्राक्षरों से नियमित भाग 'पाद' कहा जाता है, उस पाद (चरण) से रहित पदों (सुबन्ततिङन्त) का समुदाय गद्य होता है । उस गद्य के 'चूर्णक' उत्कलिका प्राय' और 'वृत्तगन्धि' ऐसे तीन भेद होते हैं ।

कोमल-अक्षर और छोटे समास-वाले गद्य को 'चूर्णक' कहते हैं । और वह गद्य वैदर्भी रीति में लिखा गया हो तो बहुत सुन्दर होता है ।

समासों से लदा हुआ, कठोर-वर्णों-वाला गद्य 'उत्कलिकाप्राय' कहलाता है । कहीं कहीं पर पद्य खण्ड की झलक आजाने से उसका नाम 'वृत्तगन्धि' होता है ॥

चूर्णकं यथा—

स हि त्रयाणामेव जगतां गतिः परमपुरुषः पुरुषोत्तमो दृसवानवभरेण भङ्गुराङ्गीमवनिमवलोक्य करुणार्द्रहृदयस्तस्या भारमवतारयितुं रामकृष्णस्वरूपेणांशत यदु-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वंशेऽवततार। यस्तु प्रसङ्गेनापि स्मृतोऽभ्यर्चितो वा गृहीतनामा पुंसा संसारसागरपारमवलोकयति।

प्र०—स्त्वहीति। गतिः आश्रयः परमपुरुषो विष्णुः, दृप्तः गर्वितः, भङ्गुराङ्गीं भङ्गोन्मुखीम्, अवतारयितुम्, अपहर्तुम्, अंशतः कलया, अवलोकयति दर्शयति, पुंसां पुम्भ्य इत्यर्थः, सम्बन्धसामान्ये षष्ठी। कोमलवर्णबाहुल्यादल्पसमासघटितत्वाच्च चूर्णकमिदम्।

रु०—जो तीनों जगतों की गति स्वरूप पुरुषोत्तम विष्णु भगवान् अहङ्कारी दैत्यों के पापों से दुःखी पृथ्वी को देखकर करुणार्द्रचित्त हो उसके भार को दूर करने के लिए राम–कृष्ण के रूप में अंश से यदुवंश में अवतीर्ण हुए। जो कि अन्य प्रसङ्ग से भी याद करने पर, या पूजा करने पर, या नाम लेने पर भगवान् भवग्राह-ग्रस्त प्राणियों को संसार–सागर से पार उतार देते हैं।

उत्कलिकाप्रायं यथा—

प्रणिपातप्रवणसप्रधानाशेषसुरासुरादिवृन्दसौन्दर्यप्रकटकिरीटकोटिनिविष्टस्पष्टमणिमयूखच्छटाच्छुरितचरणनखचक्र! विक्रमोद्दामवामपादाङ्गुष्ठनखरशिखरखण्डितब्रह्माण्डविवरनिस्सरच्छरदमृतकरप्रकरभासुरसुरवाहिनीप्रवाहपवित्रीकृतविष्टपत्रितय कैटभारे! क्रूरतरसंसारसागरनानाप्रकारावर्तविवर्तमानविग्रहं मामनुगृहाण।

प्र०—प्रणिपातप्रवणेत्यादि। प्रणिपातप्रवणाः प्रणामोन्मुखाः ये प्रधानेन इन्द्रादिना सहिताः अशेषाः सुरासुरादयः तेषां वृन्दस्य सौन्दर्येण प्रकटानां भासुराणां किरीटानां मुकुटानां कोटिषु अग्रभागेषु निविष्टा जटिताः स्पष्टाः प्रकाशमानाश्च ये मणयः तेषां मयूखच्छटाभिः किरणकान्तिभिः छुरितं व्याप्तं चरणनखचक्रं पदनखसमुदायो यस्य तत्सम्बुद्धौ, विक्रमोद्दामस्य पराक्रमोद्धतस्य वामपादस्य अङ्गुष्ठनखरशिखरेण अङ्गुष्ठनखाग्रेण खण्डितं यद् ब्रह्माण्डविवरं ततः निस्सरन्ती निर्गच्छन्ती या शरदमृतकरस्य शरच्चन्द्रस्य करप्रकरवद् मयूखमालावद् भासुरा दीप्ता सुरवाहिनी गङ्गा तत्प्रवाहेण पवित्रीकृतं विष्टपत्रितयं लोकत्रयं येन तत्सम्बुद्धौ, कैटभारे! हे विष्णो! क्रूरतरस्य अतिदुस्तरस्य संसारसागरस्य आवर्तेषु जलभ्रमेषु विवर्तमानः विग्रहो यस्य तम्। स्पष्टमन्यत्।

रु०—नमस्कार करते हुए जो देव दानव उनके शिरोमुकुट पर बठनेवाली किरणों से अङ्कित-पैर के नख वाले तथा अत्यन्त पराक्रमी बायें पैर के अँगूठे से

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ब्रह्माण्ड को खण्डित कर देने वाले, नखाग्र से निकलनेवाले चन्द्रमा के समान उज्ज्वल गङ्गा के प्रवाह से तीनों लोक को पवित्र करने वाले हे विष्णु भगवान्! भयङ्कर संसार-सागर में पड़े मुझको बचाइये।

वृत्तगन्धि यथा—

जय जय जनार्दन! सुकृतिमनस्तडागविकस्वरचरणपद्म! पद्मपत्रनयन! पद्मापद्मिनीविनोदराजहंस! भास्वरयशःपटलपूरितभुवनकुहर! हरकमलासनादिवृन्दारकवृन्दवन्दनीयपदारविन्दद्वन्द्व! द्वन्द्वनिर्मुक्तयोगीन्द्रहृदयमन्दिराविष्कृतनिरञ्जनज्योतिःस्वरूप! विश्वरूप! अनाथनाथ! मामनवधिभवदुःखव्याकुलं रक्ष।

प्र०—जयेत्यादि। जननामकासुरविशेषमर्दनकारिन्! सुकृतिनां पुण्यकारिणां मनांस्येव तडागाः पद्माकरास्तेषु विकस्वरं प्रफुल्लं चरणपद्मं यस्य तत्सम्बुद्धौ, पद्मपत्रे इव नयने नेत्रे यस्य तत्सम्बुद्धौ, पद्मा कमला सैव पद्मिनी कमलिनी तस्यां विनोदकारी यो राजहंस इव राजहंसस्तत्सम्बुद्धौ, भास्वरं प्रकाशमानं यद् यशःपटलं तेन परिपूरित व्याप्तं भुवनकुहरं ब्रह्माण्डं येन तत्सम्बुद्धौ, हरः शिवः कमलासनो ब्रह्मा एतौ आदौ प्रारम्भे येषां तथाभूता ये वृन्दारका देवास्तेषां वृन्देन समूहेन वन्दनीयं प्रणमनीय पदारविन्दद्वन्द्वं यस्य तत्सम्बुद्धौ, द्वन्द्वैः सुखदुःखादिभिर्निर्मुक्ता विरहिताः ये योगीन्द्रास्तेषां हृदयमन्दिरे आविष्कृतं प्रकाशितं निरञ्जनम् अव्यक्तं ज्योतिःस्वरूपं तेजोमयं रूपं यस्य तत्सम्बुद्धौ, विश्वं जगदेव रूपं यस्य तत्सम्बुद्धौ, अनाथानाम् असहायानां नाथः रक्षकः तत्सम्बुद्धौ, जगतां लोकानां नाथः स्वामी तत्सम्बुद्धौ, अनवधि निःसीमं यद् भवदुःखं संसारक्लेशः तेन व्याकुलं, मां, रक्ष पालयेत्यर्थः। अत्र 'सुकृतिमनस्तडाग' इति रुचिरावृत्तस्य। 'पद्मपत्रनयन' इति स्वागतावृत्तस्य 'पद्मिनीविनोदराजहंस' इति तूणकस्य, 'वृन्दारकवृन्दवन्दनीयपदारविन्दद्वन्द्व' इत्यत्र शार्दूलविक्रीडितस्य, 'द्वन्द्वनिर्मुक्तयोगीन्द्रे'ति अनुष्टुभश्चैकदेशो दृश्यते।

ह०—हे जनार्दन! आपकी जय हो। पुण्यात्माओं के हृदय-रूपी तडाग में विकसित-चरणकमल-वाले! कमलनेत्र! लक्ष्मी-कमलिनी-विनोदक राजहंस! देदीप्यमान यश से भुवन को पूर्ण करनेवाले! महादेव तथा ब्रह्मदेव-आदि देवतावृन्दों से वन्दनीय-पदकमल-वाले, सुखदुःखद्वन्द्व-रहित योगिश्रेष्ठों के हृदयमन्दिर में प्रकाशित-अव्यक्त-ज्योतिःस्वरूप! विश्वात्मन्! परमात्मन्! अपरिमित संसार के दुःखों से पीड़ित मुझे बचाइये।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

व्यवहारोचितं प्रायो मया छन्दोऽत्र कीर्तितम् ।
प्रस्तारादि पुनर्नोक्तं केवलं कौतुकं हि तत् ॥ ५ ॥

प्र०—व्यवहारेति । अत्र छन्दोमञ्जर्यां, मया प्रायः व्यवहारोचितं लोककार्योपयोगि, छन्दः कीर्तितं कथितम् । किन्त्वत्र प्रस्तारादि नोक्तं, यतस्तत् केवलं कौतुकं लीलैवेत्यर्थः ।

हि०—व्यवहार में आने वाले छन्द ही प्रायः मुझसे इस ग्रन्थ में लिखे गये हैं। प्रस्तार आदि नहीं दिखलाये गये हैं, क्योंकि यह सब केवल कौतुक ही है ॥ ५ ॥

सर्गैः षोडशभिः समुज्ज्वलपदैर्नव्यार्थभव्याशयै-
र्येनाकारि तदच्युतस्य चरितं काव्यं कविप्रीतिदम् ।
कंसारेः शतकं दिनेशशतकद्वन्द्वं च, तस्यास्त्वसौ
गङ्गादासकवेः श्रुतौ कुतुकिनां सच्छन्दसां मञ्जरी ॥ ६ ॥

इति छन्दोमञ्जर्यां गद्यप्रभेदो नाम षष्ठः स्तबकः ।

प्र०—सर्गैरिति । येन गङ्गादासेन, समुज्ज्वलानि चमत्कारकराणि पदानि येषु तैः नव्यार्था नूतना अर्था भव्याशयाः सुन्दरा अभिप्रायाश्च येषु तादृशैः, सर्गैः कविप्रीतिदं कवीनां प्रमोदकरं, काव्यं महाकाव्यम् 'अच्युतचरितं' नाम अकारि कृतम् , तथा कंसारेः शतकं कृष्णस्य शतश्लोकी, दिनेशशतकस्य सूर्यशतकस्य द्वन्द्वं द्वयं दिनेशद्विशती, यद्वा भिन्नमेव शतकद्वयम् , अकारि प्रणायि, तस्य गङ्गादासकवेः असौ सच्छन्दसां मञ्जरी छन्दोमञ्जरीत्यर्थः, कुतुकिनां छन्दःश्रवणकौतुकभृतां, श्रुतौ कर्णे कर्णालङ्कारभूतेति यावत् , अस्तु भवतु ।

हरिशङ्करयोरियं कृतिः सुरवाणीजननीवचोऽन्विता ।
विदधातु मनःप्रसन्नता बटुवृन्दस्य सदा नवां नवाम् ॥

इति छन्दोमञ्जरीटीकायां प्रभाऽऽख्यायां षष्ठः स्तबकः ।

हि०—जिस महाकवि गङ्गादास ने नवीन अर्थ तथा सुन्दर भावों से युक्त, कवियों को प्रसन्न करनेवाला 'अच्युतचरित'नामक महाकाव्य बनाया, तथा 'कृष्णशतक' 'सूर्यशतक'—द्वितीय अथवा दो 'सूर्यशतक' बनाये, उस महाकवि गङ्गादास

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

की यह कृति 'छन्दोमञ्जरी' विद्वानों के कानों में भूषणभूत हो। अर्थात् वे इसे प्रचार व प्रसार और पठनपाठन के उपयोग में लावें ॥ ६ ॥

छन्दोमञ्जरी की रुचिरा नामक भाषाटीका का षष्ठ स्तवक समाप्त।

समाप्तश्चायं ग्रन्थः।

उपसंहारः

यत्तातः प्रथितः स पण्डितमणिः श्रीलालमण्याख्यया
मता श्रीहरदेविका च समभूद्यज्जन्मसम्पत्तये।
सोऽयं शंकरदेवपाठकवरो विद्वत्सुहृच्छ्रीहरेः।
साहाय्याद्रुचिरां प्रभाविलसितां टीकां समापूरयत् ॥ १ ॥
नत्वा रामप्रियान्वितस्य बहुशः पादारविन्दद्वयं
विद्वत्तल्लजभीमसेनसुपितुः श्रीशङ्करे साक्षिणि।
हिन्दीसंस्कृतभाषयोररचयट्टीकां प्रभानामिकां
सद्भावां रुचिरां च पण्डितवरो वृत्तान्त्यशब्दो हरिः ॥१॥

इति शिवम्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥ श्रीः ॥

छन्दोमञ्जरीस्थानां सूत्राणां कारिकाणाञ्च अकारादिवर्णक्रमेण सूची

विषयाः	पृष्ठाङ्काः
अकठोराक्षरं स्व०	१६३
अक्षोन्माना वर्णा	२८
अनन्तरोदीरितल०	३४
अनवसिता न्यो भगौ	४५
अपादः पदसन्तानो	१६३
अयुजि ननभभाः	१४४
अयुजि ननरला	१४०
अयुजि नयुगरेफतो	१४१
अयुजि प्रथमेन	१३९
अयुजोर्यदि सौजगौ	१४२
अर्धाश्वाश्वैर्मभन०	१०७
असमे सजौ सगुरु०	१४३
आख्यानकी तौ	१४३
आदिस्तृतीयवद्	३
आद्यं दलं समस्तं	१५६
आरभ्यैकाक्षरात्पा०	१२
आर्यापरार्धतुल्ये	१५८
आर्याप्रथमार्धसमं	१५७
आर्याप्राग्दलमन्ते०	१५९
आर्याशकलद्वितते	१५८
इत्युक्तश्छन्दसां संज्ञाः	१२
इदं कन्दुकं यत्र	७०
इनाश्वैः स्याद् यम	११४
इयमच्युतलीलाख्या	२
इह ननरचतुष्कसृष्टं	१०४
इह नवमालिका	५९
इह वद तामरसं	५६
उक्थाऽत्युक्था तथा	१२
उपचित्रमिदं सस०	४४
उपस्थितमिदं	४४,७०
उपेन्द्रवज्रा प्रथमे	३४
एकन्यूनौ विद्युन्माला	८०
एते क्रमात्तभसज०	७१
ओजे तपरौ	१४३
कीर्तितैषा चतूरेफिका	५१
कुपुरुषजनिता	४४
कुमारललिता ज्सगाः	२०
क्रौञ्चपदा स्याद्	१२८
क्वचिच्छन्दस्यास्ते	९
गजाब्धितुरगैर्नसौ	११४
गरुडरुतं नजौ	९१
गुरुन धनमनुलघुरिह	७७
गुरुरेको गकारस्तु	४
गुरु षष्ठं च जानी०	१५१
गौ स्त्री	१४
ग्मौ चेत् कन्या	१५
ग्लौ रजौ समानिका	२२
ग श्रीः	१३
चन्द्रवर्त्म निगदन्ति	४७
चरमेऽर्धे पञ्चमके	१५२
चित्रपदा यदि	२१
चित्रसंज्ञमीरितं	८४
चित्रानामच्छन्द०	८४
जतौ जगौ गो	१४३
जतौ सजौ गो	७०
जभौ सजौ गिति	६३
जसौ जसयला वसु०	९४
जसौ जसयुतौ	४२
ज्ञेयं वसन्ततिलकं	७२
ज्ञेया मत्ता मभसग०	२९
ज्ञेया सप्ताश्वषड्०	११५
ज्ञेया हंसी मभनग०	३२
ज्ञेयाः सर्वान्तमध्यादि०	४
तच्चेन्द्रवंशा प्रथमे	४८
तत्रैवान्तेऽधिके गुरौ	१६०
तदुदितमरुमतिभि	१४९
तूणकं समानिका०	८२
तो जौ गुरुणेयमुप०	३२
त्यौ चेत् तनुमध्या	१७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विषयाः	पृष्ठाङ्काः
रयौ त्यौ मणिमाला	५७
त्रयमुद्गतासदृशमेव	१४७
त्रिष्टुप् च जगती	१२
त्र्याशाभिर्मनजरगाः	६२
त्वरितगतिश्च नज०	३०
दलयोर्द्वितीयतुर्यौ	१५५
दिङ्मुनि वंशपत्र०	९४
दीपकमाला भ्मौ मता	३२
देवं प्रणम्य गोपालं	१
दोधकमिच्छति	४२
द्रुतपदं भवति	६०
द्रुतविलम्बितमाह	५३
द्विगुणनगणसहितः	२८
द्विगुणितवसुलघुभि०	९०
द्विया सोमराजी	१८
द्विःसप्तच्छिदि लोला	७५
धीरैरभाणि ललिता	५९
धृतिश्चातिधृतिश्चैव	१२
नगि सती	१५
नजजलगैर्गदिता	३७
नजभजजा जरौ	१२०
नजभजभा जभौ	१२४
नजभजरैर्यदा भवति	८९
नजभजरैस्तु रेफ०	१०२
नजरभमेण गेन	९२
ननगि मधुमती	१९
ननततगुरुभिः	६६
ननभनलगिति	७४

विषयाः	पृष्ठाङ्काः
ननभररसहिता	५९
ननमयययुतेयं	७९
ननररघटिता तु	५४
ननरलगुरुभिश्च	४४
ननरसलघुगैः	७३
ननसगगुरुरचिता	४४
नभलगा गजगतिः	२४
नयसहितौ न्यौ	५५
न्युगं सकारयुगलञ्च	१४९
नयुगलसयुगलगै०	६५
नरजगैर्भवेन्मनोरमा	३१
ननरलैर्गुराविन्दिरो	४५
नवमगुरुत्वं	१६२
नसमरसला गः	९६
न समात्र परा०	१६०
नसरयुगगैश्चन्द्र०	७०
नाराचिकातरौ लगौ	२५
पञ्चमकारयु०	९२,१०७
पञ्चमं लघु सर्वत्र	१५०
पञ्चमुनी भ्मौ स्यात्	६०
पथ्या विपुला	१५४
पद्यं गद्यमिति	१६३
पद्यं चतुष्पदी तच्च	२
प्रचितकसमभिधो	१३२
प्रतिचरणविवृद्धरे०	१३१
प्रतिपदयमकित०	१६१
प्रथमगणत्रयविर	१५४
प्रथमे सजौ	१४६, १४७

विषयाः	पृष्ठाङ्काः
प्रमाणिका जरौ लगौ	२३
प्रमाणिकापदद्वयं	८७
प्रमिताक्षरा सजससैः	५२
प्रयोगे प्रायिकं प्राहुः	१५१
बाणाश्वैश्छिन्ना	५२
भत्रयमोजगतं	१४२
भद्रिका भवति	२७
भवति नजावथ	५२
भवति मृगेन्द्रमुखं	६९
भवत्यर्धसमं वक्त्रं	१४९
भवेत्कान्ता युग०	१००
भवेत्सैव च्छाया	११०
भवेदुत्कलिकाप्रायं	१६४
भात्तलगा माणवकम्	२१
भात् समतनगैरष्ट०	८६
भाद् रनना नसौ	१०७
भाराक्रान्ता ममन०	९९
भुजगशिशुसृता	२६
भुजंगप्रयातं चतुर्भि०	५०
भुवि भवेन्नभजरैः	५९
भूतमुनीनैर्यतिरिह	१२७
भो रयना नगौ च	९२
भ्गौ गिति पङ्क्तिः	१६
भ्रत्रिनर्गैः स्वरात्व०	८३
भ्रौ नरना रनावथ	१२२
मत्ताक्रीडं वस्व०	१२६
मन्दाक्रान्ता नपर	१०५
मन्दाक्रान्ताम्बुधि०	९६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विषयाः	पृष्ठाङ्काः
मात्तो नो भो गौ	७५
मात्तौ गौ चेच्छालिनी	२८
मात्रात्रयोदशकं	१६२
मात्सौ जौ भर०	१०६
मो गो नौ गो	४०
मो गौ नौ तौ गौ	११३
मो गौ नौ मध्येच्छर	७१
मोटकनाम समस्त०	६०
मो नारी	१४
मो नाः षट् सग०	१३०
मो भः स्मौ चेज्ज्वल०	५८
मो मो गो गो विद्यु०	२२
मौ गौ नाथस्वारो	१२१
मः सो जः सतसा	१०६
मस्त्रिगुरुस्त्रिलघुश्च	३
म्नौ गौ हंसरुतमेतत्	२५
म्नौ यगौ चेति	३१
म्भौ नो म्नो गो	८८
म्भौ न्जौ भ्रौ चे०	१०७
म्यरस्तजभ्नगैर्लान्तै०	३
म्भ्नैर्यानां त्रयेण	११९
म्रौ भ्नौ यो नो	११२
म्रौ मो यौ चेद्भवेता	८३
म्सौ गः स्यान्मद०	२०
म्सौ ज्गौ शुद्ध०	३१
यकारैः कवीच्छा०	१३७
यतिर्जिह्वेष्टविश्राम०	८
यत्र दृश्यते गुरोः	१३६
यत्र रेफान् कविः	१२७
यत्र रेफः परं	१३४
यदि भवतो नजौ	९७
यदि विषमे भवतो	१४४
यदिह नयुगलं ततो	१०७
यदिह नयुगलं ततः	१३०
यभौ नसौ गश्च	८९
यभौ रौ विख्याता	७०
यस्मिन् सर्वे गा	९२
युजोश्चतुर्थतो गेन	१४०
रथाश्वाश्वैः शोभा	११८
रविलघुतरलनयन०	६१
रसयुगहययुङ्	१००
रसर्त्वश्वैर्य्मौ न्सौ	१०९
रसै रुद्रैश्छिन्ना	९३
रसैः षड्भिर्लोकै	११४
रात परैर्नरलगैं	४१
राक्षसाविह हलमुखी	२७
रुक्मवती सा यत्र	२९
रेण जेन सेन	४५
रो मृगी	१५
रो जरौ जसंयुतौ	१४४
जौं रगौ मयूरसारिणी	३१
सौं लगौ विषमे	१४३
लक्ष्मैतत् सप्त गणा	१५१
लघुर्गुर्वोर्निजेच्छया	१३५
लघुर्गुरुर्वदन्ति	०
ललितमभिहितं नौ	,,
लालित्यं भुजगेन्द्रेण	१२३
वक्त्रं युग्भ्यां मगौ	१४९
वद तोटकमब्धि	५०
वदन्ति वंशस्थबिलं	४७
वर्णाश्वैर्मननततमकैः	१०७
वसुमुनियतिरिति	७९
वसुयुगविरतिर्नौ	५९
वह्नीशाश्वैश्छेदो०	१२९
वातोर्मीयं गदिता	३९
विद्युल्लेखा मो मः	१०
विष्वक्कमाला भवेत्तौ	४५
विपिनतिलकं नसन०	८१
विषमे यदि सौ	१३८
विषमे ससजा यदा	१४४
वृत्तं विश्वाख्यं	,,
वृत्तमीदृशन्तु	११७
वेदर्त्वश्वैर्भनम०	९८
वेदै रन्ध्रैर्म्तौ यसगा	६४
वैतालीयं पुष्पिताग्रा	१४१
व्यवहारोचितं प्रायो	१६७
शशिवदना न्यौ	१८
शार्दूलं वद मास	१०७
शिखण्डितमिदं ज्सौ	४४
श्येन्युदीरिता रजौ	४३
श्वेतमाण्डव्यमुख्या०	९
षड् विषमेऽष्टौ समे	१६०
षष्ठे द्वितीयलात्	१२१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विषयाः	पृष्ठाङ्काः
संलंघ्य गणत्रय०	१५४
सगणः सकलः	१२३
सङ्कथिता भरौ नर०	९२
सजसा भरौ सलगा	११६
सजता नसौ ररौ	१२३
सजरैर्भुजङ्गसङ्गता	२७
सजसा जगौ च भवति	६८
सजसा जगौ च यदि	६६
सजसा सगौ च	६७
सन्ति यद्यपि भूयांस०	१
सप्तभकारयुतैकगुरु०	१२२
समसर्वसमं वृत्तं	३
समस्तजमीरय	६०
सर्गैः षोडशभिः	१६७
सर्वे मा यस्मिन्	६०
सलगैः प्रिया	१६
ससजैरतिशायिनो	१००
सानुस्वारश्च दीर्घश्च	५
सान्द्रपदं स्याद् भत०	४५
सारङ्गसंज्ञं समस्तै०	६०
सुधा तर्कस्तर्कै०	१०७
सूर्याश्वैर्यदि मः	१११
स्यादनुकूला भतन	४०
स्यादयुग्मके रजौ	१४३
स्यादिन्द्रवज्रा यदि	३३
स्याद् भूतर्त्वश्वैः	१०१
स्यान्मणिमध्यं चेद्भ०	२६
स्यान्मोटनकं तज०	४३
स्रगियमपि च रस०	७८
स्वरभिदि यदि नौ	७६
स्वागता रनभ	४१
स्वेच्छया रजौ क्रमेण	१३७
हयऋतुसागरैर्यति०	९८

सटीकच्छन्दोमञ्जरीग्रन्थान्तर्गतानां पद्यानाम्

अकारादिवर्णक्रमेण सूची

पद्यानि	पृष्ठाङ्काः
अंहो हन्ति ज्ञानवृद्धिं	३८
अतिसुरभिरभाजि	५४
अथ वासवस्य	१४७
अभीष्टं जुष्टो यो	११०
अभून्नृपो विबुधसखः	६३
अमरमयूरमानस०	९१
अमृतस्य शीकर०	५२
अमृतोर्मिशीतलकरेण	६६
अयि विजहीहि	५६
अयि सहचारि!	७८
अर्चामन्येषां त्वं	५२
अवतु वो गिरिसुता	२४
अहृत धनेश्वरस्य	१०२
आतन्वानं मुरारि०	१६१
इत्थं रथाश्वेभनिषा०	३५
इन्द्रनीलोपलेनेव	५१
इह कलयाऽच्युत	५६
इह दुरधिगमैः	६७
उक्ता वसन्ततिलका	७३
उदञ्चत्कावेरील०	१०९
उदेत्यासौ सुधाकरः	१३५
उपेन्द्रवज्रादि मणि०	३४
एकमात्रो भवेद्ध्रस्वो	२
एवं यथा ययोद्वेगः	९
कत्यद्रिप्रतिरोधिताः	११
कदम्बामोदाढ्या	१०९
करकिसलयशोभया	१४१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पद्यानि	पृष्ठाङ्काः
करतालचपल०	११६
करादस्य भ्रष्टे ननु	९३
काचिन्मुरारेर्वदना०	३४
कामक्रीडासतृष्णो	११२
कायमनोवाक्यैः	२९
कालियभोगाभोगग०	२६
कृत्वा कंसमृगे	१०६
कृष्णसनाथा तर्णक०	१६
कृष्णः शिशुः सुतो	१५२
कृष्णः श्रृङ्गारपटु०	१५७
केशववंशीगीति	,,
क्रीडत्कालिन्दी०	१०१
क्रौञ्चपदालीचित्रि०	१२८
क्षितिविजितिस्थिति०	३०
खरतशौर्यपावक०	१२४
गुरुभुजवीर्यभरं	६९
गोपस्त्रीभिः कृष्णो रेमे	१४
गोपानां नारीभिः	,,
गोपालीलालोला	८४
गोपीनामधुरसुधा०	६३
गोविन्दं प्रणमो०	१११
गोष्ठे गिरिं सव्यक०	३३
ग्राम्याब्जानूपं	१०१
घुसृणेन मर्दन	१७६
चञ्चलचूडं चपलै०	२२
चन्द्रवर्त्मपिहितं	४७
चपला न चेत् क०	१५५
चारुसमीरणरमणे	१०९
चिकुरकलापशैव०	१२०

पद्यानि	पृष्ठाङ्काः
चित्तमुत्तलीलया	११७
जय जय जगदीश	१३१
जय जय नाथ !	१५४
जयति दितिजरिपु०	६५
तरणिजातटे	३१
तरणिजापुलिने न०	५३
तरणिदुहितृतट०	९०
तरणि सुतातटक०	३७
तरणिसुतातरङ्ग०	१०२
तरलवतंसासंश्लिष्ट०	१६१
तरला तरङ्गरिङ्गि०	२७
तरुणं सर्षपशाकं	५
तुरगशताकुलस्य	१२०
तोयेषु तस्याः प्रति०	३५
त्वरितगतिर्व्रज०	३०
दिनकरतनया त०	१०४
दुरन्तदनुजेश्वर०	९४
दुर्जयदनुजश्रेणी०	८६
देव ! सदोघ ! कद०	४२
दैत्येन्द्रवंशाग्नि०	४८
ध्याता मूर्तिः क्षण०	३९
नन्दसुत वल्लक०	१५६
नरकरिपुरवतु	७९
नवगोपसुन्दरीणां	१५८
नश्यन्ति ददर्श	१७
निषादर्षभगान्धार०	४८
नूतनवंशपत्रपतितं	९४
परित्राणाय साधूनां	७२
परिभूतफुल्लशत०	१४८

पद्यानि	पृष्ठाङ्काः
पायाद्वो गोविन्दः	८०
पीत्वा मत्ता मधु	२९
पुंसां कलिकाल०	१५५
पुनातु भक्तिरच्युता	२४
पुनातु वो हरिरति०	६३
प्रतिकूलतामुपगते	५२
प्रत्याहृत्येन्द्रियाणि	११५
प्रलयघनघटा०	१३०
प्रह्वामरमौलौ रत्नो०	५७
प्राप्य नाभिह्रदमज्जन०	७
प्रेमालापैः प्रिय०	९६
फुल्लं वसन्ततिलकं	७२
बलिदमनविधौ बभौ	४४
बल्लववेशा मुररिपु०	३०
भाराक्रान्ता मम	९९
भास्वत्कन्या सैका	१५
भुजोत्क्षेपः शून्ये	८९
भ्राम्यद्भृङ्गीनिर्भर०	७५
मतल्लिका मचर्चिका	२४
मलयजतिलक०	७७
मा कान्ते ! पक्ष०	८०
माधवमासि विक०	१२२
माधव ! मुग्धैर्मधु०	१२७
माधुर्यव्यञ्जकैर्वर्णै०	१६४
मुखारविन्दैर्व्रज०	३५
मुग्धे ! मानं परिहर	४०
मुग्धे ! यौवनल०	७३
मुग्धोन्मीलन्मत्ता०	१२६
मुररिपो ! तव पदं	१६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पद्यानि	पृष्ठाङ्काः
मुरवैरिवपुस्तनुतां	१३८
मुरहर ! यदुकुलां	१३२
मुरारितनुवल्लो	२०
मूर्तिर्मुरशत्रो०	१७
मूर्ध्नि चारुचम्प०	१३६
मृगमदकृतचर्चा	७९
यदनवधिभुज०	७३
यदवोचत वीक्ष्य	१४२
यदा तीव्रप्रयत्नेन	८
यदीयहलतो विलोक्य	४९
यमुनातटमच्युत०	५१
यमुनाविहारकुतुके	६८
यस्य कीर्तिरिन्दुकु०	४३
यस्य कृष्णपादपद्म०	२३
यस्य चेतसि सदा	४२
यस्या नित्य श्रुति०	९८
या भक्तानां कलि०	५८
यामुनसैकतदेशे	२१
यो हरिरुच्चखान	९५
रक्तेन केशिदशनक्षत०	६
रघुपतिरपि जात०	१०४
रङ्गे खलु मल्लकु०	४३
रङ्गे बाहु०	२०
रविदुहितृतटे वन०	१९
रविसुतापरिसरे	२४
राई दोहदि पठण	१६३
राधिका दधिविलो	४१
रासकेलिसतृष्णस्य	१५०

पद्यानि	पृष्ठाङ्काः
लसदरुणेक्षणं	९८
लीनानृत्यन्मतमयू०	६४
वक्त्राम्भोजं सदा	१४९
वनेषु कृत्वा सुरभि०	३५
वासोवल्ली विद्यु०	३२
विच्छेदे ते मुरारे !	८३
विद्रुमारुणाधरौष्ठ०	८५
विपिनतिलक	८२
विपिनविहारे कुसु०	५५
विभ्रश्यत्स्रग्गलित०	८८
विरराज यदीय०	१३३
विललास गोप०	१४६
विलासवंशस्थपिलं	४८
विलुलितपुष्परेणु०	१२४
विवर्तमानं जगत०	९
वीर्याग्नौ येन ज्व०	७२
वृन्दावने सलीलं	१५२
व्यथयति कुसुम०	७४
व्यधित स विधिनेत्रं	९६
व्याकोषेन्दीवराभा	११९
व्रजवनितावसन्त०	९७
व्रजसुन्दरीसमुद०	१४९
व्रजसुभ्रुवो विलस०	१६
शङ्केऽमुष्मिञ्जगति	१०५
शयिता मृषा चटु०	६८
शरदमृतरुच०	६७
शशिवदनानां व्रज०	१८
शबवल्लोकानां प्र०	११३

पद्यानि	पृष्ठाङ्काः
श्लोकेषु नियत०	१०
श्रीमान् सुधीनो	१
सर्वे वर्णा दीर्घा०	२२
सदा पूर्णोन्मील०	११८
सदारात्मजज्ञाति०	५०
सन्तुष्टे विसर्गा पु०	१०
सनाकवनितं	४९
सम्प्रति लब्धजन्म	९५
सरसखगकुलालाप०	७६
सहशरधि निजं तथा	५४
साध्वी माध्वीक !	१०
सा मज्जनस्नानवि०	७
सा मृगीलोचना	१५
सार्धं कान्तेनैकान्ते	१२२
सा सुवर्णकेतकं	८२
सिन्दूरपूरकृतगैरिक०	६
सुरद्रुमूलमण्डपे	८७
स्फुटफेनचया	१३९
स्फुटमधुमधुरवेणु०	१४०
स्फुटसुषमामकर०	५६
स्फुरतु ममाननेऽस्य	८९
स्मरवेगवती व्रज०	१३९
हरे ! सोमराजी समा	१८
हर्षाश्रुस्तिमितदृशः	१५९
हा तातेतिक्रन्दित०	६४
हेमगौरं वसानो०	१३४
हेलोदञ्चन्न्यञ्च०	१२५
ह्रदतटनिकटक्षाणो	२६

Ganesh Varni Digambar Jain Institute, Naria, Varanasi